

स्वर-मंगला

[त्रैमासिकी संस्कृत-पत्रिका]



म.म.गोपीनाथकविराज-जन्मशताब्दी-विशेषाङ्कः

राजस्थान-संस्कृत-अकादमी (संगमः) जयपुरम्



जयपुरे पं.गिरिधरशर्मा-नवरत्न-जन्मशताब्दी-समारोहे भाषमाणाः
केन्द्रीय-मानव-संसाधनमन्त्रिणः श्रीनरसिंहरावमहोदयाः ।

लेखकेभ्यो निवेदनम्

मान्याः,

स्वरमङ्गला-पत्रिकायाः संयुक्ताङ्कोऽयं म.म.गोपीनाथकविराज-जन्मशताब्दी–विशेषाङ्कत्वेन प्रकाश्यते । अत एवास्मिन्नङ्के तत्सम्बद्धा रचनाः प्राथम्येन समाविष्टाः । लेखकेभ्यः सम्प्राप्ता अन्या रचना आगमिष्वङ्केषु प्रकाशिता भविष्यन्तीति सक्षमाप्रार्थनं विनिवेद्यते ।

—सम्पादकः

स्वर-मंगला

[त्रैमासिकी संस्कृत-पत्रिका]

वर्ष : १०   जुलाई-दिसम्बर-मासाः, १९८५   अङ्कौ : ३-४

सम्पादक-मण्डलम्

डाँ० रामचन्द्रद्विवेदः

श्रीकलानाथशास्त्री

डाँ० रा० महादेवन्

श्रीरामगोपालशास्त्री

डाँ० प्रभाकरशास्त्री

श्रीरामजीलालशास्त्री

सम्पादकः

डॉ० मण्डनमिश्रः

सह-सम्पादकः

डॉ० रूपनारायणस्त्रिपाठी

प्रबन्ध-सम्पादकः

ललितकिशोरः

[निदेशकः, राजस्थान-संस्कृत अकादमी]

शुल्कम् : १० रूप्यकाणि   सैषा प्रतिः ३ रूप्यकाणि

प्रकाशिका

राजस्थान संस्कृत अकादमी

वीरेश्वर भवन, गणगौरी बाजार, जयपुर

[रजि. संख्या आर. एन. २६०६५/७२]

विषय-क्रमः

सम्पादकीयम्

विश्वश्रुतयशसां विद्वद्वन्द्यपादारविन्दानां सर्वासु भारतीयविद्यासु कुलगुरूणां योगतन्त्ररहस्यपारदृश्वनां सर्वतन्त्रनिष्णातानामपि सर्वतन्त्रस्वतन्त्राणां महामहोपाध्याय–पद्मभूषण–साहित्यवाचस्पतिप्रभृतिपदवोशतसभाजितानां स्वानुभवसिद्धसाधनाद्वैतप्रतिष्ठापकानां सिद्धपादानां शिवसायुज्यभाजां महामनीषिणां श्रीगोपीनाथकविराजमहोदयानां जन्मशताब्दीसमारोहः ऐषमः सर्वत्रापि भारते समायोजितः । राजस्थानविश्वविद्यालयेन तदङ्गत्वेनेदंप्रथमतयाऽत्र जयपुरे प्रवर्तिता विद्वद्गोष्ठी यत्र प्रो. रामचन्द्रद्विवेदिनिदेशकत्वे भारतीय–दार्शनिक–अनुसन्धानपरिषत्साहाय्येन 'म. म. गोपीनाथकविराजस्य भारतस्य धर्मे दर्शने चावदानम्'' इति विषयमवलम्ब्य भारतस्य मूर्धन्या मनीषिणो दिवसचतुष्टयं (१–४ मार्च मासे) यावत् तद्ग्रन्थालोचनं विधास्यन्ति । एतदनन्तरं नवदिल्लीस्था साहित्य–अकादमी दिल्ल्यां, कलिकातायां च गोष्ठी आयोजयितुं समाहितसंकल्पा । स्वनामधन्यानां विदुषां श्रद्धया नामस्मरणमपि भव्याय कल्पते परं तेषां ग्रन्थानां विचाराणां च तलस्पर्शि विवेचनं सुतरामावश्यकं येन भारतीयज्ञानस्य विकासदिक् सुस्पष्टा भवेत् । तर्ककर्कशविचारवीचिसमुल्लास एव विश्रान्तमिव भारतीयदर्शनं पुनरपि प्रबोधयिष्यति, अधिगतांश्चार्थान् कुक्षीकरिष्यति । तदर्थमायोजितेयं विद्वद्गोष्ठी साफल्यं प्राप्स्यतीति विश्वसिमः ।

स्वरमङ्गलेयं संस्कृतसंस्कृतिसूर्याणां म.म. गिरिधरशर्मचतुर्वेद-पं. चन्द्रधरशर्मगुलेरि–प्रथम राष्ट्रपति डॉ. राजेन्द्रप्रसाद–पं.गिरिधरशर्मनवरत्नानां जन्मशतीसमारोहावसरे स्वविशेषाङ्कान् प्रकाश्य स्वात्मानं पावयामासेति सुविदितं विदितवेदितव्यानां पाठकानाम् । जयपुरराज्यप्रधानामात्यस्य बाबू संसारचन्द्रमहोदयस्य संरक्षणेन वर्षचतुष्टयं यावत् जयपुर–पत्तने महाराज-कालेज–नाम्नि महाविद्यालये द्वादशकक्षापर्यन्तम् अधीतवन्तः कविराज-महोदया इति केचिदेव जानीयुः । अस्त्येव महद्गौरवं द्वितीयकाशीभूतस्य जयपुरस्य यत्र प्रथममधीत्यैव पर्यन्ते काशीवासमकार्षुः कविराजमहोदयाः । तेषां जन्मशताब्दीसमारोहावसरव्याजेन स्वविशेषांकप्रकाशनेनात्मानं पुनरपि पावयति श्रद्धाञ्जलिना सह प्रणतिततिमपर्यन्ती स्वरमङ्गला ।

कविराजैः आंग्ल-हिन्दी-बंगभाषासु विशिष्य लिखिता ग्रन्था लेखाश्च प्रायेण संस्कृतगिरा दुर्लभा एव । तत एव केचन संस्कृतज्ञा तद्ग्रन्थैर्विचारैश्च अपरिचताः स्युरिति धिया कविराजविचारनवनीतमत्र यत्किञ्चिदुपस्थापितं यदास्वाद्य तद्ग्रन्थभावनार्थं प्रवर्तिष्यन्ते केवलं संस्कृतं जानाना अपि विद्वांसः । महतो महीयसोऽयमणीयानेव संस्कृतेन समारम्भः । म. म. गोपीनाथकविराजमधिकृत्याभिनदनग्रन्थाः नैकैः प्रकाशिताः । तथाहि लखनऊ नगरस्थिता अ.भा.संस्कृतपरिषद् १९६७तमे ईशवोयवर्षे तज्जीवनग्रंथादि–सूचनया सह ग्रन्थमेकं प्रकाशयामास । भगवतीप्रसादसिंहः 'मनोषी की लोकयात्रा' इत्यस्मिन् ग्रन्थे तज्जीवनविषयकं वृत्तान्तं सामस्त्येन निरूपयति । अत्र तु समासेनैव कविराजमहोदयानां जीवन-ग्रन्थादिविषये सूचना संकलिता । भारतीयविद्यानां विकासः कदापि नावरुद्ध इति शतशः प्रमाणयति कविराज-मनोषा, तथापि वेदादीनि शास्त्राणि विषयीकृत्य नवीनविचारसरणिः सर्वदैव संभवति । तेन च नवीनप्रश्नस्फोरः सदा सुलभ इत्यर्थं स्पष्टयति दार्शनिकशिरोमणेर्दयाकृष्णस्य वेदविषये समारब्धो लेखः । तथैव चान्ये लेखा एतद्धियैव विशेषांके प्रकाशिताः ।

मन्ये, म. म. गोपोनाथकविराजेभ्यः श्रद्धाञ्जलिसमर्पणपरोऽयं विशेषाङ्कस्तद्विचारसूत्रप्रकाशनाय तद्दर्शितपथा शास्त्रचिन्तनाय, साधनानुभवस्य परमाद्वैतभावनया च राष्ट्रस्य विश्वस्य चैक्यमापादयिष्यति येन शस्त्रास्त्रसंघर्षविषमेऽस्मिन् संसारे विश्वशान्तिपन्थाः सुप्रकाशः स्यात् ।

श्रद्धा-प्रणामाञ्जलिः

वाग्देवता वचसि तेजसि यस्य भानुः
प्रज्ञातले सुरगुरुर्धनदः प्रसादे ।
कोपे यमो दृशि रमा रमते स गोपी-
नाथो जयत्यखिलदेवमयो मनस्वी ॥१॥

किं वाणीविभवः प्रसादितभवः सारस्वताम्भोनिधिः
किं वा तन्त्रमयी प्रभा समुदिता लोकोत्तरा शाश्वती ।
साक्षात् स्वीकृतविग्रहः किमथवा सर्वोपकारेच्छया
गोपीनाथ इहागतः स्वयमहो नारायणो भूतले ॥२॥

क्षेत्रं क्षेमाङ्कुराणां यमनियमवतामातपत्रं श्रुतीनां
मूर्तिः सत्साधनाया गुरुचरणजुषां पूर्तिराराधनायाः ।
निस्त्रैगुण्ये परस्मिन् प्रमहसि च पदे राजतां पुण्यधामा
श्रीगोपीनाथनामा सकलसुकृतिनामग्रणीराप्तिकामः ॥३॥

सद्वस्तूपहिता प्रसीदतितरां नूनं क्रिया सर्वदे-
त्युक्तिर्यत्र विदांवरे फलवती जाता प्रसादाद् गुरोः ।
विद्यावैभवभूषिताय भुवने ख्याताय तस्मै मुदा
गोपीनाथमनस्विने सुकृतिने श्रद्धा-प्रणामाञ्जलिः ॥४॥

—डॉ० जगन्नारायणपाण्डेयः

श्रद्धाञ्जलिः

(१)

जातो बंगालदेशे प्रमुदितवदनो धर्ममार्गोपदेशी
तन्त्रे मन्त्रे च यन्त्रे हिमगिरितनुजा-चालिते शास्त्रसारे ।
यो विद्वानागमानां सकलगुणनिधिस्तत्त्ववेत्ता विधिज्ञो
गोपीनाथस्य तस्य प्रविदितयशसः श्रेयसे स्याच्छताब्दी ।।

(२)

आयातो बाल्यकाले जयपुरनगरे ज्ञान-जिज्ञासया यः
स्थित्वा सम्बन्धिगेहे सुपठितमखिलं येन विज्ञेन शास्त्रम् ।
लब्धा कीर्तिः पृथिव्यां जयपुरनगरं येन सम्मानितञ्च
गोपीनाथस्य तस्य प्रभवतु कृतिनो मोददात्री शताब्दी ।।

—कृष्णलाल शुक्लः

गोपीनाथ-गीताञ्जलिः

—डाँ० शिवदत्तशर्मा चतुर्वेदः

श्रीमद्गोपीनाथं कविराजं राष्ट्रसद्वन्द्यम् ।
महामहोपाध्यायं विद्वन्मान्यं सदा वन्दे ।।१।।

वङ्गे प्रादुर्भूतं जयपुरनगरे विहितविद्यम् ।
वाराणस्यामस्यां विहिततपस्यं सदा वन्दे ।।२।।

संस्कृतजगति तथैवागमतन्त्रेऽथ साधनाऽकाशे ।
भास्वन्तमेव पूर्णं शुभ्रयशोराशिराजितं वन्दे ।।३।।

अस्मत्पितृ[1]—सदृक्षाणामप्युपदेश-पाण्डित्यम् ।
वार्धक्ये बिभ्राणं गोपीनाथं सदा वन्दे ।।४।।

वैदेशिकेऽपि विद्वत्संघे सर्वत्र संपूज्यम् ।
नाना-भाषा-निपुणं वन्दे सारस्वतं तेजः ।।५।।

जंगम-पुस्तक-मन्दिरतामेकां साधु बिभ्राणम् ।
कण्ठे धारित-विद्यावैभवमसमं विभास्वरं मन्ये ।।६।।

आनन्दमयी[2]—निकटे सर्वां शिशुतां विधारयन्तं तम् ।
काश्यां विहितावासं बृहस्पतिं को न जानीयात् ।।७।।

विश्वस्मिन् सर्वोच्चा संस्कृतसंस्था[3] विराजते काश्याम् ।
तस्या अध्यक्षत्वं गोपीनाथः सनाथितवान् ।।८।।

सेवावधि-प्रपूर्तेरनेक-वर्षात् प्रपूर्वमेव ननु ।
अवकाश-ग्रहणेन च व्यक्तीकृतमेव निःस्पृहं तेजः ।।९।।

जयपुरनगरे यदिदं सुविशालं पुस्तकागारम्[4] ।
तस्य समस्ता ग्रन्था वितीर्णतामापुरेतस्मै ।।१०।।

---

१. स्वर्गीयाः म.म.पं. गिरिधरशर्माणश्चतुर्वेदाः

२. सुविख्याता माता आनन्दमयी

३. आधुनिकः संपूर्णानन्द-संस्कृत-विश्वविद्यालयः

४. पब्लिक लाइब्रेरी

भगवत्यपि सा देवी सरस्वती स्वीयवरदानैः।
यशसा दीपितमेनं मनसा सम्यक् प्रसादयामास ।।११।।

संपूर्णे संसारे विद्वत्संघैः समादृतः सततम्।
यशसा धवलितविश्वः श्रीगोपीनाथकविराजः ।।१२।।

प्राच्य-प्रतीच्यविद्या—निष्णातेष्वाद्य—गणनीयः।
श्रद्धा-भार-विनम्रः श्रीगोपीनाथकविराजः ।।१३।।

तादृशमनीषिवर्यस्य च दिव्या लोक[1]यात्रेयम्।
दिव्ये जीवनमार्गे संप्रेरयते मनीषिमूर्धन्यान् ।।१४।।

तन्त्रशिखरमारूढं लोकान्तर-नित्यसंचरणशीलम्।
स्वामिविशुद्धानन्दं संसेवितवान् सुदृढभक्तियुतः ।।१५।।
[2]तान्त्रिकवाङ्मयमध्ये शाक्तां दृष्टिं विवेचयन् सोऽयम्।
[3]भारतसंस्कृतिहृदये साधनमार्गं विलेखयामास ।।१६।।

वेदान्त-प्रमुखानां दर्शन-विश्रुत-विचाराणाम्।
मर्मोद्घाटन-निपुणो नानाग्रन्थान् समर्पयति ।।१७।।

वाराणस्या विद्वत्परंपरा-प्राप्तमितिहासम्।
गम्भीरान्वेषणसद्विधया नूनं प्रकाशयति ।।१८।।

सरस्वती-भवनाख्ये पाण्डुलिपीनां महागारे।
स्थित्वा पुरातनानां ग्रन्थानां सत्प्रकाशनं कुरुते ।।१९।।

तत्र सद्-ग्रन्थानां विभिन्न—विषयान्वितानां च।
प्राक्कथनेषु गभीरान् सिद्धान्तान् संविवेचयामास ।।२०।।

विश्वविमोहक—सुषमामण्डितवङ्गीय—भाषासु।
नाना—साधक—चित्रं नैकैर्ग्रन्थैर्विरचयामास ।।२१।।

बौद्धानां सिद्धान्तान् सूक्ष्मेक्षिकया निभालयन् निखिलान्।
आचार्यनरेन्द्रदेव—ग्रन्थ[4]—प्राक्कथन—मण्डितानकरोत् ।।२२।।
महामहोपाध्यायेत्याङ्ग्लसम्राट्समर्पितोपाधिम्।
स्वीकृत्य सर्वविद्वत्संमान्यत्वं चिरात् प्राप्तः ।।२३।।
स्वातन्त्र्यानन्तरमपि भारतराष्ट्रस्य राष्ट्रपतिः।
संमानितवानेनं स्वतन्त्रता—दिवसमालक्ष्य ।।२४।।

---

१. मनीषी की लोकयात्रा (प्रकाशित ग्रन्थ)

२. तान्त्रिक वाङ्मय में शास्त्रदृष्टि

३. भारतीय संस्कृति और साधना

४. बौद्ध दर्शन—आचार्य नरेन्द्रदेव

नव्यैरुपाधिदानैर्यदा सुसम्मानमारब्धम् ।
पद्मविभूषण-नाम्नोपाधिं तत्रापि भूषयामास ॥२५॥

[1]आनन्दकाननेऽस्मिन् ज्ञानाख्यं यज्ञमातन्वन् ।
साधक—निजस्वरूपे निखिलं कालं समर्पयामास ॥२६॥

सम्प्रार्थितोऽपि बहुधा न स्वीकृतवान् पदं कुलाधिपतेः ।
संस्कृतविश्वक—विद्यालयमध्ये स्वात्ममार्गस्थः ॥२७॥

तस्य च नित्यं सविधे देश—विदेशस्थिताः सन्तः ।
नानाप्रश्नान् स्वीयानुत्तरदानाय संस्थितांश्चक्रुः ॥२८॥

आध्यात्मिकीं सुदीप्तिं पुञ्जीभूतां स्वनेत्राभ्याम् ।
विकिरन् मन्दैर्हास्यैर्लास्यमिव क्रीडयामास ॥२९॥

सन्तोषितसद्विद्यः सारस्वतवैभवैर्हृद्यः ।
सर्वाऽविद्याकाराविनिर्गतः पूर्णतां यातः ॥३०॥

सत्य-शिव-सुन्दराख्ये धामनि नित्यं सुविश्रान्तः ।
एतत्साधनमार्गेऽग्रेऽग्रे पर्याप्ततामागात् ॥३१॥

सर्वत्रैव व्याप्तं मूलं तत्त्वं समन्विष्यन् ।
शक्तेर्विराट्स्वरूपं तन्त्रग्रन्थेषु दर्शयामास ॥३२॥

कांचनवर्णो नित्यं सौम्यैर्भावैः प्रपूरितस्वान्तः ।
बालसुलभजिज्ञासाभरितो दृश्यः सदैव कविराजः ॥३३॥

नानाभाषाऽभिज्ञो नानासाहित्यनिष्णातः ।
नानाविषयविलेखननिपुणः सौम्यत्वलालितश्चासीत् ॥३४॥

सिद्धस्वभावपूजापूजितकायो विगतमायः ।
सिद्धैरभीष्टदायः सिद्धसमासेवितच्छायः ॥३५॥

वाराणस्यामन्तिममहामहोपाध्यायतां यातः ।
सर्वेऽङ्गीकृत—विषयेऽन्तिमभावं सर्वथा प्राप्तः ॥३६॥

वादो जल्पस्तावत्क्वापि वितण्डा मता विज्ञैः ।
विदुषां त्रिधारया ननु वहते वैचारिकी गंगा ॥३७॥

निर्भ्रान्ताः सिद्धान्ता व्याख्यायन्तेऽनुकूलसत्तर्कैः ।
यत्र विवेचननिपुणैर्वादोऽयं कथ्यते विनाऽयासम् ॥३८॥

यत्र परस्परविमुखे विचारसंचारसाम्राज्ये ।
एकं स्वमनसि कृत्वाऽन्यखण्डनं जल्प एवाऽसौ ॥३९॥

---

१. काश्याम् ।

यत्र तु खण्डनमात्रं लक्ष्यं स्यादभिनिविष्टानाम् ।
स्वीयाभिमतं गुप्तं तिष्ठेत् सेयं वितण्डा स्यात् ॥४०॥

वादाख्ये शुभधामनि कापि तपस्या सदा साध्या ।
सिद्धान्तेषु भ्रान्तिर्नूनमियं दूरतः कार्या ॥४१॥

महदध्ययनं चैतत्कर्मणि नियतं भवेत् सम्यक् ।
मानससाक्षात्कारः सिद्धान्तानां भवेदनिशम् ॥४२॥

सोऽयं ऋषिशब्दार्थः साक्षात्कारावसायिता दीप्तः ।
निखिलं जीवनमेतत्स्वल्पीभूतं भवेद्यत्र ॥४३॥

अङ्गुलि-गणनीया वा तादृश-भावान्विता लोके ।
दृश्यन्ते ऋषिभावैरलंक्रियासंगताः पुरुषाः ॥४४॥

श्रीमान् गोपीनाथो धन्यतमस्तेषु गणनीयः ।
वादे वादे येषां निर्मलभावेन जीवनं याति ॥४५॥

सा पुण्यमयी धारा गोपीनाथप्रवाहिता जयति ।
नानाज्ञानपिपासाऽकुलितान् या तर्पयति कामम् ॥४६॥

शाक्तागमतन्त्राणां दुरूहता या समादिष्टा ।
गोपीनाथवरेण्यैस्सेयं हृदये समानीता ॥४७॥

मौनमयैर्व्याख्यानैरपि येऽन्तःकरणसंशुद्धिम् ।
तन्वन्ति स्म नितान्तं ते गोपीनाथ-कविराजाः ॥४८॥

मनसा च वाक्-शरीरैः परोपकारे नितान्तसंलग्नाः ।
वन्दित-दिव्य-चरित्रास्ते गोपीनाथ-कविराजाः ॥४९॥

मन्त्राणामावर्तनमेतेषां सिद्ध-भावेषु ।
सत्प्रेरणां प्रसूते कृत्स्नस्यापीह विश्वस्य ॥५०॥

अमृतोदधि-स्वरूपां तेषां स्मृतिमात्मदेहस्थाम् ।
वन्दामहे नितान्तं नम्रतमैः स्वैर्मनोभावैः ॥५१॥

—साहित्यविभागः—संस्कृतविद्या-धर्मविज्ञानसंकायः,
बी, ३/१ एफएफ,
काशी-हिन्दू-विश्वविद्यालयः, वाराणसी

सूर्यविज्ञानस्य प्रयोक्ता दीक्षागुरुः

यतिवरो विशुद्धानन्दः

—डॉ० हिन्दकेसरी

अस्यां शताब्द्यां भारतीयेषु मनीषिवर्येषु यैः लोकस्य आश्चर्यकरं प्राचीनमार्षं सूर्यविज्ञानं प्रत्यक्षतामुपनीतम्, तेषां प्रातःस्मरणीयानां म. म. गोपीनाथकविराजमहानुभावानां दीक्षागुरूणां परिचयः प्रसङ्गानुरूप इति यथामति यथाश्रुतमुपनिबध्नामि।

एतेषां यतिवराणां पूर्वाश्रमस्य भोलानाथेति संज्ञाऽभूत्, जन्मभूमिश्च पश्चिमवङ्गप्रदेशे वर्धवानमण्डले गुशकराग्रामः। जन्मनश्चतुर्दशे वर्षे अलर्केण (मत्तेन शुना) इमे दष्टाः। तस्मिन् कालेऽस्य विषस्य तादृशी चिकित्साव्यवस्था नाभूत्, अस्य विषस्य प्रभावेण जनाः प्रायः उन्मत्ततामनुभूय मरणमेव प्राप्नुवन्ति स्म। आत्मनस्तथा मृत्युं निश्चित्य गङ्गायां निपत्य प्राणत्याग एव ततो वर इति निश्चित्य आत्मनो हननार्थं गङ्गातटं सम्प्राप्ताः। तत्र इमे साश्चर्यमपश्यन् कश्चित्संन्यासी गङ्गामध्यादुत्तिष्ठतीति तेन सहैव जलमपि स्तम्भवद् उपरि उत्तिष्ठतीति। तथा स्नात्वा अयं महात्मा अस्य बालकस्य समीपमाजगाम, अप्राक्षीच्चैनम्—किम् निमज्जितुं प्राप्तोऽसि ? बालकेन आत्मनो दुःखं प्रकाश्य उक्तम्—अनेन कष्टपूर्णेन जीवनेन मम मृत्युरेव ज्यायान् इति। असौ महात्मा बालकस्य शिरसि हस्तं न्यस्तवान्, तस्य स्पर्शमात्रेणैवास्य शरीरं शीतलमभूत्, अनन्तरं च सन्यासिना उक्तम्–'गृहं गम्यताम्' लघुशङ्कायाः जलेन सह सर्वं विषं बहिरायास्यति। बालकोऽसौ प्रार्थनापूर्वकमुवाच–भवता मम शरीररक्षणं कृतम्, परमार्थमार्गमपि उपदिशतु। संन्यासिना प्रोक्तम्—'नाहं भवतो गुरुः, किन्तु भवतस्तथा मतिश्चेत् तर्हि गुरुस्थानं दर्शयिष्यामि, एतदर्थम् भवता मातुराज्ञा गृहीतव्या। गृहमागतं मृत्युमुखादुद्धृतं बालकं ज्ञात्वा मात्राऽनुमतोऽयं संन्यासिनमनुसृतवान्। स संन्यासी आकाशमार्गेणामुम् अष्टभुजापर्यन्तं निनाय। तत्र सप्ताहपर्यन्तं निर्जने उषित्वा हिमालयस्थं विज्ञानस्य योगशिक्षणस्य च केन्द्रं ज्ञानगञ्जस्थं स्थानमनयत्। स्थानमिदं कुत्रचित् तिब्बतक्षेत्रे स्थितम्, मार्गश्चास्य जलन्धरनगरात् (पञ्चनन्द प्रदेशे) गच्छति। कश्मीरमार्गेणापि गमनं भवति।

इयं सिद्धभूमिः जनसामान्यगोचरा नास्ति, तत्रत्या निवासिनो यात्रिणः संन्यासिनोऽपि तद्विषये न जानन्ति। बहवोऽन्वेषणरता आश्रमान्वेषणे व्यर्थपरि-

श्रमास्ततः प्रतिनिवृत्ताः। जनसामान्यस्य कृते रहस्यभूतमेवैतत्। आश्रमस्याधिकारिणामिच्छामनुमतिं च विना तत्र प्रवेशो दर्शनं वा न लभ्यते। तत्र बहवो योगिनः, विज्ञानवेत्तारः, शिक्षार्थिन आचार्याश्च निवसन्ति। अस्य आश्रमस्य अधिष्ठाता भृगुरामः, अस्य महात्मनो वयः तस्मिन्काले अष्टशतं वर्षाणि अभूत्, एतेषां गुरवः महातपा इति नामधेया, तेषां तु वयः १५०० वर्षाणि इति प्रसिद्धिः। एतेषां शरीरमलौकिकमेव। तत्राश्रमे मनोहरतीर्थे राजराजेश्वरीमठे परमगुरुणामवस्थितिः। तत्राश्रमे सप्ता दिनानि न्युष्य परमहंसमहानुभावेनाज्ञप्ताः स्वामिनीमानन्दस्वामिनः बालकमिमं राजराजेश्वरीमठं नीतवन्तः। अत्रैव मठे महातपसा गुरुणा दीक्षितोऽभूदयं बालकः, अनन्तरं तत एवायं विशुद्धानन्देति संज्ञामलभत।

तत्रैव ज्ञानगञ्जे परमहंसश्यामानन्दात् प्रकृतिविज्ञानस्य शिक्षा गृहीता, अनेन विज्ञानेन सहैव नूतनानि विज्ञानानि तेषां प्रयोगादिविषयश्च विज्ञाताः। आश्रमनियमाननुरुध्य तत्राश्रमे द्वादशवर्षाणां ब्रह्मचर्यम्, चतुर्णां च संन्यासः, चतुर्णां वर्षाणाञ्च परमहंसत्वमेभिरनुभूतम्। आहत्य विंशति–वर्षाणि तत्र यापितानि, अध्ययनसमाप्तौ परीक्षाऽभूत्। परीक्षाया अपि कश्चन विलक्षण एव क्रम आसीत्, आश्रमसञ्चालकस्य भृगुरामपरमहंसस्य शिरसि सहस्रदलकमले स्थितेन शिवलिङ्गेन परीक्षाऽभूत्। अनन्तरं च गुरोराज्ञामनुश्रित्य अनिच्छताऽपि विशुद्धानन्देन गृहमागत्य पूर्णत्वलाभाय गार्हस्थ्यं स्वीकृतम्। जीविकोपार्जनार्थं च वैद्यवृत्तिः स्वीकृता। अत्रैव गृहे गुरोराश्रमादानीतं शिवलिङ्गं भोलानाथेश्वरनाम्ना संस्थापितम्।

भार्यायाः मृत्युपर्यन्तम् एतेषां तीर्थस्वामिदशा आसीत्, ततः परमहंसावस्था पुनरप्यधिगता। ज्ञानगञ्जस्थेन आश्रमेण सम्पर्कश्चैषां यावज्जीवमासीत्। ततो वस्तूनामानयनमितः प्रेषणं च देशान्तरस्था अपि इमे सततमकुर्वन्। कयापि अदृश्यशक्त्या आनीतं वस्तु ततोऽपहृतं च जना अपश्यन्। श्रीमतां कविराजमहानुभावानां बहूनि तद्विषयकसंस्मरणानि सन्ति।

संन्यासिनश्चर्यानुरूपं कलकत्ता-जगन्नाथपुरी-काशीप्रभृतिनगरेषु ज्ञानगञ्जक्षेत्रादधिगतस्य विज्ञानस्य प्रचारादिकं कुर्वद्भिः विशुद्धानन्दयतिभिः भारतीयविद्यानां योगस्य च सत्यत्वं पुनः प्रतिष्ठापितम्। प्रत्यक्षवादिनः खलु इमे आसन्, योगिदृष्टौ किमपि अप्रत्यक्षं न भवति। अनेकत्र भक्तानां पुरस्ताद् योगविभूतीनां प्रदर्शनमपि अनेकधाऽकारि। प्रायः संवत्सरे षण्मासात्मकं कालं काश्यामेव ते यापयन्ति स्म। वाराणस्याम् आश्रमद्वयम् अद्यापि भक्ताः पश्यन्ति। प्राचीनं हनुमद्घट्टे नवीनं च काशीविद्यापीठस्य समीपे मलदहियाक्षेत्रे विशुद्धानन्दकानननामधेयम्। अत्राश्रमे सूर्यविज्ञानमध्यापयितुं सूर्यरश्मीनामाकर्षणा-

र्थम् एकं मन्दिरं निर्मापितम्, किन्तु ज्ञानगञ्जस्थितैः सिद्धैः लोकेऽस्य ज्ञानस्य प्रचारार्थमनुमतिर्नैव दत्ता।

महायोगिनो विशुद्धानन्दस्य सामर्थ्यमीश्वरस्यैव सामर्थ्यमभूत्। योगिनः सामर्थ्यं ज्ञानं च ईश्वरेणतुल्यमेव भवति। तस्य इच्छा शक्तिरेव भवति, इच्छया स सर्वमपि कर्त्तुं प्रभवति। साधारणजनस्य इच्छा इच्छैव भवति योगिनस्तु इच्छा शक्तिर्भवति। इच्छाशक्तेरपि प्रदर्शनं तैरनेकधा विहितम्। तेषां चमत्कारादिप्रदर्शनविषयः कविराजमहानुभावानां ग्रन्थेषु 'विशुद्धानन्दप्रसङ्ग', 'विशुद्धवाणी' इत्यनयोः ग्रन्थयोर्विस्तरेण वर्णितः। यतिवरं विशुद्धानन्दमधिकृत्य अस्माकं सुहृद्वरेण श्रीमनुदेवभट्टाचार्येण विशुद्धानन्दवैभवमिति महाकाव्यमुपनिबद्धम्, तच्चाद्यावधि अप्रकाशितम्। डॉ० भगवतीसिंह-महानुभावस्य 'मनीषी की लोकयात्रा' इति ग्रन्थोऽपि द्रष्टव्यः। म. म. गोपीनाथकविराजमहानुभावानां यथाविधि मन्त्रदीक्षा हतुमद्घट्टे १८ जनवरी, १९१८ तमे ईशवीये वर्षे सम्पन्ना। प्रायः विंशतिवर्षाणि कविराजमहानुभावानां स्वामिचरणैः सह सम्पर्क आसीत्। विशुद्धानन्दयतीनां शरीरत्यागः ११ जुलाई, १९३७ तमे ईशवीये वत्सरे कलकत्तानगरेऽभवत्।

सूर्यविज्ञाने विशुद्धानन्दयतीनाम् आसीद् विशिष्टोऽधिकारः प्रयोगकौशल्यञ्च। त एवं प्रतिपादयन्ति स्म—सूर्यविज्ञानं सृष्टेः मूलभूतं विज्ञानम्, सूर्यस्य रश्मीनां संयोगभेदेन पदार्थभेदः। एतेषां रश्मीनां पृथक्त्वेन परिचयो दुष्करः, रश्मयो नानावर्णाः, तेषु पूर्वं श्वेतवर्णस्य रश्मेराहरणं क्रियते। अयं श्वेतरश्मिः पदार्थमात्रस्याधारभूतः। अत्र तीव्रतमा आकर्षणशक्तिर्भवति, अस्मिन् विज्ञानेऽस्य पदार्थस्य नाम विशुद्धसत्त्वमिति। यद्यपि रश्मीनां क्षणिकत्वम् किन्तु अस्य विज्ञानस्य वेत्तारः स्थायित्वं तेषु आनयन्ति। अस्मिन् विशुद्धसत्त्वे अन्यरश्मेराहरणं क्रियते, एवं सति आहृतस्य रश्मेरपि स्थायित्वं भवति, अनेनैव क्रमेण पदार्थदशानुरूपं तृतीयचतुर्थादिरश्मीनां तत्र संयोजनं भवति। अन्तिमरश्मिरेव वस्तु अभिव्यनक्ति। रश्मीनां संयोग एव अभिव्यक्तपदार्थस्य उपादानवस्तूनां संयोगः। एवं रीत्या द्रव्यस्य आविर्भावो भवति। यथा रश्मीनां संयोगेन पदार्थस्य उत्पत्तिस्तथैव विभागेन लयोऽपि भवति। विशुद्धवैभवमहाकाव्ये इयं प्रक्रिया अनया रीत्या दर्शिता—

सृष्टिस्तु प्रकृतेर्भवत्यपि समोपादानजातं यदा
श्रीमद्भास्कररश्मिभिः प्रकृतितः सर्वं स्थितं ज्ञायते।
ज्ञात्वाकृष्य विशुद्धसत्त्वफलके तत्स्थापयित्वा क्षणम्
अन्यच्च क्रमशस्तथैव च गृहीत्वाविष्क्रियाद्वस्तुकम्।

—विशुद्धवैभवम् ७ – १

पृथक् पृथक् रश्मीनामाहरणार्थं ते ज्ञानगञ्जाश्रमात् प्राप्तस्य (लेंस) वीक्षाख्यकाचस्य प्रयोगमकुर्वन्। अनेन विज्ञानेन कस्यापि वस्तुनो निर्माणं

तेषां वामहस्तकौशलमभूत्। कस्यापि सुगन्धस्य आहरणम्, वस्तुनो वस्त्वन्तरे परिवर्तनमनेकधा तैः प्रदर्शितम्। अनयैव रीत्या चन्द्रविज्ञानं, वायुविज्ञानं, शब्दविज्ञानं स्वामिपादानां विद्यासु अवर्तन्त।

इतः परं योगस्य विभूतयोऽपि एतेषां वश्या एवाभवन्। यदा विज्ञानेन किमपि वस्तु निर्मीयते तदा तस्य उपादानं बाह्यमेव भवति, यदा तु योगविभूत्या किमपि वस्तु निर्मीयते तदा किमपि बाह्यमुपादानं नैवोपादेयं भवति। इच्छाशक्त्या (चैतन्येन) एव कार्यं सम्पाद्यते तदेवोपादानं भवति। विस्तरश्चास्य विषयस्य कविराजग्रन्थेष्वेव द्रष्टव्य इति।

—प्राध्यापकः
केन्द्रीय-संस्कृत-विद्यापीठं, जयपुरम्

भारतीयो न शोभते

—वैद्यः रामस्वरूपशास्त्री

(१)

अधीतिः बहुभाषासु सकलासु कलासु च।
अन्तरा संस्कृतज्ञानं भारतीयो न शोभते॥

(२)

अर्जितं विपुलं ज्ञानमर्जितास्ता उपाधयः।
नार्जितं संस्कृतज्ञानं भारतीयो न शोभते॥

(३)

विज्ञानं चैव साहित्यं दर्शनं सार्वदैशिकम्।
अन्तरा संस्कृतज्ञानं परिपूर्णं न जायते॥

रसः सौन्दर्यञ्च

[म. म. गोपीनाथकविराजमहोदयानामनेके महत्त्वपूर्णनिबन्धाः साहित्यसंस्कृत्यादिसम्बद्धविषयविवेचनपराः 'भारतीय संस्कृति और साधना' शीर्षके ग्रन्थे संकलिताः प्रकाशिताश्च सन्ति। तेषामेकस्य निबन्धस्य भावानुवादोऽत्र प्रस्तूयते। —**सम्पादकः**]

सौन्दर्यमुद्दिश्य किमपि वक्तव्यं चेत् तर्हि सर्वतः प्राक् रसस्य विषये किमपि कथनमावश्यकम्। जगत् रसमधिगन्तुं समुत्सुकम्। स कथं प्राप्येत ? कुत्र वा प्राप्येत इति केनापि न विदितम्। भ्रमरः गुञ्जन् पुष्पात् पुष्पं प्रयाति, योगी योगमग्नः, भोगी भोगविलासे व्यासक्तः, नराः स्त्रियं कामयन्ते, पुत्रात् स्नेहमिच्छन्ति, यत्रापि सौन्दर्यमवलोकयन्ति तत्रैव सत्वरं गच्छन्ति—सर्वेऽपि रसपिपासवो वर्तन्ते रसलोभात्समेऽपि चञ्चलाः। को ह्यन्यात्कः प्राप्यात् यद्येष आकाश आनन्दो न स्यात्—रस एव सारस्वरूपः स एव सत्यस्वरूपः।

नियतमेव एकदा निखिलं जगत् रसपानेन मत्तमजायत, अनन्तरं नियत्याः प्रेरणया तत् तस्या अवस्थायाः प्रच्युतमभवत्। योगभ्रष्टः संसारः अद्यत्वे तमेव कामयमानस्तस्यैव पुनः प्राप्त्याशया मणिविगलितो भोगीव व्याकुलो वर्तते। प्रश्नोऽयमत्र समुदेति यद् यदि रसः केनापि अनास्वादितपूर्वस्तर्हि तस्य विषये कथं साकांक्षा जनाः ? परं यदि जीवनस्य गतास्ववस्थासु दृष्टिपातः क्रियते तर्हि सर्वैरेतत्स्वीकरणीयं यत् कदाचित् कुत्रचित् वा सर्वैरेव रसस्यानुभवः अवश्यं कृतः। रम्यताप्रतीतिः सौन्दर्यानुभवः आनन्दोपलब्धिश्च सर्वेषां जीवने परमावश्यकरूपेण समायान्ति। अतः रसं प्रति उपलिप्सा नितरां स्वाभाविकी। परन्तु चिन्त्यमिदं मतम्। यथा हि यदि पूर्ण आनन्दः पूर्णं सौन्दर्यं, पूर्णं प्रेम च केनचित् नास्वादितन्तदा तस्य कृते तृष्णा कथमुत्पद्येत। वस्तुतः असीमितमिदं सौन्दर्यं, अनन्तं प्रेम, निरवच्छिन्न आनन्दः पूर्वं नियतमुपभुक्तः। अत एव तस्य आकांक्षा समुदेति। किन्त्विदमुपपन्नं यद् यदा सौन्दर्यमिदमस्माभिरास्वादितं तदा कालो न आसीत् यत्रेदमास्वादितं तत्र देशस्यावस्थितिर्नासीत् सास्माकं योगावस्थामेलनं वावर्तत। तदनन्तरं वर्तमानावस्था योगभ्रंशः विरहो वा। वयं पुनस्तं योगं वाञ्छामः तद्धेतोः पर्याकुलाः स्मः। सौन्दर्यस्य यः पूर्ण आस्वादः वृत्तिरूपे स एव विभक्तो भवति। वृत्त्या च यस्य सौन्दर्यस्य बोधो भवति तत् खण्डसौन्दर्यम्, परिच्छिन्न आनन्दः। पूर्णं सौन्दर्यं स्वयमेव स्वं प्रकटयति तदन्येन प्रकटयितुमशक्यम्। वृत्त्या च यस्य सौन्दर्यस्याभासः प्रस्फुटितो भवति तत् सापेक्षं, परतन्त्रं, कालान्तर्गतञ्च। पूर्णं

सौन्दर्यं तद्विपरीतम्। पूर्णसौन्दर्यस्य छायामादाय खण्डसौन्दर्यं प्रकटितं भवति।

तत्त्वतः पूर्णसौन्दर्यं खण्डसौन्दर्यञ्चैकमेवास्तेतराम्। यत् सौन्दर्यं बहिर्वर्तते तदेव अन्तर्विद्यते, यत् खण्डसौन्दर्यमिन्द्रिय-द्वारे वृत्तिरूपेण विराजते तदेव पूर्णसौन्दर्यं रूपेऽतीन्द्रियभावेन नित्यं प्रकाशते। पाटलपुष्पे यत्सौन्दर्यं तदेव पूर्णसौन्दर्यम्, शिशोः प्रफुल्लितमुखकमले या शोभा सापि तदेव पूर्ण-सौन्दर्यम्। अत्रेदं विचार्यते यत् पूर्णसौन्दर्यस्य बोधोऽस्पष्टरूपेण सर्वैरेवोप-लभ्यते किन्तु अस्पष्टता एव अतृप्तिकारणम्। वृत्त्या अस्पष्टस्यास्य स्पष्टी-करणञ्जायते। यच्छायया समं तत् स्पष्टरूपेणावभासते।

विकसितमेकं पाटलकुसुममस्माकं दृष्टिमावर्जयति। तस्य सौन्दर्यं वय-मनुभवामः। परन्त्वस्यानुभवस्य विश्लेषणे कृते केचन प्रश्नाः समुदयन्ति। तत्सौन्दर्यं क्वास्ते ? किन्तत्सौन्दर्यं पाटलकुसुमे उत अस्माकं हृदयेषु ? अथवा उभयत्र ? किञ्च तस्यानुभवस्य स्वरूपं वर्तते ?

आपातत इदं प्रतीयते यदेतत्सौन्दर्यं न पाटलकुसुमे। यदि तत्र तस्या-वस्थितिर्भवेत् तर्हि सर्वेस्वपि पाटलकुसुमेषु सौन्दर्यं स्यात्। किन्तु सर्वे तेषु सौन्दर्यन्न पश्यन्ति। यदि तत् केवलं द्रष्टरि वर्तेत तदा स सर्वं वस्तु सौन्दर्यपूर्णं पश्येत्। अतः सौन्दर्यं न पाटलकुसुमे नापि च द्रष्टरि। परं यदा द्रष्टा पाटल-प्रसूनञ्च साम्यावस्थापन्नं जायेते तदा केवलं सौन्दर्यमेव स्वप्रकाशमान-सौन्दर्यमेव विद्यते। तदेव पूर्णं सौन्दर्यं यस्मिन् भोक्ता भोग्यञ्च उभेऽपि नित्यसम्भोगरूपेण वेविद्येते।

वृत्तिद्वारा सौन्दर्योपलब्धिः कथं जायते ? तद्धि यदा कस्यापि विशिष्टवस्तुनो वयं प्रत्यक्षं कुर्मस्तदा तद्वस्तु अस्माकं चेतसि विद्यमान-मावरणमपाकरोति। चित्तन्तु पूर्णसौन्दर्यावभासमयम्, किन्तु सोऽवभासः आवरणेनावृत इति कृत्वा अस्पष्टः। आवरणं चित्तमेकदा समावृणोति, किन्तु तस्यावरणस्य भेदं विधायैव तत्र ज्योतिस्फुरणञ्जायते। एष आंशिक आवरणनाश एव वृत्तिज्ञानम्।

अस्मिन् जगति द्वयोः वस्तुनोः पूर्णतः साम्यं न भवति। प्रत्येकं वस्तुन एकः स्वभावः एकञ्च व्यक्तित्वम् एका च विशिष्टता, तत्सर्वं भिन्न-मेव। किन्तु सत्ता एव ज्ञानम्। यतः प्रकाशमानसत्ता एव ज्ञानम्। अप्रकाश-मानसत्ता आलोकः। ज्ञानं यत् स एव आनन्दः। यतोऽनुकलज्ञानमेवानन्दः सौन्दर्यबोधो वा। प्रतिकूलज्ञानमेव दुःखम्। सत्ता यदा ज्ञानरूपं लभते तदा सा नित्यज्ञानरूपिणी जायते, यदा च ज्ञानमानन्दो जायते तदा सः नित्य-संवेद्यमान आनन्दः। सोऽयं नित्यसंवेद्यमान आनन्द एव रसः। अतः रसस्य

सदा अभिन्नरूपेणास्वादनमेव अखण्डानुभूत्याः स्वरूपम्। नेयं वृत्तिरियं तु रसस्फूर्तिः। अतः रसपदार्थे सत्तायाः ज्ञानस्य चान्तर्निवेशोऽस्ति। रसोऽयं एकः सदप्यनन्तरूपः। सामान्यत्वेऽपि विशेषः। एकस्य विशिष्टरसस्य स्फूर्तिः पुष्पमपरस्य विशिष्टरसस्य स्फूर्तिर्लता। उभयोरास्वादने भिन्नत्वम्। योऽयं रसविशेषः सोऽनन्तः, यतः प्रत्येकस्मिन् व्यक्तौ स्फुरणस्यास्वादनस्य च वैशिष्ट्यं वर्तते। परन्त्वालङ्कारिकैर्योऽयं श्रेणीबद्धः कृतः स केवलं जाति-भेदं लक्ष्यीकृत्य शास्त्रीयव्यवहारस्य सुगमतायै विहितः। यतो हि मधुनो गुडस्य चास्वादे भिन्नता वर्तते, मधुनः आस्वादे लवणस्यास्वादे च विभेदः, तथापि यथा मधुनः गुडस्य चास्वाद एकस्यां श्रेण्यामन्तर्धीयते न तथा मधु-लवणयोः। इत्थमेव आलङ्कारिका रसं विविधश्रेणिषु व्यभजन्। अत एकतः रसा अनन्ताः अपरतश्च रसानां निर्दिष्टा संख्या। मूलतस्तु रस एक एव।

अनन्ता इमे रसा प्रत्येकमवस्थाभेदेन अर्थात् स्थूलमलिनभेदेन द्विधा जायन्ते। प्रत्येकं रसः यदा शुद्धभावेन स्वप्रकाशकः तदैव यथार्थतो रस-शब्देन व्यपदिश्यते। मलिनोऽयं मिश्रितो भवति अतः न स वास्तविको रसः—रसाभासो हि सः। योऽयमेकः शुद्धस्वप्रकाशात्मकरसास्यास्वादः सोऽपि द्विधा—एका-अवस्था चिरस्थायिनी यस्यां प्रविश्य न पुनरावर्तनम्। द्वितीयावस्था स्थायिन्यपि कालावच्छिन्ना यत्रः व्युत्थानसंस्कारस्य प्राबल्येनावतरण-ञ्जायते। उभे अपि स्वच्छे उज्ज्वले च। वस्तुतः उभेऽपि समरूपे। अतः यदा एकं खण्डसौन्दर्यमवलोक्य वयं तस्यानन्दमनुभवामस्तदा तद् विक्षिप्तवृत्त्या आस्वादनम्। क्रमशः यदा वृत्तिः स्थिरतामादधाति तदा केवलमेकमात्रं तत् खण्डसौन्दर्यमेव प्रकाशयति तत् निर्मलमत एव तदत्यन्तं गभीरम्। सा एवै-काग्रभूम्याः प्रज्ञा। तत्र रसस्य स्फुरणम्भवति। रससामान्ये एका विशिष्टा रसव्यक्तिः प्रकटिता जायते। अस्यामवस्थायां तत्खण्डसौन्दर्यं स्वीयेनालोकेन स्वं प्रकाशयति। भोक्ता भोग्यञ्च स्वसंवेद्यमानसम्भोगे एकाकाररूपेणाव-तिष्ठतः। किन्तु अस्यामवस्थायां चिरकालिकी स्थितिर्नास्ति, योगानन्तरं पुनर्वियोगो भवति। मेलनानन्तरं विरहो जागर्ति। अतः विशिष्टरसस्फूर्तेः शुद्धावस्थापि कालातीता कालावच्छिन्ना चेति द्विप्रकारा। येन उपायेन काल-स्यातिक्रमणं विधीयते तस्य साफल्येन स विशिष्टो निर्मलास्वाद अबाधितो वर्त्स्यति। परं रससामान्यं रसविशेषस्य बाधकन्नास्ति। समान्ये विशेषे च न कोऽपि विरोधः। विशेषेऽपि सामान्यमनुबद्धम्।

केचन कथयन्ति यद्रसे विशिष्टत्वमारोपितो भेदः, स्वगतभेदो नास्ति। रस एक एव केवलमुपाधिभेदेन तत्रागन्तुकभेदस्य प्रतीतिर्जायते। परमिदं न विचारसहम्। रस एक एवेति सत्यम्, परं रसा अनेका इति कथनमपि न मृषा। विभावानुभावादिवैचित्र्यवशाद्रसा अपि विचित्राः। यथा घटाकार-विरहितं घटज्ञानमकल्पनीयन्तथापि अखण्डज्ञानं निर्विषयकं तथैव विभावादि-

विरहितः खण्डरसः अकल्पनीयः, तथापि रससामान्ये विभावादीनां नास्त्यवकाशः। यत्र रसस्फूर्तिर्जायते तत्रापि विभावादयो वर्तन्ते परन्ते अभिन्नरूपेण रसस्याङ्गानि प्रतीयन्ते। विशिष्टोऽयं रसः। यदा विशिष्टरसस्य स्फुरणम्भवति तदा रससामान्यस्यापि स्फुरणञ्जायते। अर्थात् रसस्फुरणे सामान्यांशो विशेषांशश्च परस्परं मिलितौ। यथा सुवर्णं कुण्डलं च। एकेन विशिष्टप्रकारेण सम्पादितं सुवर्णं कुण्डलमिति निगद्यते। उभयोस्तादात्म्य-सम्बन्धः। यदा वयं कुण्डलं पश्यामस्तदा सुवर्णमपि पश्यामः। तथैव यदा विशिष्टो रस आस्वाद्यते तदा सामान्यरसस्यापि आस्वादनञ्जायते। सामान्यमाश्रित्यैव विशेषस्य स्फुरणं भवति, आधारमाश्रित्यैवाधेयः स्फुरति, एवमुपादानस्याश्रयणेनैव कार्यस्य स्फुरणं जायते। किन्तु एतद्विपरीतन्न तथा। यतो विशेषरहितं सामान्यं, आधेयहीन आधारः, कार्यशून्यमुपादानञ्च न प्रतीतिविषयमावहन्ति।

रसमात्रमेव नित्यसिद्धं तत्कदापि न साध्यम्। परं वृत्त्यधीनत्वेन अव्यक्तन्तत्। अभिव्यञ्जनसामग्री तस्यावरणमपाकृत्य नित्यसिद्धरसस्यैवोद्बोधनं विदधाति। उद्बोधनवेलायां अभिव्यञ्जका अपि रसे एवान्तर्हिता भवन्ति। रसो यद्यपि एक एव तथापि तस्मिन्ननन्तवैचित्र्यरूपा शक्तिः, सा च यदा कदा प्रस्फुटिता भवति। अथवा प्रस्फुटितन्तत् वैचित्र्यमात्मनि लीयते तदेवास्य स्वातन्त्र्यम्।

सौन्दर्यतत्त्वस्य साधना तदैव यथार्था सिध्यति यदा रससाक्षात्कारो जायते। जीवः शुद्धः चिच्छक्तिः तटस्थरूपेण विद्यमानोऽपि वैशिष्ट्ययुक्तो दर्पणवत् स्वच्छो वर्तते। तस्योपरि अनन्तविधसौन्दर्यस्य छायायाः कारणात् अनन्तविधविशिष्ट-रसानामास्वादनञ्जायते। इमेऽनन्ता रसा अनन्तप्रकारा यतः जीवानां संख्याप्यनन्ता। प्रत्येकस्मिन् दृष्टिकेन्द्रे सौन्दर्याभासा अनन्ताः, दृष्टिकेन्द्राणामानन्त्येन प्रत्येकमाभासोऽपि अनन्तः। अत्र च जीवस्य विशेषसामान्यरूपयोर्न कोऽपि भेदः। भेदावस्थायामप्यभेदो विद्यते, परमभिभूतत्वेन तस्योपलब्धिर्न जायते। अभेदावस्थायां भेदस्यास्तित्वं तथैव स्वीकरणीयम्। जालन्धरनाथस्य इयमुक्तिरस्मिन् प्रसङ्गे स्मृस्तिपथमायाति—

"द्वैतं वाऽद्वैतरूपं द्वयत उत परं योगिनां शङ्करं वा।"

अर्थात् परमार्थतत्त्वं द्वैतमप्यद्वैतमपि तथापि तत् द्वैताद्वैतविकल्पातीतमास्ते। साम्यभावस्यास्योदयं विना पूर्णा रसस्फूर्तिर्न कल्प्यते। साम्यभावे समुदिते सर्वमेव सुन्दरं दृश्यते सर्वं रम्यं प्रतीयते सर्वान् प्रति प्रेम्णोऽभिव्यक्तिश्च भवति। अहं वा त्वं वेति शब्दौ तस्यामवस्थायामेकार्थस्यैव वाचकौ। औपनिषद्गणः तामात्मारामावस्थां प्रतिपादयति, भक्तगणस्तां पराभक्तिरिति व्यपदिशति। स्वरूपतः अनयोर्न कोऽपि भेदः। इत्थमाह प्रह्लादः—

'नमस्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमो नमः ।'

पूर्वं प्रह्लादः त्वमित्युच्चार्य प्राणमत् तदनन्तरं प्रत्यगात्मभावस्य स्फुरणे लक्ष्यीकृत्याहमिति कथयित्वा नमश्चकार । तदनन्तरमवालोकयत्स यद् यदेव त्वं-पदवाच्यस्तदेवाहं-पदवाच्यः । अतः त्वमहमिति मेलनं कृत्वा उवाच सः । यत्र त्वम्–अहम् इत्यनयोः साम्यभाव उपलभ्यते तत्र त्वमित्युच्चारणेन अहं-पदस्य प्रतीतिर्भवति । अहमित्युक्तवति त्वम् इत्यस्य प्रतीतिर्जायते । एकस्यैव पदार्थस्य उभावपि व्यपदेशौ । इयमेवोपनिषत्प्रतिपादिता वृक्षोपरि समुपविष्टयोः द्वयोः पक्षिणोः कथा—

'द्वा सुपर्णा सयुजा सखाया समानमन्नं परिषष्वजाते' इति ।

जीवेश्वरयोर्भेदाभेदप्रसङ्गे इतः परं कीदृशः स्पष्टोल्लेखो भवितुं शक्नोति । येनास्यामवस्थितयामारोहणं कृतं सः स्वस्यैव रूपे स्वयमेव लीनः । पूर्णसौन्दर्यस्यापारपारावारमवतीर्य केनापि भक्तेन निगदितम्—

'अहो निमग्नस्तव रूपसिन्धौ पश्यामि नान्तं न च मध्यमादिम् ।
अवाक् च निःस्पन्दतमोविमूढः कुत्रास्मि कोऽस्मीति न वेद्मि देव ॥'

भक्तकवेरहंभावः कुत्रापि विलीयते, तदा न वेत्ति कुत्र स वर्तते कश्च स विद्यते इति । सः 'अहम्' इत्यस्य अतिक्रमणं विधाय पूर्णाहन्ता जायते । तदा तत्समक्षं सर्वमप्यपूर्वया सुषमयालङ्कृतं प्रतीयते । तदा 'मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः' इति भावः समुदेति । तदा समेऽपि–त्वम्-अहम्-जगत्-आदिसर्वेऽपि पदार्थाः मधुमयाः प्रतीयन्ते । जगत् सुख-दुःखानन्दादिभिः परिपूर्णम् । निन्दास्तुती माधुर्यपूर्णे, शोभनमशोभनं सर्वमप्येकाकारम् । अन्तर्वा बहिर्वा मधुरं स्रोतः प्रवहति । इयं पूर्णरसबोधस्यावस्थितिः । अत्र मेलनेऽप्यानन्दो विरहेऽप्यानन्दः, हासेऽपिमाधुर्यं रोदनेऽपि माधुर्यम् । निखिलमपि जगत् माधुर्योपेतम् ।

यदहं तदेव त्वम्, पुनः यत्त्वम् तदेव जगत्, अतः यदात्मप्रेमपदेन व्यपदिश्यते तदेव भगवत्प्रेम । भगवत्प्रेम्णः एवापरा दिशा जीवं जगत् प्रति प्रेम वर्तते । मूलं वस्तु एकमद्वितीयञ्च । एक एव पुरुषः उत्तममध्यमप्रथम-भेदेन परिकल्पितः । पूर्णरसस्योद्बोधे जाते अस्यैकस्य अखण्डप्रेम्णः विकासो भवति । अत एवेदं स्वीकरणीयं यत् प्रत्येकं जीवो रसानुभूत्यवसरे तथाविधाया-मेकस्यामवस्थायामवतिष्ठति यस्यामसौ यस्यानन्दस्यास्वादनं विदधाति, अपरोऽपि जीवो रसानुभवकाले तथैव करोति, यतः तस्मिन् क्षणे सोऽपि पूर्णः 'अहम्' वर्तते । अन्यो जीवोऽपि स एव । अयमानन्द एव नित्यसिद्धो ब्रह्मानन्दः ।

स्थिर आनन्दस्य मध्ये नित्यं नवो विचित्रश्चानन्दः स्फुरति । अस्य विशिष्टानन्दस्य द्वारेण भगवता सह जीवस्य गुप्तसम्बन्धो विद्यमानो जायते । इमं सम्बन्धमाविष्कृत्य विशिष्टरसस्यास्वादने एव रससाधनायाः सार्थकता वर्तते । अत एव रसज्ञः सामाजिकगणः निर्विशेषसामान्यात्मकब्रह्मानन्दलाभं रसचर्चायाः चरमफलं न मनुते । स्वायम्भुव आगमे प्रतिपादितम्—

'ब्रह्मानन्दरसादनन्तगुणितो रम्यो रसो वैष्णवः ।
तस्मात् कोटिगुणोज्ज्वलश्च मधुरः श्रीगोकुलेन्द्रो रसः ॥'

ब्रह्मानन्दरसे माधुर्यन्नास्ति, वैष्णवरसे अर्थात् वैकुण्ठाधिपपरमात्मानन्दरूपरसेऽपि माधुर्यन्नास्ति । माधुर्यमेकमात्रं भगवदानन्दरसे एव विद्यते । सख्यस्य वात्सल्यस्यातिक्रमणं विधाय उज्ज्वलरसे एव माधुर्यस्य पराकाष्ठा, वर्तते । अत एव भगवद्भावमप्राप्य न रसास्वादनम् ।

प्रत्येकं जनः सामान्यं ब्रूते–त्वं ममैवासि, केवलममैव । इदं यथार्थतः सत्यम् । परमिदमपि सत्यं यत् सामान्यं समेषां समानं धनम्, कस्यापि नैजं धनन्नास्ति । यथा श्रीकृष्णो राधावल्लभः परं तत्समकालमेव स गोपीमात्रस्यापि वल्लभः । परन्तु रहस्यमेकमत्र, यस्मिन् गुप्तस्वधाम्नि श्रीकृष्णः केवलमेकस्यैव, यदवधि तत्रावस्थितिर्न लभ्यते तदवधि त्वं ममेति कथनन्तु युक्तियुक्तम्, परं त्वं केवलं ममैवेति कथनं कल्पनातीतम् । स्वभावस्यास्य नाम राधाभावः । या गोपी 'अस्मिन् महाभावमयस्वभावे' प्रतिष्ठिता भवति सैव राधा ।

अयं 'पूर्णः अहम्' देशकालाद्यपरिच्छिन्नः प्राकृतिकदेहरहितः, जागतिकनियमेभ्यः परः स्वाधीनभावेन नित्यं विद्यमानो वर्तते । अस्य नास्ति-जन्ममृत्यू, सुख-दुःखे न स्तः, वासना कामना च नैव । अयं पूर्णः 'अहम्' एव रसस्यास्वादयिता, भोक्ता वर्तते । किन्तु भोक्ता, भोग्यं, भोगश्च वस्तुत एक एव पदार्थः । रसस्फूर्तिकाले एतेषां पृथगस्तित्वं न विद्यते । यद्येतेषां पार्थक्यं भवेत्तर्हि रसस्य स्फुरणमसम्भवम् । यथोक्तम्–'भोक्तैव भोगरूपेण सद्य सर्वत्रः-संस्थित' इति । प्रपाणकरसवद् भोक्तादिपदार्थत्रयमनेकत्वमपि एकाकारम्–एकरूपम् ।

रस एवानन्दः, रस एव प्रेमा । अयं भगवतोऽशंभूतायाः ह्लादिन्याः शक्त्याः सारभूतः । अत एव वैष्णवाचार्यैः प्रेम्ण आनन्दचिन्मयरसरूपेण व्याख्या कृता ।

प्रेम्णः यद् आलम्बनं तदनेन प्रेम्णा नित्यं सम्पृक्तम् । आलम्बनं हि आश्रयविषयभेदाभ्यां द्विधा विद्यते । प्रेम्णः विषयालम्बनं सौन्दर्यम् । अत एव

मूलतः प्रेमसौन्दर्ययोरभिन्नत्वेऽपि रसस्फुरणदृष्ट्योभौ नित्यसम्बद्धौ। प्रेम-सौन्दर्ययोः परस्परं व्यङ्ग्यव्यञ्जकभावसम्बन्धो वर्तते। पौर्वापर्यस्य नास्त्यत्र प्रश्नः। सर्वेषु देशेषु कालेषु वा समैरेव विपश्चिद्भिरिदं तत्त्वमुरीकृतम्। यथा शाकुन्तले—

'रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं,
भावस्थिराणि जननान्तरसौहृदानि ॥'

श्लोकेऽस्मिन् महाकविः कालिदासो विशिनष्टि यदस्य सौन्दर्यस्य दर्शनेन चेतसि प्रेम्णः सौहार्दस्य वा स्मृतिर्जागर्ति। कामं सा स्मृतिरस्पष्टा भवेत्, काममबुद्धिपूर्विका वा तथापि सा प्रेम्ण एव स्मृतिः। सौन्दर्ये सुन्दरे, प्रेम्णि प्रेमिके नास्ति भेदः। उभावेव एकरूपौ। धर्मे धर्मिणि च स्वरूपगतो न कोऽपि भेदः, यो ज्ञाता स एव ज्ञानम्, य आनन्दमयः स एवानन्दः, यश्चेतनः स एव चैतन्यम्, विषयोऽपि स एव। श्रद्धायाः निष्ठायाः वा एकमात्रं विषयः सत्यमेव। ज्ञानस्य एकमात्रं विषयः यथा मङ्गलं निश्रेयसो वा, तथैव प्रेम्णः एकमात्रं विषयः सौन्दर्यमेव।

कामे सौन्दर्ये च पारस्परिकसम्बन्धः साहित्यग्रन्थेषु सुतरां विमृष्टः। संस्कृत-साहित्ये यथा कामदेवरत्योः प्राकृतसौन्दर्यकल्पनायाश्चरम उत्कर्ष उपवर्णितस्तथैव ग्रीकसाहित्येऽपि। कादम्बर्यां कुसुमायुधस्य त्रिभुवनाद्भुत-रूपसम्भारत्वेन वर्णनं कृतम्। केवलं नैतावदेव प्रत्युत कामः रूपैकपक्षपाति-त्वेन नवयौवनसुलभरूपेण चोपवर्णितः। पाश्चात्यसाहित्येऽपि कामदेवस्यैव सौन्दर्यकल्पनायामुत्कर्षो दृष्टिगोचरीभवति। येन केनापि कारणेन भवतु, सौन्दर्यं कामस्योद्दीपकं, कामश्च सौन्दर्यस्य प्रकाशकः। वस्तुतः प्रेम्णि कामे च स्वरूपतो न कोऽपि भेदः। एक एव रसः उभयत्र प्रतिपाद्यते। प्राचीनकाले उभे अपि नाम्नी एकस्यैव वस्तुनो वाचकत्वेन प्रथिते। प्रेमैव गोपरामाणां काम इत्यगमत् प्रथाम् इति। श्रीकृष्णस्य बीजमन्त्रं कामबीजम्, गायत्री च कामगायत्री। "कामाद्गोप्य" इति सुप्रथितम्। आगमशास्त्रेऽपि समुपलभ्यते यज्जगत आदिदम्पती कामेश्वरः कामेश्वरी च स्तः। आदिरसः शृङ्गारो-ऽपि कामात्मकः। सर्वेषु तेषु स्थलेषु कामशब्देन प्रेमैव बोध्यते। "कोटि-कन्दर्पलावण्यसाक्षान्मन्मथमन्मथ" इत्यात्मना श्रीकृष्ण एव मन्मथः, स एव आगमोक्ता ललिता सुन्दरी वा। महायोगिनो महाज्ञानिनश्चापि विश्व-मोहिन्या महाशक्त्या अस्याः कटाक्षपातेन विचलिता अजायन्त। कामदेवो-ऽस्यैव कणमात्रं सौन्दर्यमधिगम्य त्रिभुवनं मदयाञ्चकार। सौन्दर्य-लहरीकारः प्राह—

'हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं,
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् ।
स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा,
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥'

इत्थमिदं प्रमाणीभवति यत्कामः सौन्दर्यञ्च रसस्फुरणकाले नित्यमिलितरूपे एव प्रकाशेते ।

देशकालापरिच्छिन्नस्य पूर्णसौन्दर्यस्यास्य साधारणतो विशेषतो वास्वादनं क्रियते । तस्यैव पुनः प्राप्त्यर्थम् ऐन्द्रियजगति वयं विचरामः । अत्र यत्किमपि दृश्यते यत् किमपि श्रूयते यच्चानुभूयते तत् सर्वं परिचितमिवाभाति । तथापि परिचयास्योपरि आवरणमेकं वर्तते । इन्द्रियाणि केवलमांशिकरूपेण क्षणिकरूपेण च तमपाकुर्वन्ति तदैव तत् अयमेवेति परिचाययन्ति ।

यः संसारसुखेन सुखी सोऽपि सौन्दर्यस्य मोहकस्पर्शेन व्याकुलीभवति । सुखितोऽपि पर्युत्सुकीभवति । ध्रुवं स केनापि विरहेण व्याकुलश्चञ्चलो वा । वस्तुतः तदा स अजानन्नपि जन्मान्तरसौहृदानि नूनं स्मरति । अनन्तप्रकारा अनन्ता विशिष्टा भावा हृदये सुस्थिरास्तेषु विभावादिपारवश्येन कोऽपि भावोऽकस्माद्रसरूपमाधृत्य जागर्ति ।

एकमद्वितीयं सौन्दर्यमेव यदा नानारूपं सौन्दर्यं, तथा मौलिकं नानारूपं सौन्दर्यमेव यदा जगति भिन्न-भिन्नेषु सौन्दर्यरूपेषु प्रकाशते तदा जगत्सौन्दर्यसारं प्रतिभाति ।

इदमवधेयं यद् यद्रूपं सौन्दर्यं वयमवलोकयामः यदि तदनुपन्नं भवेत्, अर्थात् यमवलोकयामो वयं यदि तं प्रेमदृशा द्रष्टुं न पारयामस्तर्हि रससाधना पूर्णतो न सिद्धा । पूर्णसौन्दर्यस्य पूर्णेन प्रेम्णा च साकं पुनः स्वाभाविके मेलने सति जगतः समग्रवस्तुजातेन सहैव स्वाभाविकं मेलनं परिस्फुरति । योगः प्रतिष्ठितो भवति । तदा न किमपि परकीयं नापि कुत्सितं प्रतिभाति । मनुष्यस्य जीवने सौन्दर्यसाधनाया अयमेव यथार्थः परिणामः ।

—डा० गङ्गाधरभट्टः
संस्कृत-विभागे-सह-आचार्यः,
राजस्थान-विश्वविद्यालयः, जयपुरम्

ऋषिकल्पः कविराजो गोपीनाथः

—डॉ० जगन्नारायणपाण्डेयः

विविध-ज्ञानविज्ञान-प्रभारतेऽस्माकं भारते देशे येषामृषिकल्पानां महापुरुषाणां ज्ञानस्योपासनायाश्च समक्षं संसारस्य समस्ता अपि विभूतयश्चिरात् प्रणता नयनमार्गमधिरोहन्ति, येषां साधनया भारतीयदर्शनैर्दृष्टिरवाप्ता लोकैश्च जीवने काचिदपूर्वा तुष्टिस्तेष्वेव पुण्यश्लोकेषु स्मरणीयचरितेष्वन्यतमोऽभून् निरतिशयगुणगणोदयो महामहोपाध्यायो डा० गोपीनाथकविराजमहोदयः ।

महाराजस्यादिशूरस्य शासनकाले १०६३ तमे ख्रिष्टाब्दे ब्राह्मणधर्मस्य पुनरुत्थानेन वङ्गभूमिरतिशयेन प्रभाविताऽभूत् । तदानीं मध्यप्रदेशाद् ये पञ्च कुलीनमहीसुरा वङ्गवासाय सादरमामन्त्रिता आसन् तेष्वन्यतमोऽवर्तत शाण्डिल्यगोत्रीयो भगवद्-भक्तिपरायणः श्रीभट्टनारायणः । तस्य वंशजो रामो वागचीत्युपाधिना विभूषित आसीत् । मुगलशासने कालान्तरे तेषु केचित् चिकित्सावृत्तिस्वीकारात् लोके कविराजोपाधिना विश्रुता जाताः । डा. गोपीनाथकविराजेन स्वजन्मना वारीन्द्रविप्राणामियमेव शाखा सम्मानिता ।

कलिकातायां मैमनसिंहमण्डलस्य दन्याग्रामे सुप्रतिष्ठितः पण्डितश्रीचन्द्रनाथो हि कविराजस्य पितामह आसीत् । असौ दुर्दैवादकाण्ड एव सप्तवर्षदेशीयं स्वतनयं वैकुण्ठनाथमसहायं विहाय दिवंगतः । अतो मातुलः श्रीकलाचन्द्रसान्यालस्तं स्वगेहं काण्ठालियाम् आनीय पुत्रवत् पालयामास । श्रीगोपीनाथस्य जनकस्य श्रीमतो वैकुण्ठनाथस्य पाणिग्रहणं तत्रैव १८७६ तमे ख्रिष्टाब्दे बाल्य एव धर्मराजिकायाः (धामराई-इति ख्यातायाः) प्रथिते मौलिकपरिवारे श्रीहरिश्चन्द्ररायमौलिकस्य कन्यया सुखदासुन्दर्या सह अजायत । पण्डितवैकुण्ठनाथः खलु विलक्षणप्रतिभावान् स्नातक आसीत् । कलिकाताविश्वविद्यालयस्य अनार्स-परीक्षायामसौ सर्वप्रथमं स्थानमवाप्तवान् । ततस्तत्रैव स राजकीय-संस्कृतकालेजे एम. ए. प्रथमवर्षे प्रवेशमलभत, परं हन्त वार्षिकपरीक्षायाः प्रागेव रोगाक्रान्तः सन् पञ्चत्वं गतः । हृदयविदारिण्या अस्या घटनायाः पञ्चमासानन्तरं धर्मराजिकायां धर्ममातामह्या वामासुन्दर्या गेहे सप्ताशीत्युत्तराष्टादशशततमे ख्रिष्टाब्दे सितम्बरमासस्य सप्तमे दिनाङ्के सौम्यवासरे कविराजराजोऽयमजायत । तदानीमनाथबालस्यास्य आश्रयोचितं स्थानद्वयमवर्तत—काण्ठालियाग्रामे पितुर्मातुलस्य श्रीकलाचन्द्रसान्यालमहानुभावस्य निवासस्थानं मातामह्या वामासुन्दर्याश्च गृहम् । वात्सल्यमूर्तिरम्बा

सुखदासुन्दरी लोचनतारकमिमं नीत्वा अनयोरेव स्थानयोः क्रमेण कानिचन वर्षाणि यापितवती। आरम्भे वामासुन्दर्या बालस्यास्य नाम निवारण इति निर्णीतं किन्तु मातुलेन स्वगृहदेवमुद्दिश्य गोपीनाथ इति विहितम्।

कविराजस्य प्रारम्भिकशिक्षास्थल्यासीत् काण्ठालिया। त्रयोदशवर्षे बाल्य एव कविराजस्य १९०० तमे ख्रिस्ताब्दे पण्डितब्रजशङ्करस्य पुत्र्या कुसुमकामिन्या सहोद्वाहः सञ्जातः। अथ वर्षत्रयानन्तरमेव दुर्भाग्यादस्य मातुलः सान्यालोऽपि दिवमगात्। विपदं विपदिति कथनं सफलं जातम्। आश्रयस्यैष तरुरपि क्रूरेण धात्रा सहसैवोत्पाटितः।

महाविपत्तिपयोधौ निमग्नोऽपि साहसी बालः कविराजोऽष्टमकक्षामुत्तीर्य माध्यमिकशिक्षायै ढाकानगरमगच्छत्। तत्र प्रवासकाले श्रीअविनाशचन्द्रः सरकारोऽस्य भोजनावासयोर्व्यवस्थामकर्षीत् शुल्कान्मुक्तिञ्चादापयद् अनाथाबन्धुमौलिकमहानुभावः। पाठ्यपुस्तकानां व्यवस्था श्रीकार्तिकशङ्करस्य प्रेरणया शाहभैरवनाथरायेण विहिता। तत्राध्ययनकालेऽस्मिन् ब्रह्मचारिणो लोकनाथस्य वाक्कीलस्यानन्दरायस्य चाधिकः प्रभावो निपतितः।

संस्कृतभाषाध्ययने त्वस्य प्रारम्भादेव नैसर्गिकी रुचिरासीत्। सौभाग्येनानेन पितू रिक्थतया संस्कृतग्रन्थानां विशालकोशोऽपि सम्प्राप्तः। ढाकायामयं पण्डितप्रवराभ्यां श्रीरजनीकान्तविधुभूषणाभ्यां व्याकरणमधीतवान्। तत्रैव कविराजस्य आङ्ग्लसाहित्याध्ययनेऽपि प्रवृत्तिरभवत्। असौ परीक्षासमाप्त्यनन्तरं ढाकातो गृहमागत्य विषमज्वरेण रुग्णो जातः। अस्मादेव हेतोर्वर्षपर्यन्तम् अध्ययनं त्यक्तवान्।

तदानीं 'वाराणसी व जयपत्तनं वा' इत्युक्तिर्विद्याक्षेत्रे सुप्रथिताऽऽसीत्। किञ्च बान्धवाख्यपत्रिकायां जयपुरनगरस्य नियोजकस्य श्रीविद्याधरचक्रवर्तिनः प्रधानमन्त्रिणः श्रीसंसारचन्द्रस्य चोल्लेखमवलोक्य कविराजेन विचारितं यज्जयपुरगमनेन उभावपोमौ ममार्थिकदृष्ट्या सहायकौ भवितुं शक्नुतः। इत्थमुभयदिशा स्वहितं विचार्य एकोनविंशवर्षीयः कविराजः १९०६ तमे ख्रिष्टाब्दे जुलाईमासस्य षोडशतारिकायामध्ययनार्थं जयपुरं प्रति प्रस्थितः। नवलपाटलकुसुमसुन्दरं जयपुरनगरमागत्य विद्यार्थी कविराजो महाराजकालेजे प्रवेशार्थं तत्रत्यं प्राचार्यं श्रीमन्तं सञ्जीवनगङ्गोपाध्यायमहोदयममिलत्। सुदूरात् कलिकातानगरादागतमिममवलोक्य चकितचकितः प्राचार्योऽचकथत् यद् अत्र छात्रावासो नास्त्येतस्मात् कारणाद् आवासस्य व्यवस्था पूर्वं स्वयमेव करणीयेति। शौर्यैश्वर्यसम्पन्ने लघुकाशीत्वेन प्रसिद्धेऽपि गोपीनाथेन परिपालितेऽपि च नितरामपरिचिते जयपत्तनेऽध्यायनार्थमागतोऽपरगोपीनाथोऽयं भोजनावासचिन्तासन्तानवितानैकतानस्वान्तो रात्रौ निद्रां न

लब्धवान् । 'श्रेयांसि बहुविघ्नानि' इति मत्वा द्वितीयदिने प्रातरेव जयपुर-प्रधानमन्त्रिणो मान्यसंसारचन्द्रसेनस्यावासमगच्छत् । निसर्गकरुणावरुणालयः सेनमहानुभावः स्वतनयेन अविनाशचन्द्रेण प्रतिभावतश्छात्रस्य कविराजस्य भोजनावासयोर्व्यवस्थामकारयत् । महाराजकालेजे एफ़. ए. कक्षायां कविराजस्य प्रवेशो जातः । तत्र कालेजे कदाचिद् आङ्ग्लभाषाया आचार्यो नवकृष्णरायः कक्षायां वर्ड्सवर्थमहाकवेः 'दि वर्ल्ड इज टू मच विद अस' इति कविताया व्याख्यामपृच्छत् । उत्तरपुस्तिकायां कविराजद्वारा कृता व्याख्या तस्मै नितरामरोचत । सहसा तन्मुखान्निःसृतम्—'आई थिंक आई बुड नाट हैब रिटेन बेटर' । इत्थं जयपुरे योग्यतमच्छात्रत्वेन कविराजस्य प्रसिद्धिः सञ्जाता ।

अत्रान्तरे वङ्गभङ्गस्यान्दोलन प्रचलितम् । १९०६ तमे ख्रिष्टाब्दे कलिकातायाः काङ्ग्रेसस्याधिवेशने राजस्थानप्रतिनिधित्वेनायमपि भाग-मगृह्णात् । अधिवेशनस्य समाप्तौ पुनरसौ जयपुरं प्रत्यागतः । अनेनात्र पाठ्यपुस्तकैः समं भारतीयस्य धर्मस्य, दर्शनस्य, पुरातत्त्वस्य यूरोपीयप्राचीन-मध्ययुगीनसाहित्यस्य च सम्यगध्ययनं विहितम् । फ्रेञ्च–स्पेनिश–इटालियन-जर्मन-रसियनसाहित्यस्याप्यध्ययनमनुवादेनाकारि । अनेन बौद्धधर्मेण वेदान्तेन च सम्बद्धग्रन्था अपि परिशीलिताः ।

तदानीमेव कविराजस्य गुलेरीपरिवारेण सह परिचयो जातः । तन्माध्यमेनैवानेन रायबहादुरहोराचन्द्र-ओझामहोदयोऽपि नयनपथमानीतः । इत्थं १९०६ ख्रिष्टाब्दात् १९१० ख्रिष्टाब्दं यावत् कविराजो गोपी-नाथोऽध्ययनार्थं जयपुरमलङ्कृतवानिति समेषामपि राजस्थाननिवासिनां कृते नूनमतिशयेन गौरवास्पदम् । ततोऽसौ बी. ए. परीक्षां दत्त्वा ग्रीष्मावकाशे जन्मभूमिं कलिकातामगमत् ।

तत्र शीलमहानुभावमवाप्य कविराजो हृदयेन प्रसन्नोऽभूत् तेन सह परलोकादिविषयिणी महत्त्वपूर्णा वार्ताऽपि सञ्जाता । शनैः-शनैः जुलाईमासः समागतः । एम. ए. कक्षायां प्रवेशस्य वेलोपस्थिता । संयोगाद् रामदयाल-मजूमदारमहाशयेन पूर्वमेव काशीमागन्तुं लिखितमासीत् । कविराजस्य प्रपितामहस्य भ्रातृव्यः पण्डितदीनबन्धुकविराजस्तदानीं काश्यामेवावर्तत । अस्मात् कारणादग्रेऽध्येतुं स्नातकः कविराजः काशीमागतः । पण्डितदीन-बन्धुस्तस्मिन् काले केदारघट्टस्य समीपे निवसति स्म । तस्यैव गृहं कविराजस्य आवासस्थानं सञ्जातम् ।

काश्यां तदानीं 'क्वींस कालेज' इति नाम्ना सुप्रसिद्धे महाविद्यालये विभागद्वयं प्रावर्तत । तयोरन्यतरो विभागः संस्कृतविभाग आसीद् यत्र

प्राचीनपरम्परया आचार्यकक्षापर्यन्तमध्यापनस्य सुव्यवस्थाऽवर्तत। अपरो विभाग आङ्ग्लभाषाया आसीत्। तत्र एम. ए., एम.एस-सी. कक्षां यावदध्यापनं प्रचलति स्म। तयोर्द्वयोरपि विभागयोः प्राचार्य आसीत् प्राच्यप्रतीच्योभयविधपण्डितेषु देशे लब्धप्रतिष्ठो विद्वान् डॉ. वेनिसमहोदयः। कविराजो नामाङ्कनप्रसङ्गे तममिलत्। प्रथमसाक्षात्कार एव वार्तायां संस्कृते पुरातत्त्वविषये चास्य विशदं ज्ञानमनुभूय प्राचार्यः प्रकामं प्रभावितोऽभवत्। एम.ए. प्रथमवर्षे कविराजस्य नामाङ्कनं सञ्जातम्। विषयचयनसन्दर्भे प्राचार्येण पृष्टः सः संस्कृते प्राकृते दर्शने च सविशेषं रुचिं प्रादर्शयत्। एतदतिरिक्तसमये प्राचीनपरम्परया संस्कृताध्ययने तत्परोऽभूत्। नैयायिकमूर्धन्यादाचार्यवामाचरणभट्टाचार्यान्न्यायशास्त्रमधीतवान्। द्वितीयवर्षे रुग्णतया परीक्षाहष्ट्या अध्ययनमत्यजत्। पुनरसौ १९१२ तमे ख्रिष्टाब्दे जुलाईमासाद् नरेन्द्रदेवहरिरामदिवेकराभ्यां सतीर्थ्याभ्यां सह अध्ययनमारब्धवान्। प्रयागविश्वविद्यालयस्य एम. ए. परीक्षायां मेधावी कविराजः प्रथमश्रेण्यां सर्वप्रथमं स्थानमाप्तवान्। कथं नैवं स्यात्–क्रिया हि वस्तूपहिता प्रसीदति।

अथास्य नियुक्तिसन्दर्भे स्थानद्वयात् पत्रमागतम्। तत्र प्रथमं पत्रमासीत् लाहौरकालेजस्य प्राचार्यस्य डॉ ए. सी. बुलनरमहाशयस्य त्वपरं जयपुरप्राचार्यस्य श्रीमतः सञ्जीवनमहोदयस्य। किन्तु विद्यागुरो डॉ. वेनिसमहोदयस्यादेशं शिरसि निधाय अन्यत्र क्वचिदपि गमनं परित्यज्य कविराजः शोधकार्ये प्रवृत्तोऽभूत्। डॉ. वेनिसः १९१४ तमे ख्रिष्टाब्दे विश्वप्रसिद्धस्य सरस्वतीभवनाख्यपुस्तकालयस्य स्थापनायां सत्यां तदध्यक्षपदे गोपीनाथकविराजं न्ययुङ्क्त। अप्रैलमासस्य चतुर्थतारिकायामयं यथाविधि स्वकार्यमारभत। सरस्वतीभवनग्रन्थागारे संगृहीतानां दुर्लभपाण्डुग्रन्थानां प्रकाशनाय वेनिसमहोदयेन 'प्रिंस आफ वेल्स सीरिज' इति काचिन्नवीना योजना प्रारब्धा यया न्यायवेदान्त–मीमांसाऽऽगमगणितप्रभृतिविषयसम्बद्धा नैके ग्रन्थाः प्रकाशपथमानीताः। तेषां बहुमूल्यग्रन्थानां प्रकाशने कविराजमहानुभावस्य सर्वाधिकं योगदानमवर्तत। १९१८ तमे ख्रिष्टाब्देऽनेन परमसिद्धा विशुद्धानन्दचरणा दीक्षागुरुत्वेन सम्मानिताः। इतः परं शनैः-शनैरध्ययनदिशायामपि किञ्चिन्महत्त्वपूर्णं परिवर्तनमागतम्। भक्तिदर्शनयोरतीवानुरागः समुत्पन्नः। आस्तिकदर्शन-गोरक्षमार्ग-वीरशैवमत-तान्त्रिकदर्शनवैष्णवधर्मविषयकग्रन्थानामध्ययने प्रबलतरा रुचिः सञ्जाता।

ईशवीये १९२४ तमेऽब्दे डॉ. गङ्गानाथझामहोदयस्य राजकीय-संस्कृत-कालेजस्य प्राचार्यपदाद् अवकाशग्रहणानन्तरं डॉ. गोपीनाथकविराज एव तत्पदम् अलङ्कृतवान्। प्राचार्यस्य महनीयपदेन सह परीक्षायोजकस्य प्रस्तोतुश्च कार्यमपि सम्पादितवान्। इत्थमेकादशवर्षाणि पूर्णनिष्ठया परिश्रमेण

च निरन्तरं संस्कृतकालेजस्य सेवां विधाय १९३७ तमे ख्रिष्टसंवत्सरे बलिहारी (बेरीबेरी) रोगेण निपीडितोऽभवत्। दीक्षाग्रहणानन्तरमाध्यात्मिकसाधानायामतिशयेन तत्परस्यास्य मनसि मन्दंमन्दं सांसारिककार्येभ्यो विरतिः पदं न्यधत्त। प्राचार्यत्वेन व्यवस्थाऽनुशासनादिकार्यजाते व्यापृततया साधनायां समयदाने न्यूनतां विलोक्यैव निर्धारितकालात् प्रागेव स्वेच्छया प्राचार्यत्वं पर्यत्यजत्। त्रयोदशवर्षाणि यावत् काश्यां विविधभाटकगृहेषु समयं यापयित्वा सेवानिवृत्तेः पूर्वमेव सिगराक्षेत्रे बलदेवमन्दिरं निकषा स्वीयं भवनं निर्मापितवान्। अतो हेतोरवकाशग्रहणानन्तरमसौ तत्रैव न्यवसत्।

अस्य सन्ततिद्वयमभूत् तनया सुधा तनयश्च जितेन्द्रनाथः। श्रीजितेन्द्रनाथ उत्तरप्रदेश-शासने वरिष्ठविपणि-निरीक्षकपदे सेवारतोऽवर्तत। किन्तु दुर्दैवादसौ युवा अल्पायुष्येव सुताद्वयं सुतमेकं पितरौ च विहाय अकस्मान्नाकलोकस्य पथिको जातः। कविराजे वज्रं निपतितम्, परमिदं किम्? श्यामासङ्गीतगोष्ठीषु ययोर्नयनयोरश्रुधारा किञ्चिदवरोधं न सहते स्म तयोरेवेदानीमश्रुलेशोऽपि लोकेन नावलोकित इति महदाश्चर्यम्। कविराजमहानुभावो गरलं पीत्वा शिवत्वमुपगतः। विदुषां मनसि महाकविविभूतेर्भवभूतेर्वाणी सहसाऽस्फुरीत् –

'वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥'

अवकाशग्रहणानन्तरं साधनाव्यसनिनः कविराजस्य स्वास्थ्यं यद्यपि सामान्यतया सन्तोषप्रदमवर्तत परं तथापि निरन्तरं भोजनविश्रामयोरनवधानतातिशयाद् ईशवीये १९६१ तमेऽब्देऽसौ प्रवाहिका (पेचिश) रोगेण नितरां पीडितोऽभूत्। साधनासिद्धमूर्तिः माता आनन्दमयी स्वयं विशेषोपचारार्थं तं नीत्वा देहलीं गता। तत्र स्वास्थ्यपरीक्षणानन्तरं लब्धप्रतिष्ठचिकित्सकेन डॉ. सेनेन कैंसररोग इति निर्णीतम्। अथ मुम्बय्यां टाटामेमोरियल-कैंसर-इंस्टीच्यूटनाम्नि चिकित्सा-संस्थाने डॉ. वर्जेसः शल्यचिकित्सामकर्षीत्। कविराजस्त्रयोविंशतिदिनानि चिकित्सालये स्थित्वा ततः पुण्यपत्तनमगच्छत्। स्वास्थ्येऽनुकूले सत्यसौ काशीं प्रत्यायातः।

शल्यचिकित्सायाः पञ्चवर्षानन्तरं मनीषिमूर्धन्यः कविराजः १९६६ तमे ख्रिष्टाब्दे पुनर्विषमज्वरेण पीडितोऽभूत्। तदानीं तत्पौत्रः शशिशेखरः कलिकातायां कार्यरत आसीत्। सः पितामहस्य सेवायामुपस्थितोऽभवत्। अत्रान्तरे वार्धक्येन जर्जरदेहा कविराजमहोदयस्य तपस्विनी धर्मपत्नी दिवं गता। अथ रुग्णस्य तस्य वर्धमानां शारीरिकदुर्बलतां विज्ञाय आनन्दमयी माता तं भदैनीस्थितमनुगङ्गं निजाश्रममानीतवती। पुत्रवधू शिवानी तस्य

पूज्यपूज्यस्य सेवायां तत्पराऽऽसीत्। पुत्री सुधाऽपि कलिकातातः काशीमागता। परमेतावताऽपि दौर्बल्यमहर्निशं वृद्धिं गतम्। सुष्ठुतरोपचारेणापि लाभो न जातः। १९७६ तमे ख्रिष्टाब्दे जूनमासस्य द्वादशतारिकायां सायमस्ताचलोन्मुखं भगवन्तं भास्करमवलोक्य एष विद्वदाकाशमण्डलमणिरपि यथाकालमस्तङ्गतः। इत्थमस्य महामानवस्य लोकलीला समाप्तिमगात्।

ऋषिकल्पः कविराजो हि वर्तमानयुगस्य महान् दार्शनिको भारतीयमनीषिणामुदात्तपरम्परायाः साक्षाद् विग्रहोऽवर्तत। महापुरुषस्य लोकयात्रा लोकहितायैव भवति। अनेन महापुरुषेण स्वकीयज्ञानालोकेन सन्ततं सकलमपि लोकजीवनं प्रकाशितम्। तस्य जीवनकलशो लौकिकापत्त्यनलप्रबलज्वालासु सम्यक् परिपक्वतामुपगतः। स्वीयदीर्घसाधनाकाले द्वारि समागतां लक्ष्मीमपि तृणाय अमन्यत। सिद्धमूर्त्या मात्रा आनन्दमय्या सत्यमेवोक्तम्—'बाबा का यह शरीर सुख भोगने के लिए नहीं आया है।' महात्मनः कविराजस्य जीवनयात्रायां सर्वत्र समरसत्वं दरीदृश्यते। सुखे हर्षस्योन्मादो न दृष्टो न च दुःखे विषादः। स्तुतौ निन्दायां च समभावेन विराजमानोऽयं स्थितप्रज्ञः बहुधोक्तवान् यन्निखिलमिदमखण्डं ब्रह्माण्डं समन्वयेनैव प्रवर्तते। अतः सूक्ष्मविश्लेषणेन परस्परविरुद्धविचारेष्वपि सामञ्जस्यस्थापनमेतस्य दार्शनिक—चिन्तनस्य प्रधानं वैशिष्ट्यमासीत्। वैदिकात्मवादस्य बौद्धानात्मवादेन सहैक्यप्रतिपादने कविराजमहानुभावस्येयमुक्तिर्नूनं हृदयेन श्लाघनीयाऽनुकरणीया च तज्ज्ञैः–अनात्मवादी हि अनहंवादी भूत्वा सर्वैः समत्वं स्थापयति, आत्मवादी सर्वेष्वेव आत्मभावमुत्पाद्य उभयोरपि लक्ष्यमेकमेव साधनमात्रे भेदः। भेदोऽज्ञानस्य परिणामोऽभेदश्च ज्ञानस्येति। सर्वेषामपि दार्शनिकतत्त्वानां सम्यग् ज्ञानं तद्धस्तगतमवर्तत। तेन कदाचिदपि कस्यचिदपि मतस्य सम्प्रदायस्य च दोषदृष्ट्या आलोचना न विहिता।

यद्यपि प्रायेणाद्य आधुनिकविज्ञानस्य प्रशंसा पुराणादीनां च निन्दा प्रगतिशीलप्रतिभाया निदर्शनं मन्यते लोके किन्तूभयमार्गमर्मज्ञोऽसौ विज्ञानस्यासामर्थ्यं पौराणिकान्धविश्वासस्य वैज्ञानिकतां सम्यगजानात्। तस्यायं द्रढीयान् विश्वास आसीद् यद् भारतीया संस्कृतिरखण्डं सत्यं जानाति अत एव खण्डसत्यस्यापि समादरं विदधाति। साधनायाः क्षेत्रेऽपि तस्य विलक्षणा समन्वयभावना दृष्टिपथमवतरति। तदीया साधनाप्रणाली क्रिया-ज्ञानयोगसमन्विताऽवर्तत। विश्वस्य सकलानामपि प्रमुखदार्शनिकपरम्पराणां मर्मज्ञः सः शैवशाक्तवैष्णवबौद्ध-जैनप्रभृतिमतेषूपलब्धस्य भक्तिसाहित्यस्य प्रशंसक आसीत्। तन्मते मानवजीवनस्य परमलक्ष्यस्य प्राप्तिः खलु विश्वकल्याणसाधनया सह अभेदस्थापनेनैव सम्भवा नान्यथा।

योगसाधनायां सम्यक्परिणतमतिः कविराजवर्यः सिद्धमहापुरुष आसीत्। अनेकैर्दिवङ्गतैः सिद्धपुरुषैस्सह तस्य सम्बन्धो निरन्तरमवारितप्रसरोऽवर्तत।

इहस्थोऽपि स यथेच्छं संसारस्य निखिलमपि वृत्तं ज्ञातुं समर्थ आसीदिति वाराणसेय-विद्वन्मण्डले सुप्रसिद्धिः। कविराजेन स्वदार्शनिकचिन्तनेन साधनया च भारतीयसंस्कृतिसाहित्ययोर्नैकविधं संवर्धनमकारि। वाराणसेय-संस्कृतविश्वविद्यालयस्य विश्वविश्रुतः सरस्वतीभवनपुस्तकालयः पण्डित-राजस्य कविराजस्य विविधमहनीयकार्यजातस्य जाज्वल्यमानो दृष्टान्तः।

श्रद्धेयः कविराजो न केवलं भारतस्यैवापि तु सम्पूर्णस्य विश्वस्य महती विभूतिरवर्तत। स्थितप्रज्ञोऽसौ स्वाध्यायं साधनां च विहाय सांसारिककार्येषु क्वाप्यासक्तिं नादर्शयत। अस्मादेव यूनस्तनयस्य अकाण्डे मरणमपि तस्य समाधिं भङ्क्तुं न शशाक। तरति शोकमात्मविदित्युपनिषदुक्तिः सफला जाता। स्पृहा खलु वासनाया नामान्तरं सा च बाल्यादेव तस्मादतीव दूरेऽतिष्ठत्। धन्या हि वङ्गभूमिर्यत्र एतादृशो महामनीषी समुत्पन्नः धन्यतरा च जयपुरनगरी भगवतो विश्वनाथस्य वसतिः काशी च यत्रत्यायाः शिक्षाया दीक्षायास्तथा साधनायाः प्रसादात् कविराजगोपीनाथो गोपीनाथः सञ्जातः। कपिलकणादगौतमपतञ्जलीनां महात्मनां समुदितं स्वरूपमेकत्र प्रदर्शयितुमिव परमेष्ठिना महामानवोऽसौ धरायामवतारितः। असाधारणगुणरत्नैरेव सूर्य-विज्ञानवित् कविराजमहानुभावो महामहोपाध्याय-पद्मभूषण-साहित्य-वाचस्पतिप्रभृतिमहनीयोपाधिभिः सादरभरं सम्मानितोऽभिनन्दितश्च भारत-शासनादिभिः। संसारमहासरसि पद्मदलायमानस्तेजसा भासमानोऽयं कस्य भारतीयसंस्कृति-संस्कृत-साधनारसिकस्य कृते नासोन्नमनीयः? तस्य विलक्षणा स्मरणशक्तिरनन्या गुरुभक्तिस्तथा वार्धक्येऽप्यनुकरणीयस्फूर्तिः कं साधकं विद्यावन्तं विस्मयपयोधौ निमग्नं नाकार्षीत्? यस्य दर्शनमात्रेण काचिदपूर्वशान्तिरुत्पद्यते, दिव्यवाण्याः श्रवणेन च सुतरामज्ञानतिमिरं पलायते विद्यासाधनाऽऽराधनाऽनुसन्धानजुषां विदुषां तीर्थराजो हि कविराजोऽसौ यथार्थतो योगिराज आसीत्।

एतादृशस्य तेजस्विनस्तपस्विनो यशस्विनश्च मनस्विनो विषये ननु मौनावलम्बनम् असह्यशल्यं स्यात्। उक्तञ्च महाकविना श्रीहर्षेण—

'वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्।'

सौभाग्येन वाराणस्यामध्ययनकाले मयाऽपि वारद्वयं मनीषिमूर्धन्यानां स्वनामधन्यानां कविराजचरणानां दर्शनमवाप्तम्। अखिलभारतीय-तन्त्र-सम्मेलने भाषणमप्याकर्णितम्। तेषां नित्यस्मरणीयानां प्रसन्नं वदनं, विशालो भालः, अङ्गारप्रतिमे दीर्घनयने, मधुराऽर्थगभीरा च वाणीत्येतत्सर्व-मधुनाऽपि पुरः स्फुरदिव प्रतीयते।

यद्यप्यधुना तत्रभवतां महामहोपाध्यायगोपीनाथकविराजमहोदयानां पाञ्चभौतिकं शरीरमस्माकं समक्षं नास्ति तथापि 'कीर्तिर्यस्य स जीवति' इति नयेन ते स्वीययशःशरीरेणाद्यापि विराजन्त इति न मनागपि संशयावकाशः। पूर्वं ये हि लोके जीवन्मुक्ततया नितरां दर्शनीया आसन् त एव साम्प्रतं देवतया नित्यं स्मरणीयाः सञ्जाताः।

—साहित्यविभागाध्यक्षः
केन्द्रीय-संस्कृत-विद्यापीठं, जयपुरम्

चेतश्चिरं चुम्बति

—डॉ. जगन्नारायणपाण्डेयः

सद्विद्याऽध्ययनं गुरोः पदयुगस्याराधनं साधनं
विज्ञानस्य, कवित्वकौशलकलासंवर्धनं सन्ततम्।
नानाशास्त्रविदां श्रुतिस्मृतिजुषां गोष्ठीषु सम्भावनं
चैतत्सर्वमपि प्रसह्य कृतिनां चेतश्चिरं चुम्बति ॥१॥

श्रीलो लालबहादुरो नयविदां मान्यो वदान्यश्च यद्
यातो लोकहिताय मित्ररसियादेशं सहर्षं ततः।
कृत्वा कार्यकलापमाशु च पुनर्नायात इत्येव हा
नित्यं क्लेशकरी स्मृतिर्मम सखे चेतश्चिरं चुम्बति ॥२॥

धर्मस्य सदातन आदर्शः

[म०म०गोपीनाथकविराजमहाभागैः संप्रतिपत्त्यात्मिकया दृष्ट्या प्रवृत्तिनिवृत्तिस्वरूपस्य धर्मस्य व्याख्यानं विवेचनञ्च बहुधा कृतम् । तत्सम्बद्धाश्चानेके निबन्धास्तेषां ग्रन्थेषु प्रकाशिताः सन्ति । तेषामेव संवादशैल्यां रचितस्यैकस्य निबन्धस्यानुवादोऽत्र प्रस्तूयते ।—सम्पादकः]

अनादिकालत एव सभ्ये जगति धर्मविषयकाः नैके विचाराः वितर्काश्च प्रचलिताः सन्ति । धर्मस्य यथार्थस्वरूपकथनेऽद्यावधि वस्तुतः किमपि वक्तुं न पार्यते, अत एवोक्तम्—

'धर्मस्य तत्त्वं निहितं गुहायाम्' इति ।

अतोऽधुनाप्ययमेव प्रश्नो यत् कीदृशो धर्मो यथार्थः ? केन प्रकारेण च तस्योपलब्धिर्भवितुं शक्या ? इत्येवं प्रकारेण विह्वलहृदयस्तत्त्वजिज्ञासुर्जिज्ञासामुत्थापयति । अत्र चास्मिन् निबन्धे प्रवृत्तिनिवृत्त्यात्मकस्य धर्मस्य स्वरूपं वक्तृजिज्ञास्वोः प्रश्नोत्तररूपेण प्रस्तूयते ।

वक्ता—हे जिज्ञासो ! धर्मविषयिणी जिज्ञासा भवतोपस्थापिता, अत एवाहमेतद्विषये यथाशक्ति त्वया सह समालोचयितुमुद्यतोऽस्मि, किन्तु मदीये कथने भवद्भिरेतन्नैवाङ्गीकरणीयं यन्मदुक्तं सर्वं भ्रमातीतं चरमसत्यं वर्तते । चरमरूपेण सत्यत्वकथनन्तु न केनाप्यस्मदादिना लौकिकेन प्रस्तोतुं शक्यते । अस्यायमभिप्रायोऽपि नास्ति यन्मद्वचनं निराधारमस्ति, अतः समूलकं मद्वचनं विज्ञाय तस्मिन् विश्वसिहि ।

जिज्ञासुः सप्रमाणकं भवतामुपदेशं शिरसा धार्यें । अधुना तावदुपदिश्यतां यत् सर्वतो दृष्टमेव किं धर्मस्य तत्त्वमुतान्यत् ? यदि तदेव, तदा देशकालावच्छेदेन धर्मविषये विभिन्नाः सिद्धान्ताः कथं प्रचलिताः सन्ति ?

वक्ता—वत्स ! धर्मस्य तात्त्विकस्वरूपे एकत्वे सत्यपि व्यावहारिकस्वरूपे नानात्वे न कोऽपि सन्देहः । देश-कालसांसारिकघटनानां वैचित्र्यमादाय धर्मस्वरूपम् अंशतोऽपि न परिवर्तते । इदमेव धर्मस्यान्तरङ्गस्वरूपम् । तस्य बहिरङ्गं स्वरूपन्तु देशकालादिभेदेन व्यवहारक्षेत्रे विभिन्नतां याति ।

धर्मस्य तत्त्ववेत्तारस्तु वैचित्र्यमयेऽस्मिन् बहिरङ्गस्वरूपेऽपि शाश्वतं नित्यरूपमेव पश्यन्ति । यतस्ते जानन्ति यदिदं बाह्यं स्वरूपमन्तर्निहितभावानामेव बहिःप्रकाशमात्रमस्ति ।

जिज्ञासुः—'यथार्थधर्मस्यैकविधत्वेऽपि तस्य बाह्यरूपाणां नानाविधत्वं भवितुं शक्नोति, अत एव कस्यापि बाह्यस्वरूपस्य विश्लेषणेन तदन्तःपाति धर्मस्य सदातनं तत्त्व प्रकाशमायास्यति इत्येव भवदुक्तं यदि सत्यम्, तर्हि बाह्यधर्मेषूत्कर्षापकर्षयोर्न किमपि स्थानमवशिष्यते ।

वक्ता—नेदं मद्वचनस्य तात्पर्यम् । उत्कर्षापकर्षयोर्गुरुलघ्वोर्वा विचारणा बहिरेवानुभूयते, अन्तःप्रवेशे तु नेयं स्थितिः । व्यवहारविषयिणी यावद् बाह्यस्थितिस्तावद्धर्मस्य वस्तुतत्त्वं न कोऽपि ज्ञातुं समर्थोऽतस्तदा तूत्कार्षापकर्षाववश्यं मन्यव्यौ । आत्मनो विभुत्वं नित्यत्वमेकत्वञ्च यथार्थतोऽङ्गीकृतेऽपि यथा व्यावहारिके जगति न तादृशी स्थितिरङ्गीकर्तुं शक्यते, तथैव धर्मस्य मूलतत्त्वं सर्वत्रैकमेव किन्तु बाह्यस्थितिवशान्न सर्वधर्माणां साम्यं कथयितुं पार्यते । यथा चैकस्यैवाकाशस्य घटाकाशो महाकाश इत्यौपाधिको भेदोः यथा वा मुखे मणिकृपाणदर्पणव्यञ्जकोपाधिवशाद् दैर्घ्यवर्तुलत्वादिभानम्, तद्वदेव सारधर्मस्य सर्वत्रैक्येऽपि बाह्यधर्मस्योत्कृष्टतापकृष्टतारूपेण भेदविषयता संभवत्येव ।

जिज्ञासुः—एकस्यैव धर्मस्य यदि समे धर्माः विकासरूपाः सन्ति, तर्हि तेषां पारस्परिको भेदः कथं नियम्यते ?

वक्ता—यथार्थतो धर्मस्यैक्येऽपि सर्वत्र तस्य पूर्णप्रकाशो भवितुं न शक्नोति । लोकेऽपि व्यक्तिगतो जातिगतश्च भेदो मर्त्येषु समवलोक्यते । धर्मस्य यथार्थज्ञानविषये तद्व्यक्तेर्योग्यतापेक्षिता । अधिकस्याधिकं फलं भवतीति यावत् । इयमेव स्थितिर्जातिविषयेऽपि । देश-कालवच्छेदेन धर्मभेदेऽपीदमेव मूलकारणम् । अतो वृद्धानां प्रौढानां यूनां शिशूनां चतुर्णां युगानाञ्च धर्माः परस्परं विभिन्नाः प्रोक्ताः महर्षिभिः ।

जिज्ञासुः—अस्यामवस्थायान्तु शास्त्रेण धर्मः कथं निर्णेतुं शक्यते ? यतः शास्त्रेण सामान्येनोपदिश्यते, न तु देश-कालावच्छेदेन तत्रोपदेशे पार्थक्यं विधीयते । एवंस्थितौ भवदुद्दिष्टोक्तविभिन्नधर्माणामुपदेशाभावाच्छास्त्रे मिथ्यात्वं समापतति ।

वक्ता—शास्त्रे मिथ्यात्वाक्षेपो नोचितः । साधारणो जनः शास्त्रत्वेन यज्जानासि, वस्तुतस्तन्न शास्त्रमपितु यथार्थशास्त्रस्य बाह्यपरिच्छिन्नप्रकाशमात्रमस्ति । ज्ञानचक्षुषोः समुन्मीलनाभावे प्रकृत्यन्तःप्रवेशो न भवति, अर्थाद्

वेदस्य शब्दब्रह्मणो वा साक्षात्काराभावे सति शास्त्रवाण्यपि नैवावगन्तुं शक्यते । यस्याः बोधरूपायाः वाचोऽनन्ताच्चिदाकाशादुद्गमो भवति, तदेव शास्त्रम् । ईदृशी वाक् कस्यापि दिव्यमूर्तिस्वरूपस्य शरीरिण एव भवितुं शक्नोति, अशरीरिण आकाशवाणी, हृदयप्रदेशादुद्भूता भाववाणी, गुरुस्थानान्निःसृताऽऽज्ञातस्वरूपज्ञानरूपा दिव्या वाणी वा भवितुं शक्नोति । कापि वाग् भवेत्, सा यथार्थत एका प्रज्ञास्वरूपा वागेवास्ति, नान्येति निष्कर्षः ।

जिज्ञासुः—भवद्भिः प्रतिपादिते नित्ये शास्त्रेऽस्माभिश्च व्यवहृते शास्त्रे यदि कोऽपि भेदस्तर्हि प्रतिपादनीयः ।

वक्ता—उभयविधे शास्त्रे भेदोऽप्यस्ति नास्ति च । शास्त्रमेव धर्मस्य प्रकाशकम् । धर्मस्य नित्यरूपज्ञानन्तु नित्यशास्त्रेणैव संभवम् । अस्माकं प्रचलितशास्त्रेण तु केवलं व्यावहारिकधर्मस्य रूपं ज्ञातुं शक्यते । धर्मस्य सर्वतोभावेन तत्त्वज्ञानार्थं बुद्धिगुहायामभिनिवेशो विधेयः । तच्च ग्रन्थपाठेन ज्ञातव्यं नास्ति । प्रत्येकं जनाय देशगतोऽवस्थागतश्चाधिकारमूलको धर्मस्य निर्देशो व्यावहारिके शास्त्रेऽवाप्तुं न शक्यते ।

जिज्ञासुः—किं भवतामभिप्रेतम् ? किं कर्त्तव्याकर्त्तव्योर्यथार्थनिर्णयाय ग्रन्थपाठो नोचितः ?

वक्ता—अवस्थाधिकारयोर्भेदानुसारं कस्मिन् कर्मण्यौचित्यम्, कस्मिंश्च कर्मणि नौचित्यमिति सामान्येनोपदिष्टस्यालोचनामात्रेण न निर्णेतुं शक्यतेऽपितु यावन्नान्तःकरणं जागर्ति, हृदये गुरुशक्तिर्वा न जागर्ति, तावन्न स कर्त्तव्यनिर्णयोऽभ्रान्तेन भवितुं शक्यः । वेदरूपिणो नित्यगुरोर्हृदये जागर्त्यभावे कर्मपथ्यग्रेसरणमसम्भवम् । 'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः' सत्यमिदं कालिदासवचः । अस्यायमभिप्रायः—सतां-साधूनां विशुद्धचेतसां-सद्वस्तुध्यानपरायणानामपगतमोहनिद्राणाञ्च कृते ग्रन्थाध्ययनस्य कस्मादप्युपदेशश्रवणस्य वा सन्दिग्धविषयस्य सन्देहमपाकर्तुं नावश्यकता, अपितु तेषां ज्ञानोज्ज्वलं चित्तमेव संशयमुच्छिद्य तन्मनसि विश्वासबीजमावपति । विशुद्धचेतसां स्वाभाविकी प्रवृत्तिर्न कदाप्यनुचितविषयिणी निषिद्धविषयिणी वा भवितुं शक्नोति । अनेनैवावगन्तव्यं यत् सामान्यप्राणिनः कृते धर्मस्य गूढतत्त्वज्ञानं कियद्दुष्प्राप्यम् । परस्मै धर्मोपदेशस्तु दूरे तिष्ठतु, कर्मपथे गन्तुमावश्यकं प्रत्यक्षज्ञानं स्वस्मै अपि सहजरूपेण संग्रहीतुं शक्नोति । निष्कर्षोऽयं यन्नास्ति बाह्यशास्त्रीयज्ञानमेव यथार्थशास्त्रीयज्ञानम् ।

जिज्ञासुः—एतेनावगतं यद् धर्मस्य तत्त्वज्ञानं विना मनुष्यः पशोरभिन्नो यथोक्तम्—'धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः

समाना:' इति । अर्थाद्धर्मलोपे सति मानवः पाशवरूपेण क्रमशोऽवतरति । अतस्तद्विषये सन्देहमपाकृत्य मां कृतार्थयन्तु ।

वक्ता—वस्तुतो धर्मोन्नत्या विशुद्ध्या च मानवस्य सर्वतोभावेनाभ्युन्नतिर्भवति, यतो धर्मः सर्वेषां भूतानां मधु' अर्थाद् धर्मरूपिणः कल्पवृक्षस्याश्रयणेन जनस्य न कापि कामनाऽपूर्णा भवति । आलोचनादृष्ट्या धर्मतत्त्वस्य द्विधा विभाजनं सुकरमस्ति । एकन्तावदविनश्वरूपं नित्यम्, अपरञ्चानित्यम्—यद् व्यावहारिकत्वादनित्यमपि स्वाभाविकं यस्य च चिरस्थायित्वाभावेऽपि प्राधान्येनावश्यकताऽनुभूयते । अनित्योऽप्ययं प्राकृतिको धर्मः प्रवृत्ति-निवृत्तिभेदेन द्विप्रकारकः । अत्र यद्यपि 'प्रवृत्तिस्तु वासनामलिनजीवस्य कृते स्वाभाविकी, अतः सा न धर्मान्तर्गता भवितुमर्हा, प्रत्युत तन्निरोधो धर्मस्य कृते आवश्यकः' इति प्रश्नः समुदेति, तथापि प्रवृत्तिमात्रेणाधर्मो भवतीत्यपि नायं नियमः । 'प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला' इत्यत्रास्ति सत्यता, किन्तु प्रवृत्तेः समाप्ति यावन्न निवृत्तेरुदयः । व्यावहारिकदृष्ट्या निवृत्तिरेवोत्तमेत्यपि तथ्यम्, किन्तु प्रवृत्तिं नियम्य बलात्तामवरुद्ध्य वा निवृत्तिर्न स्थापयितुं शक्यते, यतः 'प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ?' यैरुपादानैर्जीवस्य जीवत्वम्, स (बद्धजीवः) स्वभावतो बहिर्मुखः । यावन्नेयं बहिर्मुखी गतिः शान्ता भवति, तावन्निवृत्तेराशा दुराशैव सेत्स्यति । एतावता निवृत्तेरनुपयोगित्वमपि नाहं प्रकाशयितुमीहेऽपितु प्राधान्यमेव तस्याः मन्ये । वस्तुतो निवृत्तिं विना धर्ममार्गस्य प्रथमसोपानमपि नावरोढुं शक्यते । किन्तु निवृत्तिः—निवृत्तिरित्येवमाक्रोशेन तु हृदयस्थाः चिरसंचिताः वासनाः समुत्पाटिताः नैव भवितुं शक्नुवन्ति । सृष्टेः सर्वेऽपि पदार्थाः विषमभावापन्नाः सन्ति यावन्न तत्र साम्यमायाति, तावन्न सृष्टिचक्राद्बहिर्निःसरणस्याशाऽलीकाकाशकुसुममात्रमेव । ऋणशोधं विना यथा नैव मुक्तो भवति जनस्तथैवातृप्तवासनाभिः सह भवाब्धिस्ततुं न पार्यते । वासनायाः निवृत्तिं विना मुक्तेरीहापि वृथैव श्रममात्रम् । वासनायास्तृप्तिर्भोगेन वासनायाः निवृत्तिर्वा सम्भाव्यते न वेति विचारः समापतति ।

सर्वे जानन्ति यत् पिपासायाः निवृत्तिर्जलेन भवति, पानीयञ्चावश्यं ग्राह्यमनुभूयते । किन्तु सा पिपासानिवृत्तिरात्यन्तिकी नास्ति । यतः कालान्तरे पुनः पिपासानुभूयते, अतः सामयिकजलपानेन पिपासायाः सामयिकनिवृत्तावपि सैद्धान्तिकरूपेण नोपशाम्यति । अस्माकमुपादानान्तर्गतमीदृशमेकमभावस्रोतोऽस्ति यन्न केनापि वस्तुनैकान्तिकरूपेण निवर्त्तयितुं शक्यते । यदि वयमुपादानगतमिममभावं निवर्त्तयितुं शक्नुमस्तदा कदाप्यभावबोधस्य संभावना न स्यात् । अतः केनापि कौशलेन यदि स मौलिकोऽभावो विज्ञायेत तत्तृप्त्यै सम्यगुपायश्च प्रयुज्येत तर्हि सोऽभावस्तन्निवर्त्तकोपायश्च समुदितरूपेणैतादृशमानन्दं प्रस्तोष्यतः, येनाभावबोधस्य जागर्तिरेव न भविष्यति ।

जिज्ञासुः—भवदुक्तं समीचीनं प्रतीयेत यदि लोकेऽस्मिन् केनापि वस्तुना अभावबोधस्य आकांक्षायाः वा आत्यन्तिकी निवृत्तिः संभवेत्, किन्विदमसंभवं प्रतिभाति। यथोक्तमेवोदाहरणम्—यन्मया जलं पीतं पिपासाशमनार्थम्, पिपासाऽप्येकवारन्तु निवृत्ता, किन्तु न साऽन्तिमा निवृत्तिः। कालप्रवाहेण पिपासाजलपानयोः पुनरावृत्तिर्भवत्येव, कारणम्, यावती पिपासा वर्तते, न ततोऽधिकजलग्रहणस्य सामर्थ्यम्। तदा कथमभावबोधस्यैकान्तो निवृत्तिः?

वक्ता—संभाव्यतेऽस्योत्तरम्, यत् पिपासाकुलाः वयं जलं गृह्णीमस्तदा सम्पूर्णं जलं नास्माकं लक्ष्यम्, प्रत्युत जलस्य सारभूतो रस एवोपादेयः। अनल्पेऽपि जले क्षुद्रकणादेकस्मादधिको रसो न लब्धुं शक्यते। किन्तु कणमात्रेऽपि तस्मिन् सा विलक्षणा शक्तिर्या बहुकालं यावत् पिपासामपाकर्तुं समर्था। पिपासाऽग्नेर्धर्मः, देहे चाग्निक्रियावशादेव पिपासाऽऽविर्भवति। इत्थमेव रसः सोमधर्मः। देहाग्निमुपशमयितुं सोमबिन्दोरन्यो न कश्चनोपायः। जीवहृदये या भोगाकांक्षा, साऽपि अग्नेर्विकासमात्रम्। सा भोगाकांक्षाऽऽधारभेदेन नैकविधा। भोग्यस्वरूपस्य सोमस्यामृतबिन्दोर्वाऽभावादाकांक्षा न निवर्तयितुं शक्या, यतश्चायमग्निर्न साम्यभावं भजते।

जिज्ञासुः—काम्यवस्तुभोगेन कदाचिदपि न शाम्यति कामना, यथोक्तं शास्त्रे—

'न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥' इति।

यदिदं सत्यम्, तर्हि भवदुक्तेन सह कथं संगतिर्यतो भवद्भिः प्रतिपाद्यते यत् सोमसम्बन्धेनैवाग्निः शाम्यति, गीतायाञ्च प्रतिपादितं 'भोग्यवस्तुसम्बन्धेन भोगवृद्धिरुपजायते' इति, तदाऽस्माभिः किं ग्राह्यम्?

वक्ता—परमार्थतो न केनापि प्रामाणिकेन सह कस्यापि प्रामाणिकवचनस्य विरोधः, यतो विशुद्धभोग्यवस्तुनोऽभावादर्थादमिश्रितसोमयुक्तवस्तुनोऽभावादेव भोगाकांक्षा न तृप्यति, विशुद्धभोक्तुश्चाभावाद् भोगजन्य आनन्दोऽपि बन्धनहेतुः। यथा सोमो विशुद्धभोग्यपदार्थस्तथैवाग्निरपि विशुद्धो भोक्ता, किन्तु लोके साधनसंस्कारं विना प्रायेण नैतादृशो जीवो मिलति यस्मिन शुद्धाग्निः प्रज्वलिताऽभवत्, यस्मिंश्च सौभाग्यवशात् सोऽग्निः प्रज्वलितः, स दिव्यभावमवाप्याग्निस्वरूपं मुखमवलम्ब्य दृष्ट्यैव भोग्यनिष्ठममृतमास्वादयति। देवा अमृतं भुञ्जते, तेषां भोगाश्च दृष्ट्यैव सम्पद्यन्ते। साधकैरप्येवं दिव्यभावेऽवाप्ते सति तेऽपि तथैव दिव्यभोगाधिकारिणो भवन्ति। अतः 'अग्निर्वै देवानां मुखमि' ति शास्त्रवचने गूढतत्त्वं निहितं वेदितव्यम्। मलिनदेहस्य प्रत्येकमंशे बुभुक्षुरग्निर्विद्यते, सोऽग्निर्विशुद्ध्यभावात्तदंशे रसं शुष्कं सम्पादयति, फलत आनन्दमयकोशे शुद्धरसोऽल्पमात्रायामेव संयाति।

इदमेव जरामृत्योः कारणम् । शुद्धभोगं बिना जरामृत्युरहित्यावस्थायाः प्रादर्भावो न सम्भवः ।

जिज्ञासुः—अशुद्धभोगैर्भोगवासना कथन्न निवर्त्तते ?

वक्ता—पूर्वमुपपादितं यदनित्यो व्यावहारिकश्च धर्मः प्रवृत्ति-निवृत्तिभेदेन द्विप्रकारकः । तत्र कौशलपूर्वको भोग एव प्रवृत्तिधर्मः । अर्थाद् भोगस्यैतादृशमेकं कौशलं वर्तते, यदवलम्बनेन भोगेनैव भोगोऽवसीयते । तदा निवृत्तिस्तु स्वयमेवोपतिष्ठति । तत् कौशलावलम्बनं विना भोगो बन्धनहेतुर्भवति, स च न कदापि धर्मपदवाच्यः ।

चेतसि यावद् यद्विषयकसंस्कारास्तावन्न तद्विषयस्य परित्यागो भवितुं शक्यते । कृत्रिमोपायैर्न यथार्थत्यागः । यदि भोगकौशलेन सह पूर्वोक्तयोरग्निसोमयोर्मिलनं भवेत्तदा चित्तस्था वासना शुद्धभोग्यवस्तुप्राप्तिकारणात् सन्तृप्ता सती स्वयमेवोपशान्ता भविष्यति । इत्थम् न तस्याः पुनः प्रादुर्भावः, साम्यभावञ्च धारयति । अस्यामवस्थायां निवृत्तिदेवी आह्वानं विनैव प्रादुर्भवति । ततः शुद्धभोक्ताऽपि पूर्णत्वमवाप्य भोगातीतं शुद्धसाक्षिभावं समवाप्नोति ।

जिज्ञासुः—वयं संसारिणः, संसारे च यावन्ति वस्तूनि तानि सर्वाण्येव नैव विशुद्धानि, अर्थान्न किमप्यत्र विशुद्धम्, तर्हि विशुद्धभोगसम्भावनैवापलप्येत, तदभावे च कथमस्माभिः प्रवृत्तिधर्मः पालनीयः ?

वक्ता—भोग्यवस्तूनि निश्चयेन मिश्रभावापन्नानि, तत्रांशतः शुद्धसत्त्वमपि विद्यते, परन्तु नानाविधमालिन्यमिश्रितत्वात्ततो निस्सारणमतिदुष्करम् । जीवस्य दैहिकं यन्त्रमेतादृशं निर्मितमस्ति यत् सामान्यतस्तेन भोग्यवस्तुनः शुद्धसत्त्वांशं विश्लेषणपूर्वकं निस्सार्यानन्दमयकोशे सम्प्रेषणमसंभवं प्रतीयते । परमेतादृशोऽपि सूक्ष्मोपायो येन शुद्धसत्त्वबिन्दुरानन्दमयकोशं यावदुत्थाय ततोऽप्युपरि विराजिताय परमात्मने निवेदितः सन् प्रसादरूपेण कारणशरीरे जीवात्मनो भोगो भवितुं शक्नोति । 'तेन त्यक्तेन भुञ्जीथाः' इतीशोपनिषन्मन्त्रेण भोगत्यागयोर्मार्मिकः समन्वयः प्रतिपादितः ।

जिज्ञासुः—इन्द्रियद्वारैः रूप-रस-गन्ध-आदि विषयाणां ग्रहणं किमनेनैव नियमेन सम्पद्यते ?

वक्ता—कोऽत्र सन्देहः । भोक्तुः भोगाय केनापि द्वारेण कोऽपि विषयो गृह्येत तत्र सर्वत्र एक एव नियमः । भगवतो मङ्गलमयविधाने सर्वमेव शुभोदर्कम् । उचितरीत्या भोगे कृते सति भोगोऽपि मङ्गलमयः ।

जिज्ञासुः—स्थिररेतसः ज्ञातप्रज्ञस्य समक्षं रूपादिविषयेषु समागतेषु तस्य देहस्यान्तः कीदृशी क्रिया जायते ?

वक्ता—यस्य ज्ञानस्य विकासोऽजायत यस्य च शुद्धशक्तिः क्रियाशीला अवर्तत तस्यान्तरिक्यः क्रियाः सामान्यमनुष्याणामान्तरिकीक्रियाभ्यः भिन्ना एव जायन्ते ।

जिज्ञासुः—प्रवृत्तिधर्मस्य पूर्णता निवृत्तिधर्मस्य च प्रारम्भः क्वास्ते ?

वक्ता—प्रवृत्तौ निवृत्तौ च पूर्णतः पार्थक्यम् । यस्य धर्मस्यानुष्ठानेनात्मनः सकलाः शक्तयः विकसिताः पूर्णरूपेण परितृप्ताश्च भवन्ति, प्रवृत्तिधर्मस्य स एव परम आदर्शः । आत्मनो मानवीयशक्तीनां पूर्णा तृप्तिः परमानन्दप्राप्तिर्वा प्रवृत्तिधर्मस्यास्य पराकाष्ठा वर्तते । यदेमाः पूर्णतां प्राप्तवत्यः शक्तयस्तृप्ताः सत्यो नित्याचलशिवभावेन सह एकाकारतामाप्नुवन्ति, तदैव निवृत्त्या आविर्भावो जायते । प्रवृत्तिधर्मस्यान्ते विशुद्धः परमानन्दो जागर्ति । परमानन्देऽस्मिन् भोक्ता, भोग्यं, भोगाश्च समेऽपि शुद्धाः । योऽयं नित्यप्रवृत्तिनिवृत्तिधर्मः स एव यथार्था उपासना । ज्ञाने उन्मिषिते सति इयमारभते, अस्या अवसानेन सहैव ज्ञानस्य पूर्णता सिद्धिं भजते ।

जिज्ञासुः—येष्वाधारेषु व्यावहारिको धर्मः प्रतिष्ठितो भवति धर्मतत्त्वपरिज्ञाने तेषां का स्थितिः ?

वक्ता—व्यावहारिकक्षेत्रे सर्वत्राधिकारो विचारणीयः । यस्य यादृश : अधिकारस्तस्य कृते तादृशधर्मस्यैवोपदेश उत्तमफलप्रदः । अधिकारस्य च तारतम्यं पूर्वजन्मनः कर्मसु, संस्कारे योग्यतायाञ्च निर्भरमस्ति । प्रकृत्याः रङ्गमञ्चे अधिकारस्य विषमता सुनिश्चितं दृष्टिपथमायाति ।

जिज्ञासुः—सदाचारस्य किं लक्षणम् ?

वक्ता—सद्भिः प्रतिपालित आचारः सदाचारपदेन व्यपदिश्यते । साध्वाचारोऽपि सदाचारः । परेषां साध्वाचरणं धर्मनिर्णयस्योपायस्वरूपं मन्यते । आचारस्य विशुद्धतया शारीरिकी पवित्रता, दीर्घायुः, आरोग्यं चित्तस्य स्थिरता च जायन्ते ।

शुद्धचेतसो मानवस्य प्रशंसा विधीयते, अपरत आचारवतो भावशुद्धिविरहितः प्रशंसां न भजते । अतो बाह्यचरणापेक्षया भावशुद्धौ विशेषः अभिनिवेशो विधेयः । यतो हि शरीरशुद्धिः चित्तशुद्धेः द्वारस्वरूपा । यदा शरीरं विशुद्धं तदा चित्तमपि शुद्धिमर्हति । शरीरं धर्मसाधनं कथ्यते । इदं नावगन्तव्यं यद्देहस्योपेक्षां कृत्वा धर्मस्य मार्गानुसरणं सुकरम् । शारीरिकतत्त्वं

शुद्धचित्तेन सह यदि प्रकर्षं न नीयते तर्हि चित्तमुच्चपदं प्राप्यापि माध्याकर्षणप्रभावेन भूमिसाद् भविष्यति। अस्मिन् गभीराणि रहस्यानि समाविष्टानि। येऽल्पदर्शिनस्ते स्थूलरूपेण मोहिता भूत्वा अस्य रहस्यमधिगन्तुं न पारयन्ति। पुरा ऋषिमहर्षिभिः देहतत्त्वस्य विवेचनात्यन्तसूक्ष्मभावेन कृता। अत एव तैः गर्भाधानसंस्कारादुपनयनसंस्कारपर्यन्तं नानाविधसंस्काराणां व्यवस्थां विधाय बीजगतगर्भगतदोषाणामपाकरणपूर्वकं शरीरशुद्धेः प्रक्रियायाः प्रचारः प्रसारो वा विहितः।

—डॉ० श्रीकृष्णशर्मा
संस्कृतविभागः, राजस्थानविश्वविद्यालयः,
जयपुरम्

विजयतां कविराजराजः

मन्त्रादिशास्त्रनिगमागमसम्प्रदाय–
प्राचीनसंस्कृतिविधानकृतावतारः।
तत्त्वप्रबोधदिनकृन्महितस्स गोपी–
नाथस्सदा विजयतां कविराजराजः॥

भक्ति-रहस्यम्

[म.म.गोपीनाथकविराजमहोदयानां 'भारतीय संस्कृति और साधना' इति नाम्ना प्रसिद्धे ग्रन्थे विविधदार्शनिकतत्त्वविवेचनपराः लेखाः सन्ति। तेषामन्यतमस्य भावानुवादोऽत्र प्रस्तूयते।—सम्पादकः]

कलौ युगे भक्तिसाधनायाः, तस्याः उपयोगिताविषये च किमपि कथनं नावश्यकम्। प्रायः समे विश्वसन्ति, शास्त्रवाक्यानि महापुरुषाणामनुभवोऽपि विश्वासं समर्थयन्ति यत् निर्बलमनुष्याणां भगवत्प्राप्तेः प्रधान उपायः भक्ति-साधनैव विद्यते न तु एकमात्र उपायः। भक्तिसाधनायाः रहस्यं न सर्वेभ्यो विदितचरम्। रहस्यज्ञानं विना कस्यापि तत्त्वस्य माहात्म्यं न हृदयङ्गमं भवति। अतः प्रबन्धेऽस्मिन् भक्तितत्त्वरहस्यविषये ज्ञानानुभवानुसारं संक्षेपेण किमपि वक्तुं चेष्टिष्ये।

साधनायाः सर्वे मार्गा आलोचनादृष्ट्या त्रिषु भागेषु विभक्ताः कर्तुं शक्यन्ते। अस्याः एकैको भागः साधनायाः प्रत्येकं स्थितेः द्योतको विद्यते। प्रथमभागस्य नाम प्रवर्त्तकावस्था द्वितीयस्य साधकावस्था तृतीयस्य च सिद्धा-वस्था भवति। प्रवर्तकावस्थायां क्रमशः द्वयोः स्थित्योः विकासः स्वीक्रियते, साधकावस्थायामपि क्रमशः द्वयोः स्थित्योः अभिव्यक्तिः दृश्यते, सिद्धावस्थायां कोऽपि एतादृशो भेदो नैवाप्यते। प्रवर्तकावस्थायां नामसाधनं प्रथमसाधना अस्ति। नाममाहात्म्यं भारते भक्तमण्डले नाविदितम्, यथा वाच्यवाचकयोः नित्य-सम्बन्धः तथैव नाम्नि नामवति कश्चन नित्य-सम्बन्धः तिष्ठति। वृक्षबीजेन यथा फलस्य सम्बन्धः, तथैव भगवन्नाम्ना भगवत्स्वरूपस्य सम्बन्धो-ऽप्यस्ति। भगवन्नाम अप्राकृतम् अचिन्त्य-शक्तियुतञ्चास्ति। भगवद्वदेव नामापि तस्य चिदानन्दमयं, परन्तु नाम्नि चिदानन्दयोः अभिव्यक्ति साधना-प्रभावेण भवति न तु स्वतः। यद्यपि तौ पूर्वतः अव्यक्तभावेन त्र तिष्ठतः।

नाम अनन्तशक्तिभाण्डारः। जाग्रत्पुरुषमुखात् निस्सृतनाम्नः का कथा, साधारणतः उच्चारितनाम्नि अपि स्वीयाशक्तिः विद्यमानास्ति। उच्चा-रयितुः शक्तियोगात् नाम्नः स्वशक्तिः आवरणहीना सती उज्ज्वला भासते। न भवेदेवं तदा तद् नामाभासमात्रं न तु यथार्थं नाम। यद्यपि नामाभासोऽपि न वृथा, तस्यापि सुफलं भवत्येव, वस्तुतः नामोच्चारणं कोऽपि कर्तृत्वभिमान-पूर्वकं न कर्तुं शक्नोति। भगवतः कृपयैव कस्यापि कण्ठमवलम्ब्य नाम ध्वनितं

भवति। स्वतश्चैतन्यमयाय ब्राह्यप्रेरणा नावश्यिका। परन्तु नामाभासे कर्तृत्वाभिमानः तिष्ठति। पुनरपि गुरोः दीर्घकालिकोपदेशात् आन्तरिक-शुद्धप्रेरणानुसारेण च उच्चारणे कृते सति नामाभासोऽपि कस्यापि भाग्य-शालिनः कण्ठात् नामरूपेण स्वतः ध्वनितो भवति।

दीर्घकालं नियमितनामसाधनेन भगवत्करुणोद्रेकः यथासमयं भवति, भगवान् पथप्रदर्शकगुरुरूपेण साधकपुरत आविर्भवति। नामसाधनया चित्त-देहयोः शुद्धिः यथासम्भवं भवति, तथापि भक्तः गुरुदत्तबीजमवाप्य यावद् अशुद्धबीजं देहं शुद्धदेहे न परिणमयति तावत् साधनायाः न वस्तुतः प्रारम्भो जायते। अर्थात् प्राकृतेन शरीरेण न साधना सम्भवति।

बीजसाधनेन बीजाभिव्यक्तिः, तस्याः प्रभावेण मलिनसत्ता दूरी-भवति। पाञ्चभौतिकस्य अशुद्धशरीरस्य संस्कारं विना प्राकृतसाधनमार्गे प्रवेशः दुष्करः वर्तते। गुरुणा दत्तसाधनेन भूतचित्ते शुद्धावस्थां धारयतः, तस्मात् पूर्वस्थिताशुद्धदेहो विगलति, स्वभावानुसारं च अभिनवो देहः प्रादुर्भवति।

स्वभावशरीरमेतत् "भावदेह" नाम्ना परिभाषितं निर्मलम्, अजरम-मरं क्षुत्पिपासाकामक्रोधादिभ्यः प्राकृतधर्मेभ्यः वर्जितं भवति। भावदेहममुं प्राप्य भक्तः प्रवर्तकावस्थातः साधकावस्थां गच्छति। जगत्प्रसिद्धा साधना सामान्यतः न साधना। स्थूलशरीरे तादात्म्यबोधे कृता साधना स्वा-भाविकसाधनारूपे न परिणमति। मानवसाधनमेव यथार्थसाधनम्। अभाव-शरीरे कुतो भावसाधनम्, अतः प्रवर्त्तकावस्थायाम् अभावशरीरं भावशरीरे परिणमयितुं चेष्ट्यते। नाम मन्त्रश्च प्रारम्भिकचेष्टायां सहायौ भवतः।

भक्तितत्त्वानुशीलनकर्तारो जानन्ति क्रियारूपा भक्तिः फलरूपायां भक्त्यां पर्यवस्यति। प्रवर्तकावस्थायां यत् क्रियते किञ्चित् तत्क्रिया भक्तौ अन्तर्भूता भवति। वस्तुतः न साधनभक्तिरेष अपितु कृत्रिमा साधनभक्ति-रस्ति। यतः प्राकृतशरीराभिमाने विद्यमाने प्राकृतसाधनभक्तिः नोदेति। कृत्रिमसाधनभक्तेरनुष्ठानात् साधनभक्तिः भावभक्तौ परिणता भवति।

शुद्धा भक्तिः महाभावांशः, तस्मात् भावरूपाशक्तिः महाभावादेव स्फु-टिता जायते। जीवः कर्म कुर्वन्नपि भावं नाप्तुं शक्नोति। कर्मणि पौनः पुन्येन क्रियमाणे सति भावजगतो जनेषु भावानुप्रवेशो भवति।

एवं भावोदयो भावजगत्प्रेरणया भवति। मायिकं शरीरं भावग्राहाय नैवोपयुक्तं, तस्मादत्र नैव भावोदयः। भावग्रहणयोग्याधारः साधनाप्रभावेण शुद्धीभूतो देहः भवति। भावोदयात् पूर्वं मृत्यौ जातायां भावजगति गतिः न लभ्यते। भावोदये सति भावदेहः कार्यं कुर्वाणः प्राकृतशरीरं निःसारं करोति।

भावदेहः प्राकृतेन देहेन सह योगयुक्तोऽपि प्राकृतदेहानुरूपो न भवति। अतोऽस्यां स्थित्यां शास्त्रवाक्यानुरूपं गुरुवाक्यानुसारं वा विधिनिषेधं स्वीकृत्य कर्तव्यं भवति।

स्वभावविकासे सति बाह्यशिक्षा नैवावश्यिका यः यत्स्वभावः, तदनुसारं करोति व्यवहरति वा। तत्काले स्वभाव एव गुरुः नियामको भवति न कोऽपि बाह्यनियन्त्रकः तिष्ठति।

भावदेहः बाह्यदेहानुरूपो न भवति। वृद्धः गलितनखदन्तः पलितकेशोऽपि भावदेहे विपरीतः अवलोक्यते। भक्तः यस्य भावस्य साधको भविष्यति, भावदेहः तत्सदृश एव भवति। कोऽपि मातृभावसाधकः अस्ति तदा तस्य शरीरं शिशुरूपं भवति। अर्थात् बाह्यदेहभेदेऽपि भावदेहः शिश्वाकारः स्यात्। यथा मातुः आह्वानाय न शिक्ष्यते बालोऽपितु स्वभावतः नियम्यते तद्वदेव भक्तो यदि शिशुः तदा मातृभक्तिः नैव शिक्षणीया भवति। स्वभाव एव तं संचालयति। स यत् करिष्यति तदेव भजनं भवति।

संसारे अपरिमिता भावाः विराजन्ते। महाभाव एकः। एकैकस्य भावस्य स्ववैशिष्ट्यं भवति, अतः भावमर्यादां स्वीकृत्य भावसाधनमार्गे अग्रेसर्तव्यम्। बाल्ययौवनवार्धक्यवद् भावानाम् अङ्गोपाङ्गानि विलासाः च पृथक् पृथक् भवन्ति। भावसाधकानां गुरोरावश्यकता नास्ति।

भावविकासः प्रेम। भावसाधनायां क्रियमाणायां स्वतः प्रेम आविर्भवति। प्रेमाविर्भावे सति भगवतः दर्शनं भवति प्रत्यक्षम्। भावानामनन्ता यथा तथैव भगवत्स्वरूपाणामानन्त्यम्। प्रतिभावं यथा भक्तस्य स्वरूपं संश्लिष्टं तथैव भगवत्स्वरूपमपि संश्लिष्टं भवति। भावः प्रेम वा नैव भिन्नः। प्रेम्णः अभिव्यक्तिं विना इष्टस्य भगवत्स्वरूपस्य प्रकाशो न भवति। अर्थात् प्रवर्तकावस्थायां द्वे आवरणे अभिन्नत्वेन विद्यमाने स्तः। एकं प्रमातृस्वरूपमाच्छाद्य अपरं प्रमेयस्वरूपमाच्छाद्य तिष्ठति। भावविकासेन प्रमेयावरणम् उन्मुक्तं भवति अन्वेषणं च समाप्तिं गच्छति प्राप्तिश्चेश्वरस्य भवति। इयमेव प्रेमावस्था। भगवद्धाम्नः प्राप्तिरपि भावदेहप्राप्तिं विना न सम्भवति, भगवद्धाम एकमपि भावानुसारेण अनन्तं भवति।

भावः स्थायिसञ्चारिभेदेन द्विविधि उक्तः। आविर्भूय संचारिभावः कार्यं कृत्वा तिरोभवति न तु स्थायिभावः तथा। अयमेव स्वभावः। यः भावस्य स्थायिन्यामवस्थायामागच्छति स वस्तुतो भक्तः। एतत्कृते भक्ताः नाममन्त्रयोः साधनामहत्त्वं स्वीकुर्वन्ति। स्थायिभावो भावदेहस्य नामान्यततमं भवति। भावविकासेन सहैव हृदि प्रविशति। स्थायिभावोऽष्टभावेषु

विवृतो भूत्वा प्रकाशते भावान् च महाभावरूपेण परिणमयति। एतदेव भावसाधनारहस्यम्, महाभाव एव भावसाधनालक्ष्यं विद्यते।

प्रत्येकभक्तस्य कृते भावसाधकस्य वा कृते अष्टानामपि भावानां जागरणं भवति आवश्यकम्। अन्यथा कोऽपि भावः चरमविकासावस्थां यावत् नैव अभिव्यक्तो भवितुमर्हति। यथा कमलविकासाय जलपूर्णसरोवरेण साकं भूमेः तेजोमण्डलस्य आकाशस्य च आवश्यकता भवति, अर्थात् नीचैः रसस्य उपरिष्टात् रश्मेः संयोगेन कमलं प्रस्फुटति तथैव भावविकासाय ज्ञानस्वरूपं चिदाकाशे स्थितं सूर्यमण्डलं विद्यते आवश्यकम्, तथा च रसोद्गममूलकारणं स्थायिभाव आवश्यकः, यतो भवति तस्यैव विकासः।

भावविकासात् पूर्वं तदुपयोगिक्षेत्रनिर्माणं भवति। नामसाधनानन्तरं मन्त्रसाधनायाश्च पूर्वं शनैः शनैः क्षेत्रमिदं निर्मीयते। निर्माणकाले लक्षितं न भवति, दृष्टेः उन्मेषेण सहैव पश्चात् लक्ष्यते। इदमेव क्षेत्रं जलहीनं सरः, तदेव भावसरः यत्र भावः कलिकारूपेण स्फुटति, किरणमासाद्य प्रेमकमलं भवति भावाभिन्नरूपं तत्। यथा स्फुटितं कमलं सरोवरात् उपरि भवति, तथैव भावविकासे सति क्षेत्रं त्यज्यते। भावाश्च महाभावरूपो भवन्ति। अष्टौ भावा अपि महाभावाङ्गानि एव भवन्ति, समष्टिरूपो भावानां महाभावः, भावानां पूर्णविकासो महाभावः। महाभावं प्रति द्वौ मार्गौ गच्छतः प्राधान्येन, आवर्तक्रमेण सरलरूपेण च। आवर्तमार्गानुसारं परिक्रमां कृत्वा भावाद् भावान्तरं प्राप्नुवन् महाभावं प्रविशति, तथा च महाभावस्य पूर्णस्वरूपमधिगच्छति। सरलमार्गेण महाभावप्रवेशे सत्यपि तस्य पूर्णस्वरूपं नोपलभ्यते।

प्रचलितदृष्टान्तमाध्यमेन विषय एवं ज्ञातुं शक्यते—भक्तिशास्त्रेषु शान्तदास्यसख्यवात्सल्यमाधुर्यादिपञ्चमुख्यभक्तिभावा वर्ण्यन्ते। प्रत्येकभावस्य स्वीकीयं वैशिष्ट्यं भवति। भाववैशिष्ट्यानुरोधेन यादृशं भक्तिवैशिष्ट्यं निरूप्यते अन्यतः तादृशमेव भावस्य परिपक्वावस्थायाम् आविर्भूतस्य भगवतो वैशिष्ट्यं निरूपितं भवति। शान्तो भक्तः यादृशो भविष्यति तत्समक्षं प्रकटितभगवत्स्वरूपमपि तादृशमेव भविष्यति।

प्रश्न उदेति—शान्तभाव एकदृष्ट्या अन्यनिरपेक्षः पूर्णश्च, तथैवान्यदृष्ट्या पूर्णः सन्नपि पूर्णतया भावान्तरमपेक्षते। यथा शिशुः शिशुरूपे पूर्णः, तथापि क्रमपरिणामहेतुना बालककिशोरयुवकरूपेण परिणतो भवति। तथैव शान्तो भावरूपेण निरपेक्षः पूर्णश्च। सत्यमेतत्, पुनरपि शान्तभावस्य परिणतौ सख्यभावादीनां क्रमविकासः अस्वीकर्तुं न शक्यते। एकैकस्य भावस्य विकासेन सह एकैकस्य गुणस्य अभिव्यक्तिः भवति। तस्मात् अनया प्रणाल्या

महाभावं प्राप्य सर्वे सम्भाव्यगुणाः अभिव्यक्तिं भजन्ते। वैयक्तिकपार्थक्यं भावैक्येऽपि स्थास्यति।

ह्लादिन्याः शक्तेः वृत्तिविशेषस्य नाम भावः। अयमेव भक्तेः स्वरूपम्। परिपक्वावस्थायां प्रेम इदमेव उच्यते। जीवाणुः भावस्य आश्रयः। जीवः अन्तःकरणं च दैहिकसम्बन्धकाले पृथक् पृथक् भासते तथापि उभयोः तादात्म्यम्। तस्माद् भावस्य अवतरणं जीवे भवति तथापि अन्तःकरणवृत्तिरूपेण प्रथमं प्रतिफलति। किन्तु अन्तःकरणस्य वृत्तिः न भवति। देहान्तकरणयोः शुद्धयोः सतोः स्वभावविकासः जायते। तथा भावोऽयं स्थूलदेहं परित्यज्य भावदेहेऽभिव्यक्तो भवति।

भावसाधनाया दिशाद्वयमस्ति। एकस्यां गुणवृद्ध्या साकं शान्ताद्दास्यं दास्यात् वात्सल्यादिपूर्णगुणोदयेन सह माधुर्यं विकसितं भवति। एवमेव माधुर्यमवाप्य सामञ्जस्यसाधारणत्वयोः परिहार आवश्यकः, तत्पश्चात् साधनक्रमस्य सम्यगवलम्बनेन महाभावं प्रति अग्रेसतुं सम्भवति। विशिष्टव्यक्तिषु कृपादिनिमित्तेन स्वतो वा उत्कर्षसत्वेन उपयुक्तसाधनक्रमगुरुत्वं न्यूनं जायते। अन्यस्यां दिशि गुणवृद्धेः चेष्टामकृत्वा स्वगुणाबद्धतया स्वभूमौ विद्यमानत्वे सत्यपि भावं प्रेम्णि परिणमयितुं चेष्टनीयं भवति। शान्तो भावः शान्तः सन्नपि प्रेम्णि परिणतो भवति। एतदर्थं दास्यभावेऽथवा तदनुरूपान्यभावे विकासो नास्ति आवश्यकः। प्रेमावस्थायां यावत् परिपक्वतां जातायां भावविषयभूतस्य भगवतो दर्शनलायः प्रत्येकभावमाध्ययेन भवितुमर्हति। तत्कृते भावान्तराश्रयो नावश्यकः प्रतीयते। एतदपि सत्यं भगवद्दर्शने जाते भविष्यति वा रसाभिव्यक्तौ लीलायामधिकारे सत्यपि एकस्यां भावसीमायां स्थातव्यं भविष्यति। पूर्वं कमलं चर्चितम्। अष्टदलकमलस्य आन्तरिकबाह्यभेदेन द्विविधत्वमस्ति। आभ्यन्तकमलं बिन्दुस्वरूपं भवति बाह्यं च बिन्दोः अष्टदिशा दलानां समष्टिरूप विद्यते। बाह्यं कमलं भावराज्यं ज्ञेयम्। अत्र नैरन्तर्येण अष्टभावक्रीडा चलति।

एते मौलिका अष्टभावाः अष्टकालिकलीलायाः कालातीताष्टविभागाः सन्ति। एतेषां दलाष्टानां परिक्रमां प्रपूर्य मध्यबिन्दौ प्रवेशः सम्भवति। मध्यबिन्दुः माधुर्यमयः। विश्लेषिते सति मध्यबिन्दोः अष्टविभागाः भवन्ति। एतेषु प्रत्येकं भागो मध्यबिन्दोः अवयवो एव यस्य नाम "कला" इति ख्यातन्। एताः कलाः अष्टौ "अष्टसखी" इति उच्यते। अत्रापि बाह्यान्तरभेदः। एतेषां भावाष्टानां निष्कर्षरूपनिर्यासः योऽस्ति स वास्तविको महाबिन्दुः–महाभावः। महाभावे विकासावसरो भवति उत्कर्षगततारतम्यभेदात्। अस्य विकासस्य चरमा परिणतिः वैष्णवशास्त्रेषु महापुरुषानुभूत्यां च "श्रीराधातत्वम्" इति नाम्ना वर्णिता। भावसाधनायाः

फलमेतद् यत् जीवो बाह्याष्टदलानां प्रथमदलेनावृत्तः सन्नपि क्रमशः महाभावस्य अन्तिमविकासं यावत् उपतिष्ठते। तत्काले पूर्णरसोपलब्धौ पूर्णमेलनं समरसता च भवति। बाह्याष्टदलारूपान्तराष्टदलमध्ये अपरिगणिताः अवान्तरभेदाः सन्ति।

रसस्योक्तस्याभिव्यक्तिः भावराज्ये सर्वत्र भवितुमर्हति, किन्तु भावस्यान्तरविकासः अवश्यं स्वीकर्तव्यो भवति। यदि कोऽपि भावः स्वरूपे विशुद्धतया स्थितो भवेत् तदा प्रेमरूपपरिपाके जाते सति स्वस्वभावानुसारेण, भगवद्दर्शनेन, रसोपलब्धिक्रमेण च तदनुरूपलीलारस आविर्भवितुमर्हति। किन्तु रसस्यास्य पूर्णता मधुरता तदैव सम्भाव्यत यदा भावानां गुणवृद्ध्या सम्भाव्यान्यविकासा अपि जायेरन्।

—**अर्कनाथचौधरी**
प्राध्यापकः
केन्द्रीय-संस्कृत-विद्यापीठं, जयपुरम्

भातु भारतम्

—**वैद्यरामस्वरूपशास्त्री**

मुनिभिरर्चितं देवपूजितं
श्रुतिभिरूर्जितं शास्त्रचर्चितम्।
प्रकृतिभूषितं ज्ञानसुन्दरं
भुवनवन्दितं भातु भारतम्॥१॥

सुरसरित्तटं सिन्धुशोभितं
रुचिरपर्वतं कान्तकाननम्।
कृषकसंकुलं सस्यसम्भृतं
विपुलगोव्रजं भातु भारतम्॥२॥

भागवते ईश्वर-रूपम्

[ब्रह्मलीन-स्वनामधन्यमहामहोपाध्याय-श्रीगोपीनाथकविराजविरचितस्य बिहार-राष्ट्रभाषा-परिषत्प्रकाशितस्य 'भारतीय संस्कृति और साधना' नामक—ग्रन्थस्य द्वितीय-खण्डे हिन्दीभाषानिबद्धस्य 'भागवत में ईश्वर का रूप' निबन्धस्य सारानुवादः —सम्पादकः]

प्रत्येकं दार्शनिकप्रस्थानं धर्मसम्प्रदायश्च स्वस्वदृष्टिकोणमनुसृत्य जीवेश्वरयोः स्वरूपनिरूपणे चेष्टापरौ सञ्जातौ। श्रीमद्भागवतेऽपि विभिन्न-प्रसंगावसरेष्वेवंविधाऽऽलोचना दरीदृश्यते। इमामालोचनामवलम्ब्याऽऽचार्य-प्रवरैरेकस्य बृहतो विराट्साहित्यस्य सृष्टिर्विहिताऽस्ति। वयन्तद्विषये किञ्चिन्मतामतमनभिव्यज्य केवलं मूलग्रन्थस्याभिप्रायन्तात्पर्यञ्चाभिलक्ष्य यथासम्भवं यत्किञ्चिदुन्मीलयितुं प्रयतिष्यामहे। श्रीमद्भागवते समुपदिष्ट-तत्त्वस्य यथार्थरूपेण व्याख्यां विधातुं विरक्ता एव जनाः सक्षमाः सन्ति। यतो हि प्रसिद्धिरस्ति—

'ब्रह्मानुभवसम्पन्नाः शास्त्रज्ञाश्चानसूयवः।
तात्पर्यरससारज्ञास्त एवात्राधिकारिणः॥'

अर्थात्—ये ब्रह्मानुभूतिसम्पन्नाः, शास्त्रमर्मवेदिनोऽनसूयास्तथा तात्पर्यज्ञाः सन्ति त एव भागवतस्य गूढार्थप्रकाशनेऽधिकारिणः सन्ति। वर्तमानो निबन्धस्तादृशी चेष्टा नेति कथनं व्यर्थमस्ति। अयन्तु केवलं महापुरुषाणां पदचिह्नान्यनुसरतोऽस्य जनस्य स्वकीयव्यक्तिगतजिज्ञासानिवृत्तेरल्पमुद्यम-मात्रमस्ति।

अहमेवासमेवाग्रे नान्यद् यत्सदसत्परम्।[1]
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम्॥ (भा० २/९/३२)

अर्थात्—सृष्टेः पूर्वं केवलमहमेवाऽऽसम्—द्वितीयन्नान्यत् किञ्चिदासीत्। तदाऽहमासं केवलमात्रम्, न काचित् क्रियाऽऽसीत्। तदा सत्—अथवा कार्यरूपः स्थूलभावो नासीत्, असत्-अथवा कारणरूपः सूक्ष्मभावो नासीत्, एतावद्धि यदुभयोः कारणभूतं प्रधानमपि मय्यन्तर्लीनमासीत्। सृष्टेः पश्चाद-प्यहमेवाऽऽसम्, अर्थात् अयं प्रपञ्चसंभारोऽथवा विश्वोऽप्यहमेवास्मि। सर्वं-

मिदं वस्तुतो मत्तः पृथग्भूतन्नास्ति। पुनश्च, प्रलयकाले सर्वस्मिल्लीने जाते एकोऽहं केवलमवशिष्ये। अतोऽहमनादिरनन्तोऽद्वितीयः परिपूर्णस्वरूपोऽस्मि।

अतो ज्ञातं भवति यन्निर्गुणं सगुणं जीवो जगत् सर्वमेव ब्रह्म।[२]

अहमधिकस्पष्टरूपेण विभिन्नदृष्टकोणैरिमं विषयमवगन्तुं चेष्टिष्ये। चैतन्यमेव ब्रह्म भगवत्स्वरूपं वाऽस्त्यस्मिन् सन्देहो नास्ति। किन्त्विदं यावत्सत्त्वगुणोपाधिनाऽवच्छिन्नं भवति, तावदिदमव्यक्ते निराकारे च रूपे विद्यमानं तिष्ठति। इदमेव साधारणतया निर्गुणब्रह्मरूपेण वर्ण्यते यदा चैतत्सत्त्वावच्छिन्नं भवति तदैतत् साकारेण निराकारेण वा रूपेणाऽऽत्मानं प्रकटयति। वस्तुतो निराकारं साकारञ्चैकमेवाऽखण्डं वस्त्वस्ति। चिद्वस्तुस्वरूपतोऽव्यक्तमस्ति, अदः प्रकृतिसत्त्वगुणसम्बन्धेन व्यक्तं भवति। व्यक्तं सदपि तदेकमेव तिष्ठति। रजोगुणसंयोगेन सैवैका सत्ता विचित्रनानाविधरूपेष्वाभासिता भवति। तथैव तमोगुणसम्बन्धेन नानात्वस्य तिरोधानं भवति। इयं याऽव्यक्तसत्ताया व्यक्तताऽस्ति, सैव स्थितिरुच्यते, इयं विशुद्धसत्त्वगुणस्य व्यापारोऽस्ति। अस्मिन् यानि बहूनि रूपाणि स्फुटितानि जायन्ते, सैव सृष्टिरिति प्रोच्यते। अस्या अन्तर्लीनप्रकृत्याः प्राकट्यमेव सृष्टेर्नामान्तरमस्ति। कालान्तरे च तद् बहुरूपमुपसंहृतं भवति। इदमेव संहार इत्यभिधीयते। इत्थं पूर्वं स्थितिस्ततः सृष्टिस्ततः संहार इति। निर्मलसत्त्वे रजस्तमसी आकर्षणविकर्षणरूपेण, निमेषोन्मेषरूपेण संकोचविकासरूपेण वा क्रमशः क्रीडानिरते तिष्ठतः।

अस्माभिर्भगवतः सत्त्वावच्छिन्नसाकारस्वरूपस्य निरूपणं विहितम्, तत् सत्त्वगुणस्य तारतम्यवशान्मूलत एकं सदपि विभिन्नरूपेषु प्रतीत भवति। सत्त्वं विशुद्धमिश्रभेदेन द्विविधमस्ति। मिश्रसत्त्वमेकगुणमिश्रणेनाथवा द्विगुणमिश्रणेन द्विप्रकारकमस्ति। एकगुणमिश्रणवशान्मिश्रसत्त्वं रजोमिश्रतमोमिश्रभेदेन द्विविधमस्ति। अत एव भगवतः साकाररूपं चतुर्विधं यावदुपलभ्यते। यथा—

प्रथमम्—शुद्धसत्त्वावच्छिन्नं चैतन्यम्। इदं विष्णुरिति कथ्यते। द्वितीयम् रजोमिश्रसत्त्वावच्छिन्नं चैतन्यम्। अस्यापरं नाम ब्रह्माऽस्ति। तृतीयम्—तयोः मिश्रसत्त्वाच्छिन्नं चैतन्यम्। अस्य शास्त्रीयसंज्ञा रुद्र इत्यस्ति। चतुर्थम्—समरजस्तमोभ्यामुभाभ्यां मिश्रितं सत्त्वावच्छिन्नं चैतन्यम्। इदमेव पुरुषोऽस्ति।

जगतः सृष्टिस्थितिसंहाररूपव्यापारे ब्रह्मा, विष्णुः, रुद्रः—एते त्रयो निमित्ताः, एवं सर्वत्र पुरुष एव उपादानकारणमस्ति। परन्त्वेते चत्वारो ब्रह्मण एव साकाररूपाणीति पूर्वमुक्तचरमेव। अत एव भागवतमतानुसारेण ब्रह्म एव

जगतो निमित्तमुपादानरूपमुभयकारणमस्ति । तदनु कार्यात्मकं जगदपि ब्रह्मैवाऽस्ति । अत एव ब्रह्म स्वयमेव कार्यं, स्वयमेवोपादानं, स्वयमेव निमित्तमस्ति । निराकारदृष्ट्या यदि दृश्येत तर्हि तत्कार्यमपि तथा कारणमपि नास्ति। तत्तु यदस्ति तदेवास्ति तथा सदैव तदेव तिष्ठति । सृष्टिप्रभृतयस्तित्वन्द्रजालमिवाविर्भूयाज्ञानदृष्ट्या तस्मिन् केवलमारोपिता भवन्ति । शुद्धज्ञानदृष्ट्या तु अयमारोपोप्याकाशकुसुममिवालीकमस्ति ।

तस्य निराकाररूपमेव परमरूपमस्ति। इदं हि गुणातीतं, कालेनापरिच्छिन्नं, निर्विकारं शान्तमद्वयमस्ति, इदमेव विष्णोः परमं पदमस्ति ।

न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ।
न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान् प्रधानम् ।।
परं पदं वैष्णवमामनन्ति तद् यन्नेति नेतीत्यतदुत्सिसृक्षवः ।
विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे ।।

(भागवत २/२/१७,१८)

अर्थात्—यत्र देवगणनियामककालस्येषदपि प्रभुत्वं नास्ति, अत एव देवेषु जागतिप्राणिनियन्त्रणकारिषु सत्स्वपि तत्र तेषां प्रभावः स्थातुन्नैव शक्नोतीति कथनमनावश्यकमस्ति । यत्र सत्त्वरजस्तमोगुणा न सन्ति, यत्राहंकार महत्तत्त्वयोस्तथा प्रकृतितत्त्वस्यास्तित्वं नास्ति । यं परमपूज्यं भगवन्तं योगिजनाः, 'इदं नेति इदं नेती'त्यनेन विचारेण तद्भिन्नपदार्थपरिजिहीर्षया विषयासक्तिवर्जनपूर्वकमनन्यप्रेमप्लावितहृदयेन पदे पदे समालिङ्गन्ति—तदेव विष्णोः परमं पदं प्रोक्तमस्ति । अस्यैव परमरूपस्य वर्णनप्रसंग एव देवक्या स्तुतिप्रसंगेनाभिहितम्—

रूपं यत्तत् प्राहुरव्यक्तमाद्यं ब्रह्मज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः ।।

(भागवत १०/३/२४)

अर्थात्—प्रभो ! वेदे त्वदीयं यद्रूपमव्यक्तरूपेण तथा सर्वस्यादिभूतरूपेण वर्णितमस्ति, यच्च व्यापकं ज्योतिःस्वरूपमस्ति, यद्गुणहीनं तथा विकारहीनमस्ति, यन्निर्विशेषं निष्क्रियं सत्तामात्रमस्ति, तदेव बुद्ध्यादिप्रकाशको विष्णुः स्वयं त्वमेवासि ।

अस्य निर्गुणपरमेश्वरस्याद्योऽवतार एव पुरुषोऽस्ति—

'आद्योऽवतारः पुरुषः परस्य ।'

(भागवत २/६/४२)

परमेश्वरस्य येंऽशाः प्रधानगुणभागिनः, अर्थात् प्रकृतेः प्रकृतिजन्यकार्यस्य वीक्षणं नियमनं प्रवर्तनादिं च विदधति, ये स्वरूपत एकत्वेन स्थित्वापि

नानाप्रकारैः स्वविग्रहांशं बभज्य निखिलप्राणिजातस्य विस्तारं कुर्वन्ति, ये च मायासम्बन्धविरहिता अपि मायया सम्बद्धा इव प्रतीयन्ते, ये च सर्वदा चिच्छक्तियुक्ताः सन्ति, त एव पुरुषाः प्रोच्यन्ते। अस्मादेव पुरुषाद्भिन्नभिन्नावताराणामभिव्यक्तिर्भवति। एते संकल्पमात्रेण सर्वाणि कार्याणि सम्पादयन्ति, अतः प्रकृतौ प्राकृते च जगति प्रविष्टाः सन्तोऽप्यचिन्त्यशक्तिमत्त्वात् तैस्तेऽस्पृष्टा सदा शुद्धा एव तिष्ठन्ति। श्रीमद्भागवते प्रतिपादितमस्ति—

भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन्।
स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः॥
(भागवत ११/४/३)

अर्थात्—आदिदेवो नारायणः प्रकृतावधिष्ठितः सन् पञ्चानां महाभूतानां सृष्टिं करोति तथा तेभ्यश्च ब्रह्माण्डनाभिकाया विराट्पुर्या अथवा देहस्य रचनां विदधाति। तदनन्तरं तस्मिन् स्वांशेनाथवा जीवकलाद्वारेण प्रविष्टः सन् पुरुषाख्यां प्राप्नोति। अयं दृश्यमानत्रिभुवनसन्निवेशस्तस्य शरीरमस्ति, समष्टिव्यष्टिजीवानामिन्द्रियाणि (उभयात्मकानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च) तस्य दिग्वातादीन्द्रियजन्यानि सन्ति, जीवस्य ज्ञानंतस्य स्वरूपभूतसत्त्वजन्यम्, तथा जीवस्य बलं तेजः क्रिया चैतानि तत्प्राणजन्यानि सन्ति। सत्त्वादिगुणद्वारेण स एव विश्वस्य स्थित्यादेरादिकर्ताऽस्ति—विष्णुब्रह्मरुद्रनामकास्त्रयोऽवताराः केवलं प्रयोज्यकर्त्तारः सन्ति।

भागवते (८।२०।२१–३३) वामनरूपवर्णनप्रसंगे पुरुषस्य रूपवर्णनमस्ति। इदं त्रिगुणात्मकमिति तत्रोल्लिखितमस्ति। तस्मिन् भूः, आकाशम्, द्युलोकः, पातालम्, मेघाः, तिर्यग्योनिः, मनुष्याः, देवताः, ऋषयः—इत्यादयः स्थावरजङ्गमाः सर्वे पदार्था अवलोकिता आसन्। ऋत्विगाचार्यसदस्य वर्गैः सह बलिर्महाविभूतिसम्पन्ने श्रीहरेर्गुणात्मके देहे त्रिगुणमयं विश्वं दृष्टवान्। तस्मिंस्तैः पञ्चभूतानि, दशेन्द्रियाणि, पञ्च तन्मात्राः चत्वार्यन्तःकरणानि जीवस्य सत्ता चैतानि प्रत्यक्षं दृष्टानि—

काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत्।
ददर्श विश्वं त्रिगुणं गुणात्मके भूतेन्द्रियार्थाशयजीवयुक्तम्॥
(भागवत ८।२०।२२)

अर्जुनो यथा श्रीभगवत्प्रदत्तदिव्यचक्षुःसाहाय्येन तस्य भगवतो विश्वरूपमपश्यत्, बलिरपि तथैव भगवत्कृपया दिव्यं चक्षुः प्रापेति कथनमनावश्यकमस्ति।

भगवतः परमरूपदर्शनात्पूर्वमिदं विश्वरूपदर्शनं प्रायोऽधिकांशाः साधकाः प्राप्नुवन्ति। बुद्धदेवोऽपि सम्यक्सम्बोध्यधिगमात् पूर्वमस्य विराट्-

रूपस्य दर्शनं चकार, अस्य वृत्तस्योल्लेखोऽश्वघोषेण तच्चरितग्रन्थे बुद्धचरिते महाकाव्ये विहितोऽस्ति—

'ददर्श निखिलं लोकमादर्श इव निर्मले ।'

पुरुषावतारानन्तरं गुणावतारस्य विषय आलोचनार्होऽस्ति । पूर्ववर्णितस्याद्यपुरुषस्य सर्वप्रथमं जगत्स्रष्टुं रजोगुणांशाद् ब्रह्माऽजायत, स्थित्यै सत्त्वगुणांशाद् धर्मब्राह्मणगणरक्षको यज्ञपतिर्विष्णुः, एवं संहर्तुं तमोगुणांशाद्रुद्रोऽजायत । त्रिगुणमाश्रित्यैवमेकः पुरुष एव तत्तन्नामानि धारयन् जगत उत्पत्तिरक्षाप्रलयानां व्यवस्थामाचरन्तिष्ठति । एषु ब्रह्मणो वाहनं हंसो विष्णोर्गरुडस्तथा रुद्रस्य वृषभोऽस्ति । एषां क्रमशः कमण्डलुः, चक्रम्, त्रिशूल इत्यादीनि विशिष्टलिङ्गानि सन्ति । (भागवत ८।१।२४)

शुद्धसत्त्वात्मकविष्णुरूपस्य विशेषवर्णनं भागवतेऽन्यत्र स्थलेऽस्ति (१०।८६।५४–५६) । तस्य दर्शनं श्रीकृष्णोऽर्जुनेन सह द्वारकायां मृतब्राह्मण प्रत्यानेतुं गत्वा गर्भोदके कृतवान् । श्रीकृष्णार्जुनौ दिव्यं रथमारुह्य पश्चिमां । दिशं प्रति प्रतस्थे तथैवं सप्तद्वीपान्, सप्तसागरान् लोकालोकपर्वतञ्चोल्लंघ्य घनान्धतमसि प्रविष्टौ । तस्मिन्निबिडान्धकारे दिव्याश्वानामपि गत्यवरोधः सञ्जात आसीत् । तदा कृष्णस्यादेशेन सहस्रसहस्रांशुरिव अत्युज्ज्वलं तस्य सुदर्शनचक्रं किरणजालं विकीर्यान्धकारराशिं छिन्नभिन्नं विदधत्तीव्रवेगेन पुरस्ताच्चलितुं प्रववृते तथैव तन्निर्दिष्टमार्गेण रथोऽग्रसरोऽबोभूयत । एवं स तं विपुलान्धकारं भित्त्वा परात्परे स्थितां महाज्योतिं ददर्श ।[३] अर्जुनस्तज्ज्योतिश्चाकचिक्यमसहमानः स्वचक्षुषी निमिमेष । तत्पश्चाद् घोरवायुवेगेन विक्षुब्धा जलराशिरदृश्यत ।[४]

अस्मिन्तटरहित उत्तालतरंगाभिव्याप्ते समुद्रे एकमत्यन्तविशालदीप्तिमद्भवनं दृष्टिगोचरमभवत् । श्रीधरमतेनेदमेव महाकालपुरमस्ति । इदं भवनं सहस्रसंख्याकैर्देदीप्यमानमणिरचितस्तम्भैः सुशोभितमासीत् । तत्र सहस्रशिरस्को भगवान् शेषनागो व्यराजत, यस्य प्रत्येकं शिरस्युज्ज्वलमणिमयफणमण्डलमशोभत तथा शरीरमत्यन्तभयानकमद्भुतञ्चासीत् । भगवान् महाविष्णुरस्यां शेषनागशय्यायां शयान आसीत् । तस्य घनमेघ इव श्यामशरीरकान्तिः, पीताम्बराणि, प्रसन्नमुखमुद्रा, चारुदीर्घनेत्रे, मणिरचित-मुकुटकुण्डलानि, अनिबद्धदेदीप्यमानकेशराशिः, श्रीवत्सचिह्नं कौस्तुभं, वनमालाभूषणानि दीर्घाष्टभुजाः शोशुभ्यन्ते स्म । तं परितः सुनन्दनन्दप्रभृतिपार्षदगणाः मूर्तिमच्चक्राद्यायुधानि च विराजन्ते स्म । मूर्तिमती श्रीः, कीर्तिरजा तथा सर्वा ऋद्धयस्तं पर्यवरन् ।

तस्यैतद्यद्रूपं वर्णितं, तदेव तस्यैकमात्रं रूपं नास्ति । स इच्छारूपसत्त्वाद् भक्तेच्छानुसारमाकारं दधाति । यदा ये भक्तास्तस्य यद्रूपस्य दर्शनं कामयन्ते स तत्समीपे तेनैवरूपेण स्वात्मानमुद्भावयति । भागवतेऽभिहितम्—

त्वं भावयोग–परिभावितहृत्सरोज
आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम् ।
यद् यद्धिया त उरुगाय विभावयन्ति
तत्तद् वपुः प्रणयसे तदनुग्रहाय ।।

अर्थात् भो विष्णो ! त्वं पुरुषाणां भक्तियोगेन शोधितेषु हृत्कमलेष्वभिव्यज्यावतिष्ठसे । तव पथोऽथवा स्वरूपस्थितेः परिचयः केवलमात्रं वेदादेवावगम्यते । अत एव भक्तवृन्दाः तव यद् यद्रूपं स्वमनस्सु चिन्तयन्ति, त्वं तेषामनुग्रहाय तत्तद्रूपेणाऽऽविर्भवसि ।

भागवतेऽन्यस्थले लिखितमस्ति यद् भगवान् अरूपी अस्ति । वस्तुतस्तस्य किमपि रूपन्न, अर्थात् तस्य स्वतः सिद्धं रूपन्नास्ति । परन्तु स्वभक्तेषु यस्मै यद्रूपं रोचते तदेव तद्रूपं बोद्धव्यम्—

'तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव ।
यानि यानि च रोचन्ते स्वजनानामरूपिणः ।।'

एतावत्पर्यन्तमस्माभिः पुरुषावतारा गुणावताराश्चाऽऽलोचिताः । मुमुक्षवो जनाः समाध्यवस्थायां तं पश्यन्ति । किन्तु येषां साधकानां चित्तं व्युत्थानावस्थामुल्लंघ्य समाहितं न सञ्जातं तेषां कृतेऽन्यदीयस्यावतारस्य ध्यानचिन्तनयोर्व्यवस्थाऽऽस्ते । अस्य दिव्यजन्मनामलौकिकनानाविधकर्मणां श्रद्धया सह भावनायां विहितायां साधकस्य विघ्ननाशे इष्ट प्राप्तौ च सहायता जायते । एते सर्वेऽवताराः–कल्पावताराः, मन्वन्तरावताराः, युगावताराः स्वल्पावतारा इति भेदेन चतुःप्रकारका भवन्ति । वाराहाद्यवताराणां वर्णनं द्वितीयस्कन्धस्य सप्तमेऽध्याये विलोक्यते । चतुर्दशमन्वन्तरैः सह सम्बधानां चतुर्दशमन्वन्तरावताराणां विवरणमष्टमस्कन्धस्य प्रथमे पञ्चमे द्वादशे त्रयोदशे चाध्याये समुपलभ्यते । शुक्लादिवर्णभेदेन युगावताराश्चत्वारो भवन्ति । एतदतिरिक्ताः सृष्टिव्यापारे ब्रह्मा, प्रजापतिगणाः ऋषिगणास्तपः स्थितिव्यापारे धर्मो, यज्ञो, मनुरमरोऽवनीशोऽथवा राजा तथा संहारकार्येऽधर्मो, हरो, मन्युवशः (सर्पः), एते सर्वे मायाविभूतिगणा अप्यवतारेषु परिगण्यन्ते ।

गुणातीतं निराकारस्वरूपमेव भगवतः परमं रूपमास्त इति पूर्वं प्रतिपादितमास्त । किन्त्वस्य रूपस्य धारणाऽतिकठिनाऽस्ति । प्रथमभूमौ त्रैगुण्यविषयका धारणा कर्त्तव्या । एषैव पुरुषरूपे चिन्तनमस्ति । अनया चित्ते किञ्चित्स्थिरतां गते द्वितीयभूमौ द्वैगुण्यधारणा विधातव्या । एषा ब्रह्मणो रुद्रदेवस्य च चिन्तनमस्ति । अजयोर्युगपद् ध्यानमसंभवन्नास्ति । यद्यपि ध्यानकाले द्वे मूर्ती तिष्ठतस्तथापि द्वयोरुभयोरभिन्ना भावना करणीया । अनया द्विविधधारणया रजोगुणे तमोगुणे चाऽभिभूते सति मुमुक्षुणा सत्त्वगुणं जेतुं

तृतीयभूमौ शुद्धसत्त्वमयविष्णोरवधारणाविधेया । तदनन्तरं चतुर्थभूमौ निर्गुणधारणाया अधिकारः प्राप्नोति। मनुष्यस्य बुद्धिः स्थूलसूक्ष्मक्रममाश्रित्यार्थं स्पृशति । अतस्त्रिगुणात्मके भगवत्स्वरूपे मनः समाधाय स्थिरं करणीयम्। ततो द्विगुणात्मके रूपे ततश्च शुद्धसत्त्वमये रूपे तथाऽन्ते च निर्गुणसूक्ष्मब्रह्मणि प्रविष्टः सन्नित्यनिरतिशयरूपं ध्यायन् ध्यायन् कृतार्थो भवेत्।

– मदनमोहनशर्मा
भू. पू. प्रवाचकः
राजस्थान–विश्वविद्यालयः, जयपुरम्

पाद–टिप्पण्यः

१. ऋग्वेदसंहितायाम् (८/७/१७) अस्या अवस्थायाः—"नासदासीन्नो सदासीत् तदानीम्।" एवमन्यत्र "तस्माद्धान्यत्र न परः किञ्चनास" कथयित्वा वर्णनं कृतमस्ति।

२. आचार्य वामनेनात एव श्रुतिकल्पलताया उपोद्घाते कथितमस्ति "निर्गुणं सगुणं जीवसंज्ञितं जगदात्मकम्। एतच्चतुर्विधं ब्रह्म श्रीमद्भागवते स्फुटम्।" तद्धि स्वरूपतो निर्गुणं मायायोगेन सगुणमविद्याकारणात् प्रतिबिम्बरूपेण जीवस्तथा-विवर्तरूपेण जगदस्ति।

३. अस्या भागवतज्योतिरितिनाम्ना श्रीधरस्वामिना व्याख्या विहिताऽस्ति।

४. इदं यद् गर्भोदकमुक्तन्तस्य हेमाद्रिणोल्लेखः कृतोऽस्ति । गर्भोदकस्यावस्थानादि-सम्बन्धे विशेषवर्णनमागमसाहित्ये समुपलभ्यते। सप्तद्वीपेष्वन्तिमो द्वीपः पुष्करोऽस्ति । अयं हि स्वादुजलराशिभिः परिवेष्टितोऽस्ति । अस्य स्वादुजलसमुद्रस्य बहिस्ताद् सुवर्णभूमिरस्ति। इयं हि देवतानां क्रीडास्थली वर्तते। तदग्रे वलयाकारो लोकालोकपर्वतोऽस्ति। लोकालोकस्यान्तर्भागे सूर्यः प्रकाशते, बाह्यभागे सूर्यस्य प्रकाशो न याति। सूर्यो मेरुलोकालोकयोर्मध्ये वर्तते । सूर्यलोकस्य बहिर्भागे घोरान्धकारोऽस्ति। तद्द्रष्टुन्न शक्यते। तदनन्तरं जीवहीनो गर्भोदनायकः समुद्रराजोऽस्ति । सप्तसमुद्राः सप्तद्वीपमयी पृथिवी चाप्यस्य गर्भे स्थिताः सन्ति। गर्भोदकस्य बाह्यभागे ब्रह्माण्डरूपकटाहोऽस्ति। इदमेव प्रचलितं मतमस्ति। सिद्धयोगीश्वरतन्त्रमतानुसारेण लोकालोकस्य निकरे तथा गर्भोदकसमुद्रस्य तीरे कोषेयमण्डलमवस्थितमस्ति। सहस्राधिकसिद्धपक्षिमण्डलावेष्टितः सन् पक्षिराजो गरुडस्तस्मिन् स्थाने प्रतिवसति। □

कविराजो जयति सदा

—डॉ० सुभाषो वेदालंकारः

विद्याभूषण-गोपीनाथः कविराजो वै जयति सदा,
यद्गुणगीतं स्मारं स्मारं धन्यो लोको भवति सदा ।।
विद्याभूषण...... ....

यः पारदृश्वा वेदस्मृतीनां यस्सर्वदर्शनचूडामणिः,
यश्शास्त्रवेत्ता शास्त्रप्रणेता साहित्यसिन्धोरमरो मणिः,
सततं स्मरामो वयन्तं भजामो मनसा नमामो देवं मुदा ।।
विद्याभूषण..................

यो वङ्ग-संस्कृत-फ्रैञ्चांग्लजर्मनभाषासु नैकासु विद्वद्वरः,
अमृतवाचा लेखन्या च सर्वासु तासु लीलापरः,
कथन्न भवेत्स लोकाभिवन्द्यो मान्यो वदान्य इह सर्वदा ।।
विद्याभूषण..................

सुधामयं यद्वचनं रराज नवनीतनीतं हृदयं तथा,
कीर्तिश्शरच्चन्द्रमयूखरम्या शुशोभ धन्येन्दुकला यथा,
वित्तं तदीयं चित्तं तदीयं लोकोपकारे लग्नं सदा ।।
विद्याभूषण..................

मन्त्रे तन्त्रे शक्तौ शरण्यो यो योगविज्ञानविद्विश्रुतः,
यस्तान्त्रिकाणां मूर्ध्निस्थितो वै विद्वद्वरेण्य इह सुश्रुतः,
स सूर्य-सिद्धान्तसुधीस्सुधन्यः सततं स्तुत्यः स्तुतशारदः ।।
विद्याभूषण..................

पद्मविभूषण-सम्मानेन यस्सर्वकारेण सत्कृतः,
महामहोपाध्यायेति वाचा वाचस्पतिर्य इह संस्तुतः,
अमरो यशसा धवलेन लोके भवतु जयतु स सर्वदा ।।
विद्याभूषण..................

संस्कृत-विभागे सहायक-आचार्यः
राजस्थान-विश्वविद्यालयः, जयपुरम्

——–

श्रीगुरुः शरणम्

—श्रीराजेश्वरशास्त्री द्राविडः

[म.म.गोपीनाथकविराजमहोदयानां व्यक्तित्वमृषिपरम्परानुरूपमासीदिति सुविदितमेव। व्यक्तित्वानुरूपन्तेषां सम्मानमभिनन्दनञ्चापि बहुधा कृतं, कविराज-अभिनन्दनग्रन्थमपि प्रकाश्य तेषां गौरवस्मरणं विहितं विद्वद्भिः। प्रथितविदुषा विरचितोऽयं लेखस्तस्मादेव ग्रन्थादत्र साभारमुद्ध्रियते। —सम्पादकः]

श्रीमन्तः सुगृहीतनामधेयाः म. म. गोपीनाथकविराजमहोदयाः स्वत एव स्वकीयेन गुणगौरवेण विदुषां साधारणानां वा समवाये परिचिता इत्यहो! अतीवामीषां वैदग्ध्यम्।

"यदि सन्ति गुणाः पुंसा विकसन्त्येव ते स्वयम्।
न हि कस्तूरिकामोदः शपथेन विभाव्यते॥"

वस्तुगत्या ये सारस्वतं सारं लब्धवन्तस्तेषां प्रवृत्तिर्न केवलं स्वार्थाय, अपि तु जगतां हितायानितरसाधारणी भवति। भवति च तेषां वचनरचनाप्यतिहृद्या। "विद्यावतां समस्तकार्यजातमेव गिरां दवीयः" इति लोकप्रसिद्धोदाहरणस्य सार्थकत्वं श्रीमत्सु पं० कविराजमहोदयेष्वस्माभिर्दृष्टमिति महत्सौभाग्यमस्माकम्। ईदृशानां विदुषां सम्माननेन शासकपदालङ्कृता अधिकारिणः स्वीयं कर्तव्यं यदि न निर्वहन्ति तर्हि नायं दोषस्तेषां विदुषामपि तु शासकानामित्येतेभ्यो महाभागेभ्यो राजकीयसंस्कृतमहाविद्यालये पुस्तकालयाध्यपदं प्रदाय शासकैर्गुणपरिचयप्रौढिः प्रारम्भे प्रकटीकृता।

"पुरो वा पश्चाद्वा वयमुपविशामः क्षितिभुजां
ततः किं नश्छिन्नं वचनरचनाक्रीतजगताम्।
अगारे कान्तारे कुचकलशभारे मृगदृशां
मणेस्तुल्यं मूल्यं सहजसुभगस्य द्युतिमतः॥"

इत्युक्तन्यायेन विद्वांसो यत्र कुत्रापि वा तिष्ठन्तु, विद्यायाः सुखानुभूतिर्हि तेषाममूल्यं वस्तु, तेनाध्यक्षपदं तेन च वैदुष्यमुभाभ्यां च शासकः शोभते।

"प्रायशश्चित्तानित्यत्वान्मनुष्याणामश्वसधर्माणो हि मनुष्या नियुक्ताः कर्मसु विकुर्वते" इति न्यायेन पदारूढाः कृपणानां वेदनां नानुभवन्ति, परन्तु

कविराजानां स्वभावे वैपरीत्यमेवास्माभिरनुभूतमित्यहो ! तेषामनुपमेयं स्वभावसारल्यम् ।

यदा स्वनामधन्यानां पूज्यपादानां प्रातःस्मरणीयानां गुरुचरणानां भट्टाचार्यमहोदयानां सविधेऽहं प्रामाण्यवादग्रन्थमपठम्, तदा प्राभाकरमतप्रसङ्गेन तत्रोपवर्णितं मीमांसकमतं हि मनसि नारूढम् । निदाघातपेन तप्तस्याल्पतमजलप्राप्त्या पिपासावृद्धिरिव मीमांसकमतजिज्ञासा अधिकोदिता । दैवात्तदानीं श्रीकविराजमहाभागाः पुस्तकालयाध्यक्षपदे समासीना आसन्, सरस्वतीभवने सारस्वतपुस्तकागारसत्त्वान्मीमांसकमतमुपलब्धुं शक्यते, किन्तु तदुलपलब्धिर्भवेत्कथमिति चिन्तयन्नेव भीत इवाहं कविराजमहोदयानपश्यम् । तदानीमेतैः सरलहृदयैरध्यक्षपदासीनतया इदमेव फलं यज्जिज्ञासूनां पुस्तकप्रदानेन सेवा नामेति महता हर्षेण झटित्येव दाक्ष्यपूर्वकं मुद्रितं भाट्टरहस्यमवलोकनाय प्रदत्तम् ।

प्राभाकरमतं सन्दिग्धमेवासीत्, अधुना पं० सुब्रह्मण्यशास्त्रिप्रकाशितया प्रसिद्धया प्रकरणपञ्चिकया जयपुरीनारायणभट्टीसमेतया तदवगतम्, इति अतिकठिने नैयायिकानां दुरूहतमे मीमांसकमतविन्यासे कविराजमहोदयानां स्वभावसारल्येन जातं साहाय्यं, जीवनेऽस्मिन् विस्मतुं न शक्नोमि ।

"अमात्यसम्पदोपेताः सर्वाध्यक्षाः शक्तितः कर्मसु योज्याः" इत्युक्त्यनुसारेण अमात्यसम्पदन्तर्गतेषु गुणेषु स्मृतिगुण एतेष्वियानासीत्, योऽधुनान्यत्र दुर्लभ इव भासते । सारस्वते भाण्डागारे स्थितानामेतेषां कुत्र किं लिखितं वर्तते इति विषयो नाविदितः । अम्भसि कमलपत्रमिव सारस्वते जले न ह्यन्तःकरणं तेषां शुष्कमासीत् । अमुं स्मृतिगुणं विशिष्टमुपलभ्य शासकैर्हठादेते राजकीयसंस्कृतमहाविद्यालयस्य प्रधानाध्यक्षपदमलङ्कर्तुं सम्प्रार्थिता अत्याग्रहेण तत्पदं समलञ्चक्रुः । तदानीमपि विद्वत्सु समासीनः पक्षपातोऽभिवर्धमानो मया दृष्टः ।

"विद्या ददाति विनयम्" इत्युक्तिं यथार्था स्वचरित्रेण सर्वान् विदुषः प्रदर्शयामासुः ।

अत्यन्तमभ्यर्हिततमं प्रत्यभिज्ञादर्शनं पठनपाठनपरम्पराविलोपेन दुरूहं जातमासीत्, परन्तु तस्य प्राकट्यकरणेन स्फोटवादादीनां रहस्याविष्करणेन च विदुषामज्ञानरूपस्य तमसोऽपसारणनिमित्तं श्रेय एभिरेव महाभागैरुपलब्धम् । योगशास्त्रविषये त्वनेकशो लेखाः प्रसिद्धिं गताः यैरेतेषां कीर्तिर्दिगन्तेऽप्यविश्रान्ता सती नृत्यति । ईदृशं विद्यारसिकत्वं येषु केषुचिद्विरलेषु दृश्यते तेषु श्रीमतां महाभागानां नामधेयं पुरत उपस्थितं भवतीति सुस्पष्टमेव विद्वत्त्वमेतेषाम् । स्वभावत एव सत्यपि सर्वत्र वैदुष्ये योगविषये विशेषत एव

लब्धपाण्डित्या एते गुरुभक्तिमनुसृत्य अन्तरायतया लब्धमपि महत्पदं परित्यज्य विजिज्ञासया गुरुचरणान् सेवितुं तदाश्रममेव शरणममन्वन्तेति महदिदं गुरुभक्तिमूलत्वादेवैते महति पदे समास्थिता अपि जनपदविद्वेषभाजो न बभूवुरपि तु नित्याधिकारस्थितियोग्यतां प्रादुर्भावयामासुरिति कियद्वा वर्णनीयमेतेषां शीलविषये ।

अनेकशो दुरूहविचारावसरे मम परामर्शस्थानमिमे महाभागा एव तत्त्वपक्षपातिनो वर्तन्ते, यथा—राजनीतिवर्गस्थापनाप्रसङ्गे वेदापौरुषेयत्वानुमानस्य, तथा "शान्ति का अग्रदूत"-निर्माणस्य च ससङ्गे मया एषां विदुषां मनस्तोषः समुपलब्धः ।

वाचस्पत्यपरीक्षावसरे तु एतेषां सङ्गतिरनेकशो लब्धा ।

एवं सर्वभारतीयकाशिराजन्यासद्वारासञ्चालितायां "पुराण"-पत्रिकायां पुराणविषये "हाजरा"–महोदयकृतस्याक्षेपस्य खण्डनावसरेऽप्येतैः सह परामर्शः कृतः । केषुचन विद्वत्सु पूजननिमित्तेन वृत्तिवितरणं स्वशक्त्या भवत्विति सङ्कल्प्य शास्त्ररक्षासमितिर्गुरुवर्यैः पितृचरणैश्च श्रीमतां शास्त्रिमहाभागानां साहाय्येन संस्थापिता । अद्याप्येषामेव कविराजमहोदयानां परामर्शानुसारेण मया तत्समितिकार्यं प्रचाल्यते । एतादृशानां सर्वमान्यानां महतां विषये यत्किञ्चिल्लेखनं नाम सूर्यस्य पुरस्तद्दीपप्रदर्शनमिव भवेदिति स्वपरिचयमात्रं प्रदर्श्य विरम्यते ।

यावत्कीर्तिर्मनुष्यस्य पुण्या लोके प्रगीयते ।
तावत्स पुरुषव्याघ्र ! स्वर्गलोके महीयते ॥

—विदुरनीतिः

दीक्षास्वरूपम्

[म. म. गोपीनाथकविराजविरचिते बिहार-राष्ट्रभाषा-परिषत्पटनातः प्रकाशिते 'तान्त्रिक वाङ्मय में शाक्त-दृष्टि' इति ग्रन्थे तन्त्रमन्त्रादि-सम्बद्धविषयविवेचनपरा लेखाः सन्ति। तस्य पृष्ठ२७–४१तः गृहीतस्य लेखद्वयस्य सारानुवादोऽत्र प्रस्तूयते। – सम्पादकः]

दीक्षा हि गुरुणा दीयते। प्रथमन्तु सः शिष्यात्मना सह एकीभूय तत्स्थं चैतन्यं भोगेभ्यः शोधयति तदनन्तरं ज्ञानदीक्षया चिदानन्देच्छाज्ञान-क्रियादीः शक्तीस्तदात्मन्युद्भावयति। इत्थं दीक्षायां गुरुणा द्वे क्रिये क्रियेते— शिष्यस्य पाशानां नाशः, शिवत्वयोजनं च।

पाशानां नाशः सृष्टिव्यापारेणाधिगन्तुं शक्यते। चिदानन्दपरमेश्वरः स्वकीयया उन्मनाशक्त्या स्वस्वरूपभित्तौ जगतो वाच्यवाचकपदार्थान्नव-भासयति। इमे ग्राह्यग्राहकभूताः वाच्यवाचकांशाः त्रिस्तरीयाः परः, सूक्ष्मः, स्थूलश्च। ग्राहकभागे तु वर्णमन्त्रपदानि ग्राह्यभागे च कलातत्त्वभुवनानि समाविश्यन्ते। सूक्ष्मतमो वर्णः अभेदविमर्शकः, किंचित् स्थूलत्वे प्राप्ते स मन्त्रो भूत्वा भेदाभेदविमर्शकः, स्थूलतमावस्थायां पदरूपेणावभासयन् स भेदज्ञानस्य हेतुर्भवति। एवमेव परमेश्वरस्य वाच्यरूपिणी कलाशक्तिरपि उत्तरोत्तरं तत्त्वभुवनानां रूपान् धारयति। भगवतः स्वातन्त्र्येण तस्यां क्रमः दर्पणनगरवद् भासते। यथा वृक्षः बीजे शक्तिरूपेणावतिष्ठते तथैव परवर्तिनोंऽशाः पूर्ववर्तिषु विद्यन्ते। अत एव कथितम्–'सर्वं सर्वात्मकम्' इति।

परमेश्वरस्य अनुग्रहशक्तिः शिवाभिन्नगुरोः हृदये पारमार्थिकतया प्रस्फुरति। अनयैव शक्त्या शिष्यस्य पशुत्वनिवृत्तये षडध्वनां संकोचभावो दूरीक्रियते, अपि च दीक्षाज्ञानयोगादिभिः अध्वानः शुद्ध्यन्ते। इत्थं शक्तिरूपेण गुरुः मन्त्रादीनां शोधकः, पश्वात्मनि स्थिताः मन्त्राश्च शोध्याः।

दीक्षा सामान्यविशेषरूपत्वेन द्विप्रकारा। विशेषदीक्षाया भूमिका-भूता सामान्यदीक्षा समयदीक्षा इति कथ्यते। दीक्षायामस्यां शिष्यः गुरुणा रुद्रपदेन संयोज्यते, तेन च समयधर्माणां पालनमावश्यकम्। शिष्यस्य मूर्ध्नि आशीर्वादरूपेण शिवहस्तार्पणमेव समयदीक्षा, येन विभिन्नानां पाशानाम-ङ्कुराः नाश्यन्ते, ते च फलोत्पादनेऽसमर्थाश्च क्रियन्ते। भगवतः शक्तिपातो-द्रेकेन यस्य हृदये श्रद्धाभक्ती उदिते, स एव दीक्षायै कल्पते। अनया दीक्षितः

शिष्यो गुरोः शुश्रूषणे देवानाञ्च अर्चने अधिकारी भवति। विशेषदीक्षार्थं शक्तिपातस्य तीव्रता आवश्यकी। विशेषदीक्षया आत्मनः कर्मसंस्काराः न केवलं परिपच्यन्ते अपि तु क्षमावस्थां प्रत्यपि नीयन्ते। अस्या दीक्षायाः अनन्तरमेव शिष्यो मन्त्रं ग्रहीतुमिष्टदेवताञ्चार्चितुं समर्थः। अनया दीक्षितो वागीश्वर्याः गर्भे द्वितीयजन्मलाभात् पुत्रक इति कथ्यते। दीक्षायामस्यां शिष्य ईश्वरपदेन संयोज्यते, तेन च पुत्रक-धर्मः पालनीयः।

शक्तिपातस्य अतितीव्रतया शिष्यो निर्वाणदीक्षायोग्यो भवति। अस्यां स शिवपदे संयोज्यते। अनया दीक्षितः शिवधर्माणामनुष्ठानं कर्तुं शक्नोति। अस्याः प्रभावेण सर्वज्ञत्वं षाड्गुण्यादयो भगवद्धर्मा अभिव्यज्यन्ते। कलादिषडध्वनां शुद्धिमन्तरेण पूर्णत्वं न लभ्यते, यतो हि पाशान् उच्छेत्तुं सर्वाध्वनां शुद्धिरावश्यकी। समयदीक्षया पुत्रकदीक्षया वा पशुत्वं न निवर्त्यते। समयिनः पूर्वजन्मसम्बन्धकारणेन पुत्रकस्य च आणवमलावस्थानेन पशुत्वं न निवर्तते। द्विजन्मा पुत्रको दीर्घकालं प्रयत्नेनैव निर्वाणदीक्षां प्राप्तुं शक्नोति। साधक एव निर्वाणदीक्षाया अधिकारी।

आगमानुसारेण मोक्षवद् भोगोऽपि पुरुषार्थः। भोगार्थिनः मोक्षार्थिनश्च दीक्षया स्वकीयमिच्छितं फलं प्राप्तुं शक्नुवन्ति। फलसाधनायाः कारणेन भोगार्थी साधक इति कथ्यते। लौकिकं फलमाप्तुकामः स लोकधर्मी, अलौकिकञ्च फलमाप्तुकामः शिवधर्मीति संज्ञां प्राप्नोति। साधकः मन्दशक्तिपातेन लोकधर्मी, मध्यशक्तिपातेन च शिवधर्मी भवन् दीक्षां प्राप्नोति। शिवधर्मी साधको मन्त्रतन्त्राणां रहस्यानि जानाति, मन्त्र-मन्त्रेश्वरपदञ्च प्राप्नोति। कश्चित् मायातीतेषु भोगभूमिषु प्रलयपर्यन्तं निवसति, कश्चित्तु विविधाः सिद्धीः प्राप्नोति। लोकधर्मिदीक्षायां मन्त्राराधनं न क्रियते। साधकाः फलाकांक्षया तानि पुण्यकर्माणि कुर्वन्ति, यानि श्रुतिस्मृतिषु इष्टापूर्तत्वेन वर्णितानि। एतेषां शुभकर्मणां शुभफलानि च प्राप्नुवन्ति, सञ्चितान्यशुभकर्माणि च दीक्षायाः प्रभावेण भोगभूमिष्वेव नश्यन्ति। अपि च संचितानि शुभकर्माणि अणिमादिसिद्धिषु परिवर्तन्ते, प्रारब्धकर्माण्येव भोक्तव्यानि। भोगानन्तरमिदं शरीरं नश्यति, दीक्षितः साधकश्च अणिमादिसिद्धीनामैश्वर्याणि भोक्तुं गुरुणा लोकान्तरं नीयते। तत्रापि यदि भोगवासना नावसीयते तर्हि वासनानुरूपं भोगार्थं गुरुणा लोकान्तरं नीयते, भोगावसाने यदा वैराग्यमुदयते तदा स तस्मिन्नेव लोके परमेश्वरस्य निष्कलरूपेण संयोज्यते। कश्चित्तु मायातीतभुवनेषु केनापि भुवनेश्वरेण सह संयोज्यते, अन्ततश्च सायुज्यं प्राप्नोति। फलभोगानामिदं न्यूनाधिक्यं साधकानामुत्कर्षानुसारं विद्यते।

मोक्षार्थिनां दीक्षा द्विविधा–सबीजा निर्बीजा च। निर्बीजदीक्षायां सद्यो निर्वाणदायिनी दीक्षापि समाविष्टा। बालकमूर्खवृद्धस्त्रीव्याधिग्रस्तजनानां

कृते निर्बीजदीक्षा विहिता, यतो हि ते शास्त्राध्ययने न निपुणाः, अपि च व्रतचर्यादीनां क्लेशान् सोढुं न शक्नुवन्ति । तैः समयाचार-पालनं नावश्यकम्, दीक्षायाः प्रभावेण गुरुभक्त्या च तेषां मुक्तिर्भवति ।

सबीजदीक्षा विदुषां कष्टसहिष्णूनां च शिष्यानां कृते विद्यते । एभिः समयाचारपालनमावश्यकम् । सबीजदीक्षायां पुत्रकदीक्षा आचार्यदीक्षा च समाविष्टे । आभ्यामेव दीक्षाभ्यां वागीश्वर्या गर्भे जन्म शुद्धधाम्नि च अवस्थान-विहारयोरधिकारः प्राप्यते । जन्मान्तरेण पुत्रक आचार्यो वा शुद्धविद्याया राज्येऽस्मिन् प्रवेष्टुं न शक्नोति । गुरुः द्वितीयजन्मप्रदाता पिता । बैन्दवस्य मन्त्रदेहस्य वा प्राप्तिरेव द्वितीयं जन्म । बिन्दुः महामाया कुण्डलिनीशक्तिर्वा अस्य देहस्योपादानम् । एकविंशत्यवान्तरसंस्कारेभ्य इदं जन्म सिद्ध्यति । एतदनन्तरमपि त्रयः संस्कारा भवन्ति—भोगसंस्कारः, अधिकार-संस्कारः, लयसंस्कारश्च । अन्तिमः संस्कारो निष्कृतिसंस्कारो विद्यते । इत्थं द्वितीय-जन्मनो निष्कृतिपर्यन्तं जीवः निखिलपाशेभ्यस्तेषां संस्कारेभ्यश्च मुच्यते ।

एतदनन्तरं शिवत्वयोजना क्रियते । एतदर्थं त्रयोदशप्रमेयानाम् आगमजज्ञानं स्वानुभवश्च आवश्यकौ । योजनक्रियायां प्रथमतः सद्गुरुणा शिष्यस्य पुर्यष्टके सूक्ष्म-देहे च विद्यमानस्याहंबोधस्य निवृत्तिः क्रियते । स्वप्नावस्थायां पुर्यष्टकं प्राणाश्रितं सुषुप्तौ च शून्याश्रितम् । गुरुणा शास्त्र-ज्ञानेनानुभवेन च स्वप्नाश्रितं प्राणपदं शाम्यते शून्ये वा लयीक्रियते ।

तदनन्तरं सुषुप्तेराश्रितं शून्यपदमपि शान्तं क्रियते । प्राणशून्यपदयोः शान्तयोः सतो आत्माविद्याशिवपदानां व्याप्तिः ज्ञातव्या । आत्मनो व्याप्ति-रस्ति शुद्धात्मदशायाः अनुभवपर्यन्तम् । परमशिवेन सह योगस्त्रयोदशप्रमेयानां ज्ञानमन्तरेण न शक्यते ।

दीक्षार्थं योजनक्रिया अत्यावश्यकी । अशुद्धतत्त्वेभ्यः उद्धार्य भक्तस्य अभिमते सकलतत्त्वे निष्कले वा योग उत्तमेन भावनामयज्ञानेन विना न सिद्ध्यति । प्रथमं गुरुणा तत्तत्त्वं साक्षात्कृतं भवितव्यम्, येन सह शिष्यः संयोजनीयः । निम्नतत्त्वेषु योजनायाः प्राप्ताः सिद्धयः मुक्तौ न सहायिकाः । केषाञ्चिन्मतानुसारं सदाशिवादिभिः ऊर्ध्वतत्त्वैः योगजाभिः सिद्धिभिः सर्वं जगदपि मोचयितुं शक्यते ।

ज्ञानिनश्चतुर्विधाः सन्ति । एकः श्रौत-ज्ञानवान्, द्वितीयश्चिन्तामये ज्ञाने न्यूनाभ्यासवान्, तृतीयश्चिन्तामये ज्ञाने अत्यभ्यासवान्, चतुर्थश्च भावनामयज्ञानवान् ।

योगिनोऽपि चतुर्विधाः—सम्प्राप्तः, घटमानः, सिद्धः सुसिद्धश्च । येन केवलं योगोपदेशः प्राप्तः स सम्प्राप्तः, अभ्यासवान् योगी घटमानः, अभ्यस्त-ज्ञानवान् योगी सिद्धः, सुसिद्धो योगी तु साक्षात् सदाशिवसदृशः ।

ये स्वस्वरूपान्न च्यवन्ते ते शिवरूपिण एव जीवमात्रस्य मोचकाः। ते परम्परया विद्येश्वरैः मुक्तिकार्यं कारयन्ति । अनेनैव कारणेन मालिनी-विजयतन्त्रे अभ्यस्तज्ञानवानेव गुरुः कथितः, न तु सिद्धिसम्पन्नो योगी। मोक्षार्थिभिः स्वभ्यस्तज्ञानवान् गुरुरेव आश्रयणीयः, यदि वर्तमानो गुरुस्तादृशो नास्ति तदा तस्य शास्त्रे त्यागोऽपि कथितः, यथा—

"आमोदार्थी यथा भृंगः पुष्पात्पुष्पान्तरं व्रजेत् ।
विज्ञानार्थी तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत् ॥"

केषाञ्चन आगमानुसारीणां मतमस्ति यद्दीक्षामन्तरेण मुक्ति-रसम्भवा। केचन कथयन्ति यच्छक्तिपातेनैव मुक्तिः प्राप्यते, दीक्षा आवश्यकी नास्ति। तथ्यन्त्विदमस्ति यच्छक्तिपातानन्तरमेव दीक्षा प्राप्यते। शक्तिपात-तारतम्यमेव दीक्षाभेदे कारणम्। तीव्रतमे शक्तिपाते सति अनुपायक्रमेण दीक्षा दीयते यथा क्षणेनैव मोक्षसिद्धिः। उक्तमपि—

"तस्य दीक्षां विनैव आत्मसंस्कारपरिणामतः।
सम्यग्ज्ञानं भवेत् सर्वशास्त्रेषु परिनिष्ठितम् ॥"

बाह्यदीक्षा सर्वत्र आवश्यकी नास्ति, किन्तु आत्मसंस्काररूपामा-न्तरदीक्षां विना मोक्षोऽसम्भवः।

—वीणा अग्रवाल
प्राध्यापिका—संस्कृत-विभागः,
राजस्थान-विश्वविद्यालयः, जयपुरम्

कविराजानां वाङ्मयसृष्टिः

—डॉ. रूपनारायणत्रिपाठी

महापुरुषाणां लोकयात्रेयं लोकोपदेशायैव भवतीति कथनं महामहोपाध्यायगोपीनाथकविराजमालक्ष्य समीचीनं प्रतिभाति । श्रीकविराजमहोदयानां दार्शनिकचिन्तनं साहित्याराधनञ्च भारतीयसंस्कृतेः साहित्यस्य चादर्श इव मन्यते विद्वद्भिः । बाल्यकालादेव तैः साधितं साहित्याराधनं जीवनपर्यन्तमव्यवहितं प्रचलितमिति तेषां रचनाबाहुल्येन जीवनचर्यया च सुस्पष्टीभवति । १९०४ ईशवीये सप्तदशवर्षीयाः कविराजमहोदयाः ढाकायां यदा नवमकक्षायामध्ययनरता आसन् तदा तेषां सर्वप्रथमरचना 'से खाने' इति बंगलाकविता 'बान्धव' (नवपर्याय) मासिकपत्रिकायां प्रकाशिताभवत् । तत्पश्चात् मैमनसिंहनगरात् प्रकाशितायाम् 'आरती'पत्रिकायां विश्वकविरवीन्द्रनाथस्य 'हृदय-यमुना' इति शीर्षककविताया आलोचनात्मकपरिचयः प्रकाशितोऽभूत् । ततश्च कलिकातातः प्रकाशितं 'प्रवासी'पत्रे ढाकातश्च 'प्रतिभा'पत्रिकायामाङ्ग्लभाषायामेतेषां प्रतिभापरिचायकाः समीक्षात्मका बहवो लेखाः प्रकाशमागताः । एवमुत्तरोत्तरं साहित्य-साधनानिरतैरेभिः सन्तचरित–पुरातत्त्व–साहित्यानुसन्धान –समालोचना–संस्मरण-दर्शन–योग –तन्त्र–भक्ति–शाक्त–बौद्धदर्शनसम्बद्धा बहवो लेखाः, निबन्धाः, ग्रन्थाश्च विरचिताः, सम्पादिताः, पुस्तकानाञ्चानेकेषां प्रस्तावनालेखाः शुभाशंसनानि चापि विलिख्य वाग्देव्या यत्समाराधनं विहितं, तत्तेषां सर्वविद्यावैदुष्यं सर्वविषयनैपुण्यञ्च प्रथयतीति नात्र संशयलेशः ।

श्रीकविराजमहोदयविरचितानां लेख-शोधनिबन्ध-ग्रन्थप्रस्तावनादिसमेषामेकत्रोल्लेखः कर्तुं तेषां विस्तरेण परिचयादिकञ्च प्रस्तोतुं नैव शक्यते, तथापि स्वकीयाल्पधिया संक्षेपेण नामोल्लेखमात्रमत्र विधीयते ।

मौलिकग्रन्थ-परिचयः

महामहोपाध्यायगोपीनाथकविराजमहोदयानां मातृभाषा बंगला आसीत् । तस्मिंश्च काले आङ्ग्लभाषायां शिक्षाक्रमस्य प्राबल्यमवर्तत, संस्कृतसाहित्ये भारतीयसंस्कृतौ चैतेषामासीदतीव जिज्ञासा । एवंप्रकारेण कविराजवर्याणां मौलिकग्रन्था बंगलायामेवाधिक्येन प्राप्यन्ते । तदनु हिन्द्यामाङ्ग्लभाषायाञ्च ग्रन्थरचना विहिता । अत्र समेषां परिचयार्थमेतेषां मौलिकग्रन्थानां नामोल्लेखः संक्षेपेण क्रियते ।

हिन्द्यां रचिता ग्रन्थाः

१. भारतीय संस्कृति और साधना (दो खण्ड)
२. पूजातत्त्व
३. तान्त्रिक वाङ्मय में शाक्त-दृष्टि
४. श्रीकृष्ण प्रसंग
५. काशी की सारस्वत-साधना
६. तान्त्रिक साहित्य
७. साधुदर्शन और सत्प्रसंग (दो भाग)
८. अमर वाणी

बंगलाभाषायां प्रकाशिता ग्रन्थाः

१. श्री विशुद्धानन्द प्रसंग (तीन खण्ड)
२. अखण्ड महायोग
३. विशुद्ध वाक्यामृत
४. पूजा
५. भारतीय साधनार धारा
६. साहित्य चिन्ता
७. तान्त्रिक सिद्धान्त ओ साधना
८. श्रीकृष्ण प्रसंग
९. साधुदर्शन ओ सत्संग
१०. पत्रावली
११. विशुद्ध वाणी
१२. स्वात्म-संवेदन (भाग २)
१३. तन्त्र ओ आगम शास्त्रेर दिग्दर्शन

आङ्ग्लभाषायां रचिता ग्रन्थाः

१. ए कैटलाग ऑव संस्कृत मैनुस्क्रिप्ट्स एक्वायर्ड फॉर संस्कृत कालेज, बनारस–ड्यूरिंग १९१८–१९१९ ई.
२. डिस्क्रिप्टिव कैटलाग ऑव मीमांसा मैनुस्क्रिप्ट्स इन दि संस्कृत कालेज, बनारस (इंट्रोडक्शन)
३. बिबलियोग्राफी ऑव न्यायवैशेषिक लिटरेचर
४. ऐस्पेक्ट्स ऑव थाट

सम्पादितग्रन्थाः

श्रीगोपीनाथकविराजमहाभागैः काश्यां स्वसेवाकाले तत्पश्चाच्चानेकग्रन्थानां सम्पादनमपि विहितम्। बंगलाभाषायामेकोनविंशखण्डात्मकस्य 'विशुद्ध वाणी' इत्यभिधस्य ग्रन्थस्य सम्पादनमेभिः सुमहत्प्रयासेन कृतम्। काश्यां राजकीय-संस्कृत-कालेजस्य सरस्वती-पुस्तकागारस्य परिचयात्मको दशखण्डेषु विभक्तः 'सरस्वती भवन स्टडीज' इति ग्रन्थ आङ्ग्लभाषायां सम्पादितः। श्रीकविराजसम्पादितानां संस्कृतग्रन्थानां संख्या भूयसी वर्तते, तेषामुल्लेखोऽधस्तात् क्रियते—

१. किरणावली-भास्करः (द्रव्यभागः–पद्मनाभमिश्रकृतभाष्योपेतः)
२. कुसुमाञ्जलि-बोधिनी (वरदराजकृतटीकोपेतः)
३. रस-सारः (गुणभागः; वादीन्द्रभट्टकृतभाष्योपेतः)

४. योगिनी-हृदयदीपिका (भागौ १-२, वामकेश्वररचिततन्त्रग्रन्थः)
५. भक्तिचन्द्रिका (प्रथमो भागः, शाण्डिल्यभक्तिसूत्रं सभाष्यम्)
६. सिद्धान्त-रत्नम् (रचयिता-बलदेवविद्याभूषणः)
७. सिद्ध-सिद्धान्त-संग्रहः (गोरक्षमार्गीयो दर्शनग्रन्थः)
८. त्रिपुरा-रहस्यम् (ज्ञान-खण्डः, चत्वारो भागाः)
९. गोरक्षसिद्धान्त-संग्रहः (गोरक्षनाथमार्गीयो ग्रन्थः)
१०. सारस्वतालोकः (प्रथम–किरणः, महाकविभारवेः परिचयः)

एतदतिरिक्तं श्रीकविराजद्वारा 'प्रिंसेस ऑव वेल्स सरस्वती भवन टेक्ट्स' इत्याख्यो ग्रन्थः प्रस्तावनया सह सम्पादितोऽस्ति ।

लेखाः शोधनिबन्धाश्च

श्रीकविराजविरचितानां लेखानां शोधनिबन्धानाञ्च संख्यातिभूयसी, तेषामत्र विस्तरेणोल्लेखस्तु कर्तुं न शक्यते । वस्तुतः साहित्यसर्जनं तेषां जीवनव्यापिन्याः साधनायाः प्रथमं साध्यमासीत्, तस्मात्कारणाद् विविधपत्र-पत्रिकासु नैकाभिनन्दनग्रन्थेषु तेषां लेखाः शोधनिबन्धाश्च बंगला-हिन्दी-आङ्ग्ल-संस्कृतभाषायामुपनिबद्धाः संदृश्यन्ते । तेषामत्र केवलं संख्योल्लेखः क्रियते ।

(क) बंगलाभाषायां श्रीकविराजविरचिताः सार्द्धद्वयशतकादप्यधिका लेखाः निबन्धाश्च विविधपत्र-पत्रिकासु प्रकाशितास्सन्ति । तद्यथा कलिकातातः प्रकाशितस्य 'हिमाद्रि' साप्ताहिकपत्रस्य विभिन्नेष्वङ्केषु षट्षष्टिलेखाः, 'सुदर्शन' पत्रे च सप्तदशलेखाः सन्ति । वाराणसीतः प्रकाशितायाम् 'आनन्दवार्ता' साप्ताहिकपत्रिकायां चतुःपञ्चाशल्लेखाः, 'विशुद्ध वाणी' पत्रिकायामेकत्रिंशनिबन्धाः, 'उत्तरा' पत्रिकायाः ई. १९२५ तः १९५० ईशवीयपर्यन्तमेकत्रिंशलेखा विभिन्नाङ्केषु सन्ति । बान्धव–प्रवासी–आरती–प्रतिभा–अलका–प्रवासज्योति– साधनपंथा–पूजा– प्रणव– आर्यदर्पण– कैवल्य–प्रभृतिपत्रपत्रिकाणां विभिनेष्वङ्केषु भारतीय-संस्कृति-साधना-तन्त्र-आगम-भक्ति-रहस्यादिविषयविवेचनपरा बहवो लेखा निबन्धाश्च प्रकाशितास्सन्ति, येषामनुशीलनेन कविराजमहोदयानां चिन्तनगाम्भीर्यं विवेचनकौशलञ्चावलोक्यते ।

(ख) हिन्दीभाषायां तेषां सार्द्धैकशतकं यावल्लेखाः विविधपत्र-पत्रिकासु प्रकाशिताः । गोरखपुरतः 'कल्याण' मासिकपत्रस्य विभिन्नेष्वङ्केषु त्रयश्चत्वारिंशत्, वाराणसीतः 'आनन्दवार्ता' त्रैमासिकपत्रिकायां सप्तचत्वारिंशल्लेखाः, बिहार-राष्ट्रभाषा-परिषत्पत्रिकायाञ्च सप्तनिबन्धाः सविशेषोल्लेख्या वर्तन्ते । तेषामन्ये निबन्धाः विद्यापीठपत्रिका–मानव–विन्ध्यभूमि–

त्रिपथगा–मानवधर्म– राष्ट्रधर्म– आज–गीताधर्म– विदेह– भारती–प्रभृतिपत्र-पत्रिकासु प्रकाशिताः विद्यन्ते। महावीरप्रसादद्विवेदी अभिनन्दन ग्रन्थ–महादेव-शास्त्री अभिनन्दन ग्रन्थ–महामहोपाध्याय विद्याधर गौड़ स्मृतिग्रन्थ–धर्मेन्द्र अभिनन्दन ग्रन्थ–इत्यादिग्रन्थेषु कविराजविरचितलेखाः शोधनिबन्धाश्च समाविष्टा दृश्यन्ते। हिन्द्यामपि प्रायशो लेखा अध्यात्मविषयसम्बद्धा वेविद्यन्ते।

(ग) आङ्ग्लभाषायां कविराजमहोदयानामसामान्या गतिः आसीत्। अस्यामपि चतुःपञ्चाशल्लेखाः शोधनिबन्धाश्च तेषां प्रकाशितास्सन्ति। वाराणसेय संस्कृतकालेजतः 'दि प्रिंसेस ऑव वेल्स सरस्वती भवन स्टडीज' नामक शोधपत्रस्याङ्केषु त्रिंशत् शोधनिबन्धाः प्रकाशमागताः। अन्ये चापि लेखाः विविधाङ्ग्लपत्रपत्रिकासु मुद्रिता अभवन्।

(घ) संस्कृते कविराजविरचितलेखानां संख्या यद्यपि न्यूनैव दृश्यते, तथापि तेषु यद्विषयविवेचनमस्ति तत्संस्कृतज्ञानां कृतेऽतिमहत्त्वमयं वर्तते। समेषां तेषां शोधनिबन्धानां लेखानाञ्च परिचयोऽधस्ताद् दीयते—

१. वेदस्वरूप-जिज्ञासा (संस्कृत-रत्नाकरः, जयपुरतः, वेदाङ्कः १९३६ ई.)
२. बैन्दवं शरीरम् (,, ,, ,, दर्शनाङ्कः १९४५ ई.)
३. शुभाशंसनम् (,, ,, ,, दर्शनाङ्कः १९४५ ई.)
४. अस्पर्शयोगः (अमर-भारती, काशीतः, खण्ड १, वै. सं. १९९१ ई.)
५. अस्पर्शयोगः (,, ,, खण्ड १, वै. सं. १९९१ ई.)
६. वेदानां वास्तविकं स्वरूपम् (,, ,, खण्ड २, वै. सं. १९९२ ई.)
७. कायसिद्धिः (सारस्वती सुषमा, वाराणसीतः, खण्ड १४ १९५९ ई.)
८. कायसिद्धिः (,, ,, ,, ,, ,,)
९. शाक्तदृष्ट्या सृष्टितत्त्व-विमर्शः (सागरिका, सागरतः, वै. सं. २०१९ ई.)
१०. भगवतो बुद्धस्य चरितमुपदेशश्च (प्रबन्ध-प्रकाशः, काशीतः)
११. वेदानां वास्तविकं स्वरूपम् (सूर्योदयः, वाराणसीतः, खण्ड३१, १९६३ई.)
१२. वेदानां वास्तविकं स्वरूपम् (,, ,, खण्ड ३१, १९६३ई.)
१३. योगोक्तविषयानां परिचयः (,, ,, — १९६४ ई.)
१४. भारते विदेशेषु च प्रथिता
तन्त्रागम-धारा (,, ,, खण्ड ४१, १९६५ ई.)
१५. शुभाशंसा (,, ,, खण्ड ४१, १९६५ ई.)

ग्रन्थानां भूमिका-लेखाः

श्रीगोपीनाथकविराजमहाभागाः प्राक्कथन–प्रस्तावना–सम्मति-मुख-बन्धपरिचिति–श्रद्धाञ्जल्यादिभिः प्रकाशितानां बहूनां ग्रन्थानां भूमिका-लेखान् लिखितवन्तः। बंगलायां सप्तत्रिंशद्ग्रन्थेषु, हिन्द्यां त्रयोविंशतिपुस्तकेषु, आङ्ग्लभाषायाञ्च पञ्चदशग्रन्थेषु तेषां भूमिकालेखाः संदृश्यन्ते। संस्कृतस्य

ये ग्रन्थास्तेषां प्राक्कथनैः भूमिकालेखैश्च मण्डितास्सन्ति, तेषां नामोल्लेखोऽधस्तात् क्रियते—

१. किरणावली-भास्करः
२. कुसुमाञ्जलि-बोधिनी
३. रस-सारः
४. योगिनीहृदय-दीपिका
५. भक्तिचन्द्रिका
६. सिद्धान्तरत्नम् (भाग-१)
७. सिद्धसिद्धान्त-संग्रहः
८. त्रिपुरारहस्यम् (भाग-१)
९. गोरक्षसिद्धान्तसंग्रहः
१०. मासतत्त्वविवेकः
११. नवरात्र-प्रदीपः
१२. रामतापिनीयोपनिषद्
१३. विद्वच्चरित-पञ्चकम्
१४. व्रतकोशः
१५. तन्त्ररत्नम्
१६. आनन्दकन्दचम्पू
१७. कालतत्त्व-विवेचनम् (भाग-२)
१८. भेदसिद्धिः
१९. स्मार्तोल्लासः (भाग-१)
२०. किरणावली-प्रकाशः
२१. भेदजयश्रीः
२२. मातृकाचक्रविवेकः
२३. सम्यक् सम्बुद्धभाषितप्रतिमालक्षणम्
२४. ख्यातिवादः
२५. भगवन्नाममाहात्म्यसंग्रहः
२६. सांख्यतत्त्वालोकः
२७. संक्षेपशारीरकम् (भाग-१)
२८. योगवासिष्ठदर्शनम्
२९. मध्वमुखालङ्कारः
३०. योगिनी-हृदयम्
३१. उपेन्द्रविज्ञानम्
३२. कालसिद्धान्तदर्शिनी
३३. ब्रह्मसूत्रं (शक्तिभाष्यम्)
३४. चित्रचम्पू
३५. आत्म-विवेकः
३६. सर्वोल्लास-तन्त्रः
३७. श्रीजानकीचरितामृतम्
३८. न्यायकुसुमाञ्जलिः
३९. ईश्वर-सूत्रम्
४०. सिद्धिविनिश्चयः
४१. श्रीसिद्धिमाहात्म्यरहस्यम्

आङ्ग्लभाषाग्रन्थेषु तन्त्र-न्याय-सांख्य-जैन-गोरक्षनाथीय-सामान्य-दर्शन-वेदान्तविषयकास्तद्विरचितभूमिकालेखा ग्रन्थस्वारस्यप्रकटने महत्त्व-वर्धने चानुपमाः सन्ति। यद्यपि कविराजमहोदयैः सुरवाण्यां ग्रन्थरचना स्वतन्त्रतया नैव विहिता, तथापि बंगला-हिन्दी-आङ्ग्लभाषासूपनिबद्धास्तेषां ग्रन्थाः संस्कृतसाहित्यस्यैव परिपोषका व्याख्यानभूताश्च दरीदृश्यन्ते। अतः सत्यपि भाषाभेदे संस्कृतज्ञानां कृते तेषां महत्त्वं सुभृशं वर्तते।

महामहोपाध्यायगोपीनाथमहोदयानां प्रकाशितरचनाकार्यस्य समुल्लेखस्तत्तद्ग्रन्थानुशीलनेन कर्तुं शक्यते, परन्त्वद्यापि तद्रचितसाहित्यस्य पाण्डुलिपिरूपविस्तृतोंऽशः तदावासभवने पेटिकासु सुरक्षितोऽस्ति। हस्तलिखितेयं सामग्री सहस्रत्रयपृष्ठात्मिका वर्तते। अतो हस्तलिखितपत्रकाणां प्रकाशनेनैव तेषां साहित्य-साधनाया रहस्यानुभूतिः पूर्णतामेष्यति।

—साहित्यविभागाध्यक्षः,
श्रीदि० जैन-संस्कृतमहाविद्यालयः, जयपुरम्

□ □ □

वेदशरीरं : केचन प्रश्नाः

[कविराजानां शेमुषी वेदानां वास्तविकस्वरूपविमर्शे सततं प्रवर्तमानाऽभूत्। एतद्विषयकास्तेषां लेखा 'वेदस्वरूपम्', 'वेदानां वास्तविकं स्वरूपम्' इत्यादिशीर्षकैः पत्र-पत्रिकासु प्रकाशमापुः। एनामेव वेदविमर्शपरम्परम्परामवलम्ब्य दिवसेष्वेषु जयपत्तने या विचारसरणिर्विदुषां प्रवृत्ता तत्प्रेरणया सुप्रथितैर्दार्शनिकैः डॉ. दयाकृष्णमहाभागैर्विदुषां संमुखे स्वविचारा जिज्ञासाश्च प्रकटिताः "दि वैदिक कार्पस् : सम क्वेश्चन्स" इति शीर्षके आङ्ग्लभाषानिबद्धे स्वप्रबन्धे। तस्यैव सारानुवादोऽत्र विदुषां विचाराय क्रमिकरूपेण प्रकाशयितुमारभ्यते। समामन्त्र्यन्ते एतद्विषये विदुषामभिमतानि। —सम्पादकः]

१ वेदानां मूलपरिधिः

वेदानां महत्प्रामाण्यं प्राचीनतमत्वं च भिन्नभिन्नसंप्रदायैरपि सर्वसंमत्या स्वीकृतं वर्तते। वस्तुगत्या तेषां स्पष्टं महत्त्वम् अन्यथा वा प्रतिपाद्यैव भिन्नभिन्नसंप्रदायैः स्वेषां निर्वचनम्, इतरैर्वा समर्थनं, सर्वं भारतस्य दीर्घेतिहासपरंपरायां शक्यमासीत्। बौद्धान् जैनान् कांश्चन संप्रदायविदो विहाय इतरे ब्राह्मणेतराः मूलभूता संप्रदाया वेदमूलत्वमथवा तेषां प्रामाण्यं स्वीकुर्वन्नेव लोके प्रचलिता वर्तन्ते। दक्षिणभारते क्रि प. द्वादशशताब्द्यामेव उत्पन्नः वीरशैवसंप्रदायः अस्योदाहरणं भवितुमर्हति। एवं शैवसिद्धान्तसंप्रदायः तमिलभाषीयाणां वेदान्तपरकं चिन्तनं, मूलतः भूतविचारं च स्पष्टीकुर्वते, तेन च वेदप्रामाण्यं नैव तिरस्कृतं वर्तते। दयानन्दसरस्वतीनामपि अर्वाचीनानां स्मृत्यादीनां प्रत्याख्यानमपि एतद्विषये उदाहरणमर्हति, यदि उदाहरणमपेक्ष्यते।

अत्र किमेतद्वेदाख्यं वस्तु यस्य प्रामाण्यं स्वीक्रियते निराक्रियते च, इति विचिकित्सायां श्रुत्यादिभ्यः संप्रदायाद्वा अस्य स्पष्टं समाधानं नैवोपलभ्यते। सत्यं, मन्त्रब्राह्मणयोरेव वेदत्वं प्रसिद्ध्या प्रतिपादितं वर्तते। तर्हि के मन्त्राः, कानि च ब्राह्मणानि येषां वेदस्य शरीरत्वेन प्रसिद्धिः? ब्राह्मणेषु आरण्यकानामुपनिषदां च अन्तर्भावो वा अन्यथा वा? यदि उपनिषदामन्तर्भावः स्वीक्रियेत तर्हि सर्वासां वा, नो चेत् कासांचनैव वा? क्रि. प. १३ अथवा १४ शताब्द्यामुत्पन्नत्वेन स्वीकृतानामुपनिषदां वेदेष्वन्तर्भावो न केनापि स्वीक्रियते, नैव स्वीकर्तुं शक्यते च। यद्युपनिषदां तत्तद्वेदानामङ्गत्वेन परिगणितानामेव तत्रान्तर्भावः, तर्हि मुण्डकमाण्डूक्यप्रश्नश्वेताश्वतरोपनिषदामतिप्रसिद्धानामपि वेदेषु नान्तर्भावः स्वीकरणीयो भवेत् तासां कुत्रचिद्वेदाङ्गत्वेन न पठितत्वात्।

कदाचिदत्र एवमुपायः कर्तुं शक्यते एतादृशसमस्यापरिहारार्थम्। अत्र कालस्य कश्चन संदर्भः (Date line) निर्णयः यतः परं यासामुपनिषदामाविर्भावः तासामत्र नान्तर्भाव इति। न केवलं तादृशकालनिर्णयः अविहितो (arbitrary) भवितुमर्हति, किन्तु कैश्चित्प्रसिद्धैः आचार्यैः श्रुत्यङ्गत्वेन परिगणितानाम् एवं व्याख्यातानां कासांचनोपनिषदामपि निरासः सिद्ध्येत्। आचार्यैः व्याख्याता उपनिषदः सर्वा अपि श्रुत्यङ्गत्वेन परिगणनीयाः, नो चेत् श्रुतेः वेदतादात्म्यं पृथक्कृत्वा वेदानां प्रामाण्यमङ्गीकुर्वद्भिः संप्रदायैः प्रमाणत्वेन स्वीकृताः सर्वे अपि मूलग्रन्थाः स्वीकर्तुं शक्यन्ते। तर्हि वेदेतरश्रुतिग्रन्थाः गौणत्वेन परिगणिताः स्मृतिग्रन्थाश्च कथं परस्परं भिद्यन्त इत्यवगन्तुं न शक्यते। कदाचिद्वैदिकसंप्रदाये प्रामाण्यपरंपरायां संहिताब्राह्मणारण्यकानां प्राथम्यम्, एतेभ्यो भिन्नानामुपनिषदाम्, आचार्यैः प्रमाणत्वेन स्वीकृतानामेवमुदाहृतानां च द्वितीयस्थानं, तदनन्तरं स्मृतीनां तृतीयस्थानं च स्वीकर्तव्यं भवति।

मौलिकग्रन्थानां प्रामाण्यपरंपरा तावत् धर्मशास्त्रे, न्यायशास्त्रे इतरत्र च सुप्रसिद्धैर्वा उपरि यदुक्तं तस्य स्वीकारावसारे आचार्यः कः, स्मृतिश्च का इत्यपि निर्णय आवश्यको भवति। इत्युक्ते, किमाधारीकृत्य कश्चन व्यक्तेः आचार्यत्वं, ग्रन्थस्य वा स्मृतित्वं वा निर्णेतुं शक्यते? अत्र आचार्यत्वेन वेदान्तप्रतिपादका एव ग्रन्थकर्तारः स्वीकर्तव्याः, नो चेत् भिन्नभिन्नसंप्रदायानां प्रवर्तका अपि स्वीकर्तव्या वा इत्येतदपि निर्णेतव्यम्। संप्रदायास्तावद् वैदिकेषु तदितरेष्वपि शास्त्रेषु प्रवृत्ता इति तु सुविदितमेव। बौद्धमतप्रचारकत्वेन विख्याताः सर्वेऽपि आचार्या इत्येव विश्रुताः। असङ्ग-वसुबन्धु-दिङ्नाग-धर्मकीर्त्यादयः केचन तत्संप्रदाये प्रथिता आचार्याः। एवं जैनसंप्रदायेऽपि। अवैदिका आचार्याः न गण्यन्ते चेत्तथापि वेदान्तेतरशास्त्रेषु प्रसिद्धा आचार्याः परिगणनीया एव। अतः सरलोपायो वेदान्ते विश्रुतानामाचार्याणां तत्रापि एवं संप्रदाये प्रथितानामेव स्वीकारः। गौडपादशंकराचार्याणामतिरिक्ततया, यामुन–रामानुज–मध्व-वल्लभ-निम्बार्काचार्याणामेव अत्रान्तर्भावः स्यात्। आचार्यशब्दविषये एतादृशात्यन्तविस्तीर्णव्यावृत्तिरपि (Extansional vestriction) न पर्याप्ता भवति, यतः यामुनः, रामानुजः वल्लभः, निम्बार्को वा पृथक् स्वतन्त्रतया उपनिषदां भाष्यं, व्याख्यानं वा कृतवन्तः। मध्वेनैकाकिना स्वकीयं भाष्यं लिखितं यत्र शंकरेण पूर्वं तेषामेव ग्रन्थानां भाष्यं लिखितमासीत्। शंकराचार्यप्रणीततया प्रसिद्धेषु भाष्येष्वपि तत्कर्तृकविषये विद्वत्सु क्वचिन्मतभेदो दृश्यते। पाल् हाकर् (Paul Hacker), सेंगकु मयेदा (Sengaku Mayeda) इत्येताभ्यामस्मिन्विषये अतीव जागरूकतया कार्यं कृतमिति विश्वासः। परमेतादृशं कार्यम् इतरवेदान्ताचार्याणां विषये नैव प्रवृत्तमित्यतः अस्मिन्विषये तुलनात्मकनिर्णयः दुष्करः।

आचार्यैः दां भाष्यं व्याख्यानं वा नावश्यकं, यतस्तैः उपनिषदां सारभूतानां ब्रह्मसूत्राणां भाष्यं कृतमित्यपि वक्तुं शक्यते । तर्हि कथं शंकरमध्वावेव ब्रह्मसूत्राणामुपनिषदां च भाष्यं लिखितवन्तौ इत्यस्य समाधानं नैव सुशकम् । सर्वैरपि वेदान्ताचार्यैः उपनिषदां भाष्यं नैव कृतं, तथापि ब्रह्मसूत्राणां भाष्यं लिखितमिति चेत् तदपि न संगतम् । दासगुप्तमहाभागस्य (Das Gupta) भारतदर्शनस्येतिहासः (History of Indian Philosophy) इत्यत्र यामुनाचार्यकृतीनां सूची प्रमाणभूता यदि मन्येत, तर्हि तैः ब्रह्मसूत्राणां भाष्यं नैव कृतमिति स्पष्टं वक्तुं शक्यते । कार्ल पाटर् (Karl Potter) पुस्तके (Encyclopaedia of Indian Philosophies, vol. i) इत्यत्र दत्ता निम्बार्ककृतीनां सूची यदि पूर्णा प्रमाणभूता च स्यात्तर्हि तत्राप्येवं वक्तुं शक्यते ।

वेदान्ताचार्याणां प्रस्थानत्रय्याः सामञ्जस्यं प्रमाणेन समर्थितं नैव दृश्यते, यतः बहुभिः उपनिषदां, ब्रह्मसूत्राणां भगवद्गीताया वा भाष्यं नैव कृतं विद्यते । निम्बार्केण, वल्लभेन वा भगवद्गीता नैव व्याख्याता । द्वितीयेन भागवतं व्याख्यातम्, आद्येन तदपि न कृतम् । मध्वेन ब्रह्मसत्रोपनिषद्गीताभागवतानां व्याख्यानं विहितं, शंकरेण आद्यत्रयं व्याख्यातं, रामानुजेन प्रथमतृतोययोः, यामुनेन केवलं तृतीयस्य, वल्लभेन प्रथमचतुर्थयोः भाष्यं विहितं, निम्बार्केण न कस्याप्युपर्युक्तस्य । वस्तुस्थितेरेतादृशसंदर्भे प्रस्थानत्रय्या एवंभूता काल्पनिकी कथा राधाकृष्णन्प्रभृतिभिरपि पण्डितैः कथं वा स्वीकृता, यतो हि आचार्याणां संप्रदायानुसारभ्रान्त्या तेन त्रयाणामपि व्याख्याः विहिताः ।

अथवा वेदांशानां स्वतन्त्रतया व्याख्यानविषयं परित्यज्य, आचार्यकृतिषु वेदानां तदंशानां प्रामाण्यमुल्लिखन् वाक्यानि लभ्यन्ते चेत्पर्याप्तमिति वक्तुं शक्यते । परंतु, आचार्येष्वारोपितानां ग्रन्थानामारोपणविषये विश्वसनीयता सिद्धा, तैः प्रतिपादितत्वेन प्रसिद्धानां ग्रन्थानां वा प्रकाशनमेतावता न संजातमित्यत उपर्युक्तगत्यन्तरविषयमवलम्ब्य न किमपि निर्णेतुं शक्यते । एतादृशसामग्र्याः सामान्यपरामर्शेनापि वक्तुं शक्यते यदनेन न किमपि मुख्यभूतं पर्यवस्यतीति । रामानुजेन ब्रह्मसूत्राणामुपरि स्वकीयश्रीभाष्ये परामृष्टा वैदिकग्रन्थाः कठ-कौषीतकी-छान्दोग्य-तैत्तिरीय-प्रश्न-बृहदारण्यक-मुण्डक-श्वेताश्वतरोपनिषद एव ।

उपनिषदां वेदपरिधावन्तर्भावोऽस्ति वा न वेति विवादः बहोः कालात् प्रचलत्येव । अस्मिन्प्रश्ने ये अस्तीति पक्षीयाः तेऽपि सर्वा अपि प्रसिद्धा उपनिषदः वेदे एव न स्वीकुर्वन्ति, न च कासांचनोपनिषदां वेदेऽन्तर्भावे, इतरासां तद्भिन्नत्वे वा कारणं वक्तुं प्रभवन्ति । संहितानां ब्राह्मणानां च विषये एवं संदेह एव नास्ति । आरण्यकानां विषये न केनाप्येतादृशसंदेहः उत्थापितः ।

संहिता-ब्राह्मणयोर्वेदशरीरत्वमङ्गीकृतवद्भिः आरण्यकोपनिषदां प्रामाण्ये द्वितीयमेव स्थानं दत्तम् । आरण्यकानामुपनिषदां च वेदशरीरेऽन्तर्भावं प्रतिपादयद्भिः उपनिषदां महत्त्वमतिमात्रं स्वीकृतम्, उपनिषत्पर्यन्तं गमनावसरे आरण्यकानां तु केवलं मध्ये संक्रमणमार्ग इत्यतः तत्र कर्मप्रतिपादकानां ज्ञानप्रतिनिधीनां वा नासक्तिः ।

आरण्यकान्युपनिषदश्च यदि त्यज्यन्ते, तर्हि मन्त्रब्राह्मणानामेव वेदशरीरे मूलभागः (hard core); सम्प्रदाये वेदनाम्ना अत एव परिगणिताः । विवादरहितस्यापि भागस्य का वा गतिः ? उभयोर्भेदः कः, वेदस्य शरीरत्वे उभयोर्बलाबलविवेकः कीदृश इत्यपि विचारणीयम् । प्रायः सर्वेऽपि मन्त्राणां ब्राह्मणापेक्षया मुख्यत्वमत्र स्वीकुर्वन्ति, परमेतद्विरुद्धपक्षेऽपि जनाः न सन्तीति न । अनयोर्विषये विवादः, सम्प्रदायेऽपि वेदानां किं स्वरूपमिति प्रश्नमुत्पादयति, यथा पश्चाद्दर्शयिष्यते ।

२. सामवेदः

सामवेदस्य पृथङ् मन्त्राः न सन्ति, तथापि स्वतन्त्रतया तस्य वेदत्वमङ्गीकृतम् । कौथुमसंहितायाः १८१० मन्त्रेषु (Stanzas) केवलं ७६मन्त्राः ऋग्वेदान्नानीताः । जैमिनीयसामवेदे तु (डॉ. रघुवीरस्य संस्करणे) १६७८ मन्त्रेषु ४८ विहाय अन्ये सर्वेऽपि ऋग्वेदादेवागताः । तर्हि ऋग्वेदेतरमन्त्राणां मानं प्रतिशतं त्रयमेव स्यात् । ऋग्वेदादनागता अपि एते मन्त्राः इतरशाखाभ्य आगता इति होंदा (Gonda) महाशयानामुक्तेः निश्चप्रचम् । पुनः तेषामुक्त्यनुसारेण सामवेदस्य द्वयोः भागयोः पूर्वार्चिकोत्तरार्चिकनामकरणेनैवेतत्स्पष्टं भवति । स्वकीये ऋग्भाष्योपोद्घाते सायणः, "सामपद्यानि (Verses) सर्वाण्यपि ऋग्वेदादागतानीति" वक्ति । संगीतस्य पाठनमेव तेषां मुख्योद्देश्यम् (होंदा) ।

यदि सामवेदस्य मुख्योद्देश्यमेवं स्यात्तर्हि अस्य वेदत्वं तावदृग्वेदस्य वेदत्वापेक्षया अतीव भिद्यते । यदि एकस्यैव मन्त्रस्य भिन्न-भिन्नरागेषु (melodies) गानसंदर्भः भवति, तर्हि मूलमन्त्रस्य मुख्यत्वं, कैवल्यं च नष्टं भवति । श्रौतोक्तयागेषु उद्गात्रा पञ्चभिः सहायकैः सह सामानि गीयन्ते । ऋग्वेदोक्तमन्त्राणां यदि यजुष्षु, सामसु वा नान्तर्भावः, तर्हि तेषां यागाद् भिन्ने एव कस्मिंश्चित्संदर्भे विनियोगो दृश्येत । एवं चेद् वेदानां विषये अस्माकं मूलभूतेऽभिप्राये एव भेद आवश्यक इत्यनन्तरं दर्शयिष्यते ।

पृथक् स्वतन्त्राः मन्त्राः यत्र स्युस्तत्रैव वेदशब्देन यदि व्यवहारः, तर्हि साम्नां वेदत्वमेतस्मात्सर्वथा भिद्येत, अथवा साम्नां वेदत्वमेव न सिद्ध्येत् । गानार्थं कृतानां परिवर्तनानां स्तोत्रशब्देन व्यवहारः, एवं पदवाक्यस्तोत्रादीनां

प्रसिद्धिः । "इत्थं पुनरुक्त्यत्रिनिधानव्यारणेतरव्यङ्गीकरणैर्भूषितानि[1] सामानि[2] विलक्षणवाङ्मयत्वेन अवगम्यन्ते तटस्थैः, वेदे विश्वसद्भिर्यथाकथंचिद्वा चिन्त्यतां कामम्" (होंदा) ।

सामसु एकः सम्प्रदाय आसीद् यत्र वस्तुतः साम्नः मन्त्राद् भेदः, अथवा सर्वथा मन्त्रेतरत्वमासीदिति विश्वसितुं शक्यते । डा. मुकुन्दलाठमहाभागैः प्रसिद्धैः संगीतशास्त्रस्यैतिहासिकैः स्वकीये अप्राचीने पत्रलेखे "Ancient Indian Music and the Concept of Man" संज्ञके एवं प्रतिपादितं वर्तते । "ऋचामिव साम्नामप्याविष्करणं (revelation) उपपन्नमेव (in its own right), अपि च प्रायशः साम्नां संगीते एव तात्पर्यम् । उदाहरणम् अनृचसाम, यस्य ऋङ्मूलत्वं नास्ति, केवलं निरर्थकैरक्षरैः सह गाने एव विनियोगः ।" अत्र 'अनृच' इति प्रयोगे ऋग्भिन्नैरक्षरैः सह गीयमानमित्येव अर्थः । लाठमहाभागैस्तु न केनचित्साहित्येन सह गीतमित्यभिप्रेतं, तन्न समीचीनम् । जैमिनीयोपनिषद्ब्राह्मणे (प्रथमाध्याये प्रथमखण्डे चतुर्थेऽनुवाके)—

"साम्नानृचेन स्वर्गं लोकं प्रयातेति" ।

(तृतीयाध्याये षष्ठेऽनुवाके तत्रैव द्वितीयखण्डे)—

"स मे शरीरेण साम्ना शरीराण्यधूनोत्" इति च गीतं वर्तते, इत्यतः समीचीनमिव भाति ।

अनृच-अशरीरयोः एकरूपता सर्वथा नानुचितापि ऋच एव साम्नां शरीरभूता इति तत्त्वमवलम्ब्यैव तिष्ठति । परमेतत्तत्वं संदिग्धं वर्तते । अतः एकरूपता या लाठमहाभागेन कल्पिता वर्तते, तस्याः समर्थनं नैव शक्यम् । अपि च तस्य अनृच–अशरीरयोरेकरूपताकल्पने विरोधा अपि सन्ति । तत्र प्रथमः संगीतस्य शरीरत्वेन अर्थवन्त एव शब्दाः स्वीकर्तुं शक्यन्त इति यच्चिन्तितं, तस्य मूलमेव नास्ति । अत्र शरीरशब्देन आश्रयः, उपष्टम्भकः (base) इत्यर्थः, स तु अर्थवान्वा तद्भिन्नो वा भवितुमर्हति । द्वितीयः—अर्थवत्त्वानर्थवत्त्वयोः भेदः संदर्भसापेक्षः, यत एकस्मिन् संदर्भे यदर्थवन्न भवति, तदेवान्यस्मिन्नर्थवद् भवितुमर्हति । तृतीयः—आद्ये देवानुपवर्ण्य, द्वितीये मनुष्यानुपवर्ण्य च कथा प्रस्तुता । तत्र देवानां शरीराणि (नाम मनुष्यवच्छरीराणि) न सन्ति, पुनस्तैः कथं स्वर्गः कामयते इत्यपि न स्पष्टं, देवानां स्वर्गे एव वासकरणात् । द्वितीये तु राज्ञा स्वर्गं गन्तुं नैवेष्टं, परं मृतं कंचन मित्रं द्रष्टुमेवेष्टम् ।

1. insertions.

2. ungrammutical mutilations.

यथा कथंचिद्वा भवतु, अत्र मूलसाम्नां ऋङ्मन्त्रेभ्यः पार्थक्यं, परं तेभ्यः प्राबल्यं च प्रतिपादयितुमिव कथा प्रवृत्ता इव प्रतीयते। ऋङ्मन्त्राणां शरीरेण, साम्नां तदात्मना च तुलना कृता वर्तते। आत्मनोः निर्गमनानन्तरं शरीरस्य भागा बहुत्र विकीर्णाः यान् प्रजापतिः संगृह्य ऋक्संहितां कृतवानिति। मर्यादार्हस्य ऋग्वेदस्य कलुषीकरणमितोऽप्यधिकं नैव भवितुमर्हति।

सामवेदस्य सारः, अर्थाद्गानप्रकारः अनावश्यकरीत्येव विभक्तो वर्तते। आद्यो विभागः गानस्थानमवलम्ब्य ग्रामगेय आरण्यकभेदेन, द्वितीयः ऋतुषु तेषामुपयोगमनुसृत्य ऊह-ऊह्यभेदेन च। उभयोः भेदक्रमयोः कारणं भिन्नमित्यपि स्पष्टम्। होंदामहाशयानां मते आद्यस्यैव ऋतुषु प्रयोगार्थं साम्नां परिवर्तितं रूपमिति ज्ञायते। होंदा अतीव जागरूको विचारकः, तथापि वेदसंबन्धिविषये तस्य विचारेऽसमीचीनत्वमतीव विस्मयावहम्। ततोऽपि विस्मयावहतरं ऊहोह्यगानयोः ऋतुविशेषे प्रयोगाय सामगानस्यैव परिवर्तनमिति निर्णयः। अत्र सामान्यदृष्टिपातेनापि ऊहोह्यगानविषये एतद्वक्तुं शक्यते यदत्र प्रत्ययातीतः विस्तारः[1] संकुलीकरणं[2] नूतनमार्गप्रवर्तनं[3] च यस्य केवलं परिवर्तनशब्देन वर्णनं नैव सामञ्जसम्।

साम्नां गानप्रकाराः भिन्ना इत्यत्रापि ग्रामगेय-आरण्य-ऊह-ऊह्यगानेभ्यः पृथक्किमपि व्याख्यानमावश्यकं भाति। मूलतः स्वरमाधुर्याणां संगीतरूपाणां च परिचयः, तेषां परस्परभेदश्चात्र विवक्षितः। अधुना पर्यन्तं भारतदेशे संगीतस्य लेखनक्रमः नास्तीति विस्मयावहम्। वस्तुतः साम्नां लेखनक्रमः यदारब्धः तदैव तत्र संगीतस्यापि लिखितरूपेण सूचनक्रमः प्रवर्तितव्य आसीत्। वस्तुतः भारते सांप्रदायिकसामगानस्य, संगीतशास्त्रस्य च संप्रदायस्य एतावता यत्कृतं तदपेक्षया विस्तरेणाध्ययनमतीवावश्यकम्।

एवं सामवेदस्य स्वमन्त्राणामभावे वेदत्वं न स्वीकार्यम्। अनृच-अशरीरिसाम्नोः स्वरूपस्वीकारे मुख्यत्वं साहित्यं (text) विहाय गानमाश्रितं भवति, तदा संगीतस्य शास्त्रस्यारम्भो भवति। पुनः गानप्रकारमनुसृत्य भिन्न-भिन्नसंप्रदायानामप्याविर्भावः स्वीकार्यः, यथा आधुनिक (हिन्दुस्तानी) संगीते 'घराना' इति प्रसिद्धाः स्वतन्त्राः परस्परं भिन्नाश्च प्रकाराः। सामवेदस्य सहस्रवर्त्मत्वमेवमेवावगन्तव्यम्।

—डॉ. रा. महादेवन्
प्राचार्यः,
केन्द्रीय-संस्कृत-विद्यापीठं, जयपुरम्

1. incredible elaboration.
2. complication.
3. innovation.

शक्तिजयम्

(काव्यम्)

[द्वैपायन-कविविरचितम्]

चतुर्थः सर्गः [पूर्वानुवृत्तम्

रजस्तमोवृत्तिनिरासनाद्द्रुतं
विशुद्धसत्त्वं विमृशन्तिसूरयः ।
स्फुरच्चमत्कारमयं रसोल्वणं[1]
शिवस्वरूपं रजताद्रिमादरात् ।।५३।।

यक्षाधिपेन निजहर्म्यतलाद् दिशाया-
मीशानशासनजुषि स्फुटदर्शितायाम् ।
आनन्दसान्द्रपुलकावलि-मोदमन्तः
कैलासमद्रिममराः प्रसमीक्ष्य तेनुः ।।५४।।

तत्रालकापुरि वृथैव दिनानि नेतुं
दानादिवैभवभरैरसहिष्णवस्ते ।
शीघ्रं गिरीशमभिसेवितुमाशुतोषं
गन्तुं मनांसि विदधुः स्मृतवैरिकृत्याः ।।५५।।

कवि-निवेदनम्

यं प्रासूत पतिव्रता व्रतयुतं घोंसीति नाम्नी मुदा
व्यासाच्छ्रीशिवदत्तशर्मविबुधाद् बुन्द्यां दधीचेः कुले ।
काव्ये शक्तिजयाभिधे विरचिते द्वैपायनेनाऽमुना
भावालङ्कृतिपेशले गुणमये सर्गस्तुरीयोऽप्यगात् ।।

। समाप्तोऽयं चतुर्थः सर्गः ।

---

1. अत्र कैलासस्य शिवस्वरूपं रसस्वरूपञ्च वर्णितम् । 'रसो वै सः' इति । रसस्वरूपं यथा काव्यशास्त्रे "सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः" इति ।

—पञ्चमः सर्गः—

विहाय रम्यामपि दक्षिणां प्रियां स रन्तुकामो नु कुबेरकामिनीम् ।
सुरेन्द्रप्रेम्णाऽरुणकान्तिविग्रहो हिमालयं प्राप सहस्रदीधितिः ।।१।।

हिमालये मालयसम्पदायुते युतेभलीलालसिते सिते हिमैः ।
सहर्तुका हासविलासपेशला वनान्तलक्ष्मीर्वनितेव दिक्षुते ।।२।।

मरुल्ललद्वल्लितनुं मनोहरां परिस्फुरत्सुन्दरपल्लवाधराम् ।
समानयत् स्विन्नहिमद्रवां द्रवद्ध्रदां वसन्तश्रियमेष आतपः ।।३।।

विकासिभी रश्मिभिरीषदुल्लसद्विलोलपत्रावलिनेत्रचापलाम् ।
करैः स्वरागारुणितैरिवोन्मदां मुदाऽस्पृशत्किञ्चन पद्मिनीं रविः ।।४।।

जुगुञ्ज कुञ्जे मधुपावलिः स्वनैः पिकालिरप्यत्र चुकूज हेलया ।
मृणलमास्वादयितुं सरोवरे ततार चोन्मत्तमरालमण्डली ।।५।।

वनेषु तन्वीषु लतासु विस्फुरन्नवप्रवाला विबभुश्च रागिणः ।
जगद्विजेतुः स्मरभूभुजो ध्रुवं वियोगिरक्तांचितशल्यसंग्रहाः ।।६।।

विकासिनी गन्धवहा रजोभरैः समुज्ज्वलैर्मोदितकानना भृशम् ।
अलीन् पुरोर्नर्तितपल्लवा बभौः समाह्वयन्ती कुरबस्य मंजरी ।।७।।

मनोरमा चम्पकपुष्पसंहतिर्दिशा सुदत्ता बलिदीपिका यथा ।
मनोजमाराधयितुं वनश्रिया प्रतापयामास मनांसि कामिनाम् ।।८।।

सितं स्मितं काननकामिनीमुखे बभास रम्यं नवमल्लिकादलम् ।
द्विरेफयूनां हृदयाणि कर्षयद्विलोलपत्राधरमाशु चुम्बितुम् ।।९।।

विकासिमल्लीसुमहारशोभिनी सुवर्णताटङ्कधरा च चम्पकैः ।
अशोकरागारुणपादपल्लवा समाजगामाधिवनं नवा वधूः ।।१०।।

ध्वनद्धनुर्ज्यापतदुत्कटस्वना शिलीमुखाली किल शम्बरद्विषः ।
मृगीदृशां मानवशं मनो द्रुतं विखण्डयामास निपेतुषी बलात् ।।११।।

प्रविश्य कुञ्जान्तरमाशु वल्लरीविलासलीलानिपुणो वनानिलः ।
चुचुम्ब मल्लीमुकुलाक्षि सस्पृहं सुमासवापानविघूर्णितो बलात् ।।१२।।

वनस्थली रागवशा सुकेसरालका स्थलाब्जस्फुटनेत्रहारिणी ।
समागमे गायति कामिनो मधोः पिकस्य कण्ठेन कलं स्म पञ्चमम् ।।१३।।

---

१. दक्षिणां–दक्षिणदिशां, समुदारहृदयां पत्नीं च, कुबेरकामिनीं–उत्तरदिशां, परकीयां कुबेरपत्नीं च । पुनश्च व्यङ्ग्यार्थे कुत्सितबेरां कुरूपां कामयुक्तां परकीयाञ्च (कुबेरा चासौ कामिनी च तामिति विग्रहः) ।

१०. अशोकपादपे पुष्पस्तबकानि आपादमस्तकं विकसन्ति इति वानस्पतिकधर्मोऽपि रागारुणपादपल्लवा इति प्रयोगेण ध्वन्यते ।

११. शिलीमुखाली— भ्रमरपङ्क्तिः, पक्षे बाणपङ्क्तिः ।

वितेनुरामोदभरां धरां ललच्चलैक्षणाभिर्ललनाभिरुद्धतैः ।
मृगाः स्वशृङ्गाग्रविलासताडनै रसोन्मदाभिः सह रन्तुमोत्सवः ।।१४।।

रजोवहा चम्पककोरकाबलिर्द्विरेफमाराद् भ्रूकुटीङ्गितेन किम् ।
परागमालिन्यमिषादपाकरोद्बिभीषयन्तीव तदङ्गसङ्गमात् ।।१५।।

मधूश्रिया कोऽप्यमरः समुल्लसद् वनं विलोक्य स्फुटसूनसौरभम् ।
प्रभुं सुराणामतिरागि सद्वचो जगाद तापं रिपुजं हरन्निव ।।१६।।

प्रसीद देव स्वभुजार्जितेन ते प्रतापभानोः प्रविसारितेजसा ।
गतामवेहि क्षणदां च शैशिरीं मधुं जयं मूर्तमिवाऽऽगतं स्वयम् ।।१७।।

सखेव ते वृत्तमयं शुभावहं वहन् समागच्छति दक्षिणानिलः ।
दिवाकरोऽप्याशु निजौजसा द्विषां तमः समुद्धर्तुमिवैष उद्यतः ।।१८।।

जयश्रिया साकमिहैव कानने विलोकय त्वं नयनैर्मधुश्रियम् ।
विहाय दर्पोद्धतदैत्यशीतजं भयं प्रियं रन्तुमिवागतां नवम् ।।१९।।

मिलिन्दपुञ्जैरनुगुञ्जितध्वनिः प्रफुल्लमाकन्दमदैः कषायिता ।
वियोगिनीमानसमुन्मदा भृशं धुनोति पुंस्कोकिलवृन्दकाकली ।।२०।।

मरुत्पथे गन्धवहेन वाहितं मधुं मुदा कामसखं शुभागतम् ।
पिकावली पञ्चमकाकलीरवैरनामयं पृच्छति चूतमञ्जरी ।।२१।।

लतातनूगन्धभरैर्विभूषिता वसन्तलक्ष्मीः समुपागता स्वयम् ।
मनोजमातङ्गमदाम्बुशीकरैरिवोत्कटैः कण्टकचम्पकुड्मलैः ।।२२।।

न यौवनं स्थायि न वैभवं चिरं भजस्व केलिं किल सम्मुखागताम् ।
इतीव रम्भा निजपाणिपल्लवैरसारतां स्मारयतीह जागतीम् ।।२३।।

प्रफुल्लगुच्छस्तनभारपीडिता मरुत्प्रियेण प्रमदेव चुम्बिता ।
इयं स्फुरदन्तरुचाऽधरारुणा फलस्फुटा कण्टकितेव दाडिमी ।।२४।।

---

१४. मृगाः—हरिणाः, पक्षे वात्स्यायनोक्ताः कलाविदग्धाः मृगजातिपुरुषाः । शृंगं—विषाणं, पक्षे मन्मथोद्भेदः ।

१५. रजोवहा—परागयुक्ता, पक्षे पुष्पवती ।

२१. मरुत्पथे—"ऋक्पूरब्धूःपथामानक्षे" इति मरुत्पथः तस्मिन् । कामसखं—'राजाहःसखिभ्यष्टच्' इति टच् ।

२२. उत्कटैः—उत्कटगन्धिभिरित्यर्थः । कण्टकचम्पकुड्मलैः—कंटीलीचम्पायाः ईषत्स्फुटकुसुमैः । यथा कापि अतिशयगन्धयुक्तेन उत्कटेन गन्धसारद्रव्येण (सेंट इति प्रसिद्धेन गन्धद्रव्येण) अत्यधिकमलङ्कृता सती समागच्छति तथैव एषा तु सुरुचिसम्पन्नानां रसिकानां कृते उत्कटगन्धहेतोः उद्वेगजनका एव भवति न तु रागोद्बोधिका इति ध्वन्यते । 'स्वयं समुपागता' इत्यनेन तस्याः अतिशयकामुकीत्वम् उत्कटगन्धद्वारा स्वं प्रति बलाद् युवजनध्यानाकर्षणप्रयासश्च व्यज्यते इति दिक् ।

मिलिन्दवेणुध्वनिकोकिलारवैर्वसन्तरागे स्वरसाधिते मनाक् ।
शुकैः पुनः सन्ततताललवादनैरियं पुरो नृत्यति मल्लिवल्लरी ॥२५॥

बिभूषितोऽयं सहकारमञ्जरी किरीटशोभाविभवः पिकानुगः ।
वसन्तलक्ष्मीं परिपेतुमुद्यतो नवो वरः साधुमधुर्महीयते ॥२६॥

रसालसालं समधिष्ठिता मुहुः प्रसूनहासामणितालिगुञ्जिता ।
तनोति किं कामदसाम्प्रयोगिकं सुनर्महावाऽप्यतिमुक्तवल्लरी ॥२७॥

पिकाकिदृग्भङ्गमसोढवान् पुरा त्वनङ्गभावं भजति स्म मूर्च्छया ।
निजेन सख्या सुमगन्धसंश्रयैः परागलेशैरपि जीवितः स्मरः ॥२८॥

रसालवल्लीरजसा स्ववक्षसाऽप्यशङ्कितो भृङ्गवरः चिरेत्वरः ।
प्रभातवाताहतिकम्पितां क्रुधा सरोजिनीं मानयितुं समुद्यतः ॥२९॥

स्फुटाम्लगन्धा ननु निम्बुवल्लरी करम्बिताङ्गी मधुपालिगुञ्जितैः ।
प्रवृद्धजम्बीरफलाग्रभेदनैर्मधौ पिकानप्यभिकाङ्क्षति द्विजान् ॥३०॥

समीक्ष्य रागोष्मवता पिकेन किं सहारमन्तीं सहकारवल्लरीम् ।
प्रयाति पातुं पिचुमन्दमञ्जरीं सुतिक्तगन्धामपि हन्त वायसः ॥३१॥

नवेन रङ्गेण तरङ्गिता भृशं पलाशशाटीहरितेन गुण्ठिता ।
शुकान् प्रियान् मादयतीव सन्ततं फलैः सरागैर्नवरङ्गवल्लरी ॥३२॥

---

२५. वसन्तरागे—वसन्तर्तुसमुचिते रागे, यद्वा सङ्गीतशास्त्रोक्त-वसन्तरागे ।

२७. अत्र वात्स्यायनोक्तं लतावेष्टितं साम्प्रयोगिकं व्यज्यते । कामदं—पक्षे कामं द्यति खण्डयतीति विग्रहो विधेयः ।

२९. इत्वरः—'हरजाई' इति भाषायाम् ।

३०. मधुपाः—भृङ्गाः, पक्षे सुरापायिनः, तेषामालिः । मधौ—वसन्ते, लिङ्गविपरिणामेन श्लिष्टार्थे मधुनि सीधुनि मधुपाननिमित्तमित्यर्थः इति निमित्तात्कर्मसंयोगे सप्तमी । द्विजान्—पिकान् पक्षिणः, पक्षे ब्राह्मणान् । अत्र मधुपैः सङ्गता इयं कामुकी (निम्बुवल्लरी) स्वजम्बीरफलाग्रभेदनैरुपलक्षिता (जम्बीरफलमध्यवसायेन वक्षः) सती द्विजानपि मधुपानार्थम् अभिकाङ्क्षति लक्षणया आमन्त्रयते इत्यहो विडम्बना इत्यपि ध्वन्यते । स्फुटाम्लगन्धा इत्यनेन कामुक्याः अतिशयमदपानं ध्वन्यते इति दिक् ।

३१. 'व्याङ्परिभ्यो रमः' इति परस्मैपदप्रयोगः । पातुं—चुम्बितुं, पक्षे रक्षितुम् । इत्यनेन वसन्ते रागोन्मत्ताः अन्ये पक्षिणः (कामुकाः) दुर्गन्धवतीमपि इमां मत्प्रियां निम्ब-(पिचुमन्द)—मञ्जरीं माऽभिसर्पन्तु इति हेतुना तां रक्षितुं प्रयाति इत्यपि ध्वन्यते।

३२. नवरङ्गं—नारङ्गम् ।

मुहुर्मुहुर्मानसजन्मना रुषाऽध्वगप्रियाः प्लोष्टुमहो समेधितः ।
प्रदग्धमिङ्गालचयो ज्वलत्यसौ पलाशगुच्छो न तु काननेऽरुणः ॥३३॥

प्रहृष्टरोमा स्मयमानचक्षुषा विकासिपद्मेन सरोजिनी स्वयम् ।
परागजालैरवगुण्ठिता मुहुर्दलाधरं पाययते शिलीमुखम् ॥३४॥

रागारुणः किसलयैर्हृदयप्रसून-
गुच्छं स्फुटं प्रविदधज्जगतामशोकः ।

सन्नूपुरक्वणनकामकलाप्रसक्त-
मुग्धावधूचरणताडनमिच्छति द्राक् ॥३५॥

गण्डूषगन्धिमदिरां प्रमदाजनेन
रागेण केसरतरौ सहसार्पितां किम् ।

संवीक्ष्य किन्नरयुवा युवतिं समाना-
मभ्येति पाययितुमेष मधुप्रियां स्वाम् ॥३६॥

मिलन्माकन्दश्रीरधितरु रसत्कोकिलरवै-
रलं भृङ्गश्रेणीविजडितवियोगिप्रियजनः ।

वयस्यं सन्नद्धं कुसुमविशिखैरेव विदधद्
विजेतुं संसारं दिशि दिशि मधुर्मञ्जुलयति ॥३७॥

स्फुरन्मल्लीवल्लीसरसकलिकादन्तमुकुल-
स्मितिज्योत्स्नापूरस्नपितभुवनाऽऽभूषितनूः ।

क्वणद्भृङ्गालीनां मणिमयतुलाकोटियुगला
वसन्तश्रीयोषा वनभुवमहो मञ्जुलयति ॥३८॥

नदत्केकावंशीमुखरकलगुञ्जच्छ्रुतिरियं
स्वरग्रामोन्मेषं श्रवणसुभगं षट्पदरवैः ।

---

३३. अध्वगप्रियाः-पथिकवनिताः, विरहिणीः ।

"प्रदग्ध.........काननेऽरुणः" इति अपह्नुतिप्रयोगेण सह-"आधे अनसुलगे सुलगि रहे आधे मानो विरहिदहन काम क्वैला परचाये हैं" इति सेनापतिकवेरुत्प्रेक्षा तुलनीया ।

३४. रहः-एकान्ते, अनेन नायिकाया लज्जाशीलता संसूचिता । 'स्वयं दलाधरं पाययते' इत्यनेन आत्मनेप्रयोगेण च तस्याः रागाविष्टतापि ध्वन्यते इति दिक् ।

३५-३६. अत्राशोकबकुलयोः दोहदक्रिया संकेतिता । पादाघातादशोको विकसति बकुलः सीधुगण्डुषसेकादिति प्रमाणात् ।

वहन्ती सा-रे-ग-म-प-ध-नि-युतं कोकिलरुतै-
र्लतालीलोल्लासैरनुसरति रागं स्वकरणः ।।३६।।

भरद्रसभरैरलं स्फुटरसालवृक्षैर्दिशां
हिता सुविहिता क्षणेऽरुणपिङ्गभूषा नवा ।
मधौ मधुपयौवतैर्मधुनि लालसाव्याकुलै-
र्मधूपकुसुमोष्ट्रिकाऽतिरभसं समाक्रम्यते ।।४०।।

वाताश्लेषभरत्तुषारकणिकाप्रस्वेदिनी मेदिनीं
किं किञ्कल्ककरम्बकण्टकभरैरामोदयन्ती भृशम् ।
सूनैर्मञ्जुलयत्यसौ स्मितिसुधापूरप्रभाभास्वरै-
र्मल्लीवल्लिमतल्लिका सुरभिता गन्धोन्मदं काननम् ।।४१।।

कवि-निवेदनम्

यं प्रासूत पतिव्रता व्रतयुतं घींसीतिनाम्नी मुदा
व्यासाच्छ्रीशिवदत्तशर्मविबुधाद् बुन्द्यां दधीचेः कुले ।
काव्ये शक्तिजये वसन्तविभवो[1] द्वैपायनेनामुना
भावालङ्कृतिपेशलो गुणमयः सर्गः कृतः पञ्चमः ।।

।। समाप्तोऽयं पञ्चमः सर्गः ।।

---

३६. यद्यपि केकावर्णनं कविसमयानुसारं प्रावृषि एव कर्तव्यं तथापि वसन्तेऽपि तासां प्रत्यक्षगोचरत्वं नाविदितं सहृदयानामिति नात्र वर्णने दोषोऽन्वेष्टव्यः । पद्येऽस्मिन् श्रुति-स्वर-ग्राम-राग-करण-(नृत्याङ्गहार)-शब्दानां सङ्गीतनृत्य-शास्त्रगृहीतत्वात् तदनुकूलोऽर्थो विधेयो विद्वद्भिरिति दिक् ।

४०. क्षणे-उत्सवे, वसन्तोत्सवे । मधौ-वसन्तर्तौ । मधुनि-सप्तम्यैकवचनान्तं क्लीबपदं, मधुपाननिमित्तम् ।
मधूककुसुमोष्ट्रिका-मधूपपुष्परूपि-मद्यभाण्डम्, उष्ट्रिका (मद्यभाण्डं) यथा "धूर्भङ्गसंक्षोभविदारितोष्ट्रिकागलन्मधुप्लावितदूरवर्त्मनि" इति माघे ।
पद्येऽस्मिन् पूर्वार्धे उत्तरार्धे चोभयत्र समासोक्तिद्वयसंसृष्टिः । प्रेयांसो वसन्तोत्सवे दयितानां सुगन्धिद्रव्यधूलिभिर्भूषां विदधत इति प्रथमा समासोक्तिः, मधुपायिस्त्रियः मधुपानार्थं मद्यभाण्डमेव वेगेन स्वायत्तीकर्तुं आक्राम्यन्तीति द्वितीया ।

१. वसन्तविभवः—वसन्तस्य विभवः समृद्धिः (तच्चित्रणं) यस्मिन् सः (पञ्चमः सर्गः) इति बहुव्रीहिविग्रहो विधेयः ।

मीमांसादर्शनसम्मतं मोक्षस्वरूपम्

—डा राजेन्द्रनाथशर्मा

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परम-पुरुषार्थ इति सर्वजनसुविदितमिति। "न स पुनरावर्तते" इत्यादि उप-निषद्वाक्येन तस्य मोक्षस्य नित्यताऽऽवधार्यते। स च मोक्षः सर्वेषामास्तिक-दर्शनसम्प्रदायानां प्रधानं लक्ष्यम्। मोक्षश्च आत्यन्तिको दुःखनिवृत्तिरिति तार्किकाणामभिमतम्। विधूतविषयाकारोपप्लवविशुद्धविज्ञानसन्तानोदयो मोक्ष इति योगाचारबौद्धानां मतम्। विषयाकारोपप्लुतविज्ञानसन्तानोपरमो मोक्ष इति माध्यमिकानां बौद्धानामभिप्रायः। कर्मकृतस्य देहस्वरूपावरणस्य अभावे जीवस्य सततोर्ध्वगमनं मोक्ष इति जैनाः मन्यन्ते। प्रकृतिपुरुषयोर्विवेकदर्शनात् पुरुषस्य स्वरूपावस्थानं मोक्ष इति सांख्याचार्याणामभिमतम्। अविद्यानि-वृत्तिरेव मोक्ष इति अद्वैतवेदान्तिनः।

मीमांसा-दर्शनेऽपि मोक्षाख्यः पुरुषार्थश्चतुर्थोऽस्ति। स एव हि परम-पुरुषार्थो यस्तैस्तैः कर्मभिर्यथावद् अनुष्ठितैः पुरुषैरवाप्यते। स वेदबोधितप्राप्ति-साधनीयो निरतिशयः सुखविशेष एव। अत एव श्रुतावपि सोमयागानुष्ठानान्तर-ममृतत्व प्राप्तिर्यजमानमुखेन अनुवर्ण्यते—"अपाम सोमममृता अभूम" इत्यादिना। तस्मान्मोक्षाख्यम् अमृतत्वप्राप्तिरूपं फलमपि कर्मजन्यमेव। श्रीमद्भगवद्-गीतायामपि कर्मण एव मोक्षजनकत्वं सुस्पष्टमभिहितम्[1]। सर्वत्र दुःखासम्भिन्नः सुखविशेष एव निरवधिको मोक्षामृतादिपदैरभिधीयते। अतो मीमांसानये कर्मजन्यस्वर्गाद्यपेक्षया नास्ति श्रेष्ठमतिरिक्तं किञ्चित् फलम्। तस्मादेव कारणात् सूत्रे भाष्ये च कुत्रापि स्वर्गातिरिक्तो मोक्षाख्यः फलविशेषः अस्माभिः नोपलभ्य।

मीमांसकानां मते तावद् आत्यन्तिको देहोच्छेदो निश्शेषधर्माधर्म-परिक्षयनिबन्धनो मोक्षः[2]। मोक्षस्य च अपुरुषार्थता नास्ति। यतो हि मोक्षस्य सांसारिकविविधदुःखोपरमत्वम्। पुरुषैश्च दुःखोपरमः प्रार्थ्यते। दुःखनिवृत्ति-

---

१. "कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥" इति, ३/२०

२. प्रकरण-पञ्चिका, पृ. ३४१

रेव मोक्ष इति प्राभाकरमीमांसकानामभिहितम् । भाट्टमीमांसकास्तु प्रपञ्च-विलयो मोक्ष इति वदन्ति । त्रिधा हि शरीरादिप्रपञ्चः पुरुषशब्दवाच्यमात्मानं बध्नाति । तत्र भोगायतनं शरीरम्, भोगसाधनानीन्द्रियाणि चक्षुरादीनि ग्रान्त-रिन्द्रियं मनश्च । भोगशब्देन सुखदुःखसाक्षात्कारोऽभिधीयते । तथा च एतत्-त्रिविधिस्यापि बन्धस्य ग्रात्यन्तिकसमुच्छेदो मोक्षः । उच्छेदे ग्रात्यन्तिकत्वञ्च पूर्वोत्पन्नानां देहेन्द्रियविषयाणां विनाशः, ग्रनुत्पन्नानामात्यन्तिकोऽनुत्पत्तिः । प्रारब्धकर्मणां भोगेन परिक्षयः । ग्रसति च देहान्तरारम्भे वर्तमानस्य शरीरस्य ध्वंसात् स्वरूपेणावस्थानं मोक्षः । उक्तञ्च कुमारिलभट्टपादैः—

"मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।[3]
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ।।" इति ।

बन्धनं नाम तदायत्तता । इन्द्रियाणि चक्षुरादीनि स्वस्वविषयेषु प्रवर्तमानानि तद्गतसौन्दर्यसौष्ठवसौम्यादिकं स्वविषयीकृत्य तन्मनसि विनिवेशयन्ति । तदुपरक्तं मनः तदुपभोगाय स्वाश्रयमात्मानं प्रेरयति । तत्-प्रेरयितश्चाऽऽत्मा तत्तद्विषयानुभवे प्रवर्तते । यदि तावत् पुरुषो दुर्बलस्तर्हि इन्द्रियाणि तमेव ग्रात्मवशीकृत्य स्वानुकूलं तं नयन्ति । सोऽपि तद्वशीकृतो युक्तायुक्तविचारशून्यः कृत्याकृत्यविमूढधीः विषयेषु उच्चावचेषु स्वैरं प्रवर्त्य-मानः दुष्टे मार्गे पतति । पतितोऽसमर्थः ग्रात्मानमुद्धर्तुं क्रमशो गच्छन्न-धस्सीदति सुतराम् । गीतायामपि तदेव स्पष्टमभिहितम् ।[4] "न स तत् पदमा-प्नोति संसारं च ग्रधिगच्छति" इत्यादि कठोपनिषदि चोक्तम् ।[5] धीराणां मेधाविनां पुरुषाणां पक्षे तु इन्द्रियाणि ग्रात्मवशीकृतानि भवन्ति । ते च युक्ता-युक्तविचारशीलाः पुरुषाः स्वेच्छानुसारेण तानीन्द्रियाणि प्रवर्तयन्ति । ततः क्रमशः स्वात्मनि पथि ग्रभिवृद्धिं समधिगच्छन् ग्रात्मानमेव समुद्धरन्ति ।[6]

पुरुषस्य शरीरेन्द्रियविषयसम्बन्धोऽविच्छिन्न एव बन्धः । तत्रैव च पुनः पुनरयं संसरतीति संसार इत्युच्यते । शरीरेन्द्रियविषयाणाम् ग्रात्यन्तिक-सम्बन्धविच्छेद एव मोक्षः । ग्रात्यन्तिकत्वं नाम पूर्वोत्पन्नस्य शरीरेन्द्रिय-विषयसम्बन्धस्य विनाशः । नूतनस्य ग्रनुत्पत्तिः । ताभ्यामेव सुखदुःखयो-रुच्छेदः । शास्त्रदीपिकादिग्रन्थपर्यालोचने तु ग्रात्यन्तिकात्मविशेष-गुणोच्छेदरूप एव मोक्षो भट्टपादादीनां मीमांसकानाम् ग्रभिमतमिति स्फुट-मवगम्यते ।

---

३. श्लोक-वार्तिकम्—सं. ग्र. परि. श्लो. ११०
४. इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ।—२/६०
५. १/३/७
६. "स तु तत् पदमाप्नोति यस्माद् भूयो न जायते ।"—कठोपनिषद् १/३/८

अध्वरमीमांसकानां द्विविधं मोक्षस्वरूपमभिमतमिति दर्शनान्तर-परिशीलनेन बोध्यते—काम्यनिषिद्धयोरनारम्भादारब्धफलस्योपभोगेन क्षयात् नित्यनैमित्तिकयोः कर्मणोरनुष्ठानेनाऽयत्नतयैव स्वात्मनि अवस्थानं मोक्ष इति प्रथमः प्रकारः। द्वितीयः प्रकारस्तु निरतिशयायाः प्रीतेस्स्वर्गशब्दायाः कर्महेतुत्वात् कर्मभ्य एव मोक्षः।

मुमोक्षोः वर्तमानस्याऽऽत्यन्तिकशरीरसम्बन्धभावशब्दितस्वात्मन्येव अवस्थानलक्षणो मोक्षः सिध्यति। अतः कर्मभ्यो मोक्ष इति। अतः शरीर-सम्बन्धस्य कर्मनिमित्तकत्वेन "निमित्तस्याऽपाये नैमित्तिकस्याऽपायः" इति न्यायेन शरीरसम्बन्धाभावरूपमोक्षस्य कर्मसाध्यत्वोक्तिरिति प्रथमपक्षस्य मतम्। द्वितीयपक्षस्य मते तावद् यानि खलु अग्निहोत्रदर्शपूर्णमाषचातुर्मास्या-दिकर्माणि स्वर्गसाधनत्वेन श्रुतानि तान्येव संयोगपृथक्त्वेन मोक्षसाधनानि। अतो निरतिशयप्रीतिरूपमोक्षस्य कर्महेतुकत्वप्रतीतेः कर्मभ्यो मोक्षः सिध्यति। तत्र प्रथमपक्षे एकभविकः सर्वेषां कर्मणां भोगेन क्षय इत्यपि विशेषो दृष्टः। एषः पक्षस्तावद् वार्त्तिककारस्य कुमारिलभट्टपादस्यैव इति बोद्धव्यः।[७]

भाष्यकारेण शबरस्वामिना कर्मैकप्रवणचित्तानां पुरुषाणां विषये मोक्षस्वरूपनिरूपणं न अतीव प्रयोजनमावहेत् प्रत्युत अनपायिनीं श्रद्धां कर्म-विषयिणीं शिथिलयेदिति मन्वानः ताटस्थ्यमवलम्बितम्।

स च मोक्षः एकस्मिन् जन्मनि बहुषु वा जन्मसु भवति तत्तददृष्टा-नुसारम्। तच्च फलैकसंवेद्यम्। प्रमाणान्तरेण तु तदियत्ता ज्ञातुं न शक्यते। न चात्र वेदान्तशास्त्रवत् कर्मणां कर्मजन्यादृष्टानां वा ज्ञानानाशत्वमभ्युप-गम्यते। तथा स्वीकारे प्रमाणाभावात्। तथात्वे प्रारब्धकर्मादृष्टस्यापि अविशेषात् ज्ञाननाशत्वपातात्। तथाहि श्रीमद्भगवद्गीतायाम्— □

"ज्ञानाग्निस्सर्वकर्माणि भस्मासात् कुरुते तथा" इति।[८]

विविधदुःखानामुच्छेद आत्यन्तिकविनाश एव मोक्ष इति प्रभाकर-मीमांसकानां मोक्षस्वरूपमेवादरणीयमित्यलं विस्तरेण।

प्रवक्ता, संस्कृत-विभागः,
गुवाहाती विश्वविद्यालयः,
असम—प्रदेशः।

---

७. परिशिष्टम्, प्रकरण—पञ्चिका, पृ. ३५१.
८. ४/३७.

साधारणीकरणम्

—सुरजनदासः स्वामी

न हि विभावादीनां साधारणीकरणमन्तरा रसादेः प्रतीतिः कथमपि जातुचिदपि सम्भवतीति अवश्यापेक्षणीयता रसादिप्रतीतौ विभावादिसाधारणीकरणस्य। साधारणीकरद्भावनस्य सर्वप्रथमं श्रेयो लभते सहृदयदर्पणकारो भट्टनायकः। यद्यपि प्रतिवस्तुनि सामान्यविशेषरूपस्य धर्मद्वयस्य सत्ताऽङ्गीक्रियते सामान्यतः सर्वैरेव प्रेक्षावद्भिः। यथा दुष्यन्तो दुष्यन्तत्वं विशेषो धर्मः, नायकत्वं कान्तत्वं वा साधारणो धर्मः। शकुन्तलायां शकुन्तलात्वं दुष्यन्तपत्नीत्वं च विशेषो धर्मः, नायिकात्वं कान्तात्वं वा सामान्यो धर्मः। एतादृशस्य च सामान्यधर्मरूपस्य साधारणीकरणस्याङ्गीकृतिर्भट्टनायकात् पूर्वमप्यासीत्। प्रतीयते चैतत् स्पष्टमभिनवभारत्या ध्वन्यालोकलोचनस्य रसगङ्गाधरस्य चोद्धरणैः। यथा —

"देवतादौ साधारणीकरणायोग्यत्वात् समुद्रलङ्घनादेरसाधारण्यात्। ......कान्तात्वं साधारणं वासनाहेतुविभावतायाः प्रयोजकमिति चेद्देवतावर्णनादौ तदपि कथम्।......अलोकसामान्यानां च रामादीनां ये समुद्रसेतुबन्धनादयो विभावास्ते कथं साधारण्यं भजेयुः।"[1]

"न च सा (स्वगतत्वेन) प्रतीतिर्युक्ता। सीतादेरविभावत्वात्। स्वकान्तास्मृत्यवेदनात्। देवतादौ साधारणीकरणायोग्यत्वात्। समुद्रलंघनादेरसाधारण्यात्।"[2]

"आत्मगतत्वेन तु प्रत्ययो दुर्घटः शकुन्तलादीनां सामाजिकान् प्रत्यविभावत्वात्। विना विभावमनालम्बनस्य रसादेरप्रतीतेः। न च कान्तात्वं साधारणविभावतावच्छेदकमत्राप्यस्तीति वाच्यम्। अप्रामाण्यनिश्चयानालिङ्गितागम्यात्व-प्रकारक-ज्ञानविरहस्य विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकस्य विभावतावच्छेदककोटावश्यं निवेश्यत्वात्। अन्यथा स्वस्रादेरपि कान्तात्वादिना तत्त्वापत्तेः।"[3] किन्त्वेतत् केवलं सामान्यधर्मपुरस्कारेण विभावाद्युपस्थापनं न तावत् फलावहं यावत् तेषु विभावादिषु रसप्रतीतिविरोधिनाम् अगम्यात्वादीनां धर्माणां स्थितिर्वर्तते। तेषु धर्मेषु विद्यमानेषु

१. ध्वन्यालोकलोचनम् पृ. १८०.

२ अभिनवभारती पृ. २७६.

३. रसगङ्गाधरः पृ. २३.

कान्तात्वादिसामान्यधर्मपुरस्सरं, विभावादीनामुपस्थापनेऽपि न सामाजिकानां तेभ्यो रसप्रतीतिः सम्भवति, विरोधिधर्मज्ञानस्य तत्प्रतिबन्धकत्वात्। अन्यथा तु मातृस्वस्रादेरपि कान्तात्वादिसामान्यधर्मपुरस्सरमुपस्थितौ तैरपि रसप्रतीतिर्जायेत सामाजिकानाम्। अतः सिद्धमेतन्निर्विवादं यद् विभावादीनां शकुन्तलादीनां कान्तात्वादिसामान्य-धर्मपुरस्सरमुपस्थित्या सह रसप्रतीतिविरोधगम्यात्वादिधर्माणां प्रतिबन्धोऽपि आवश्यकः । रसप्रतीतिविरोध्यागम्यात्वादिधर्मप्रतिबन्धपूर्वकं कान्तात्वादिसामान्यधर्मपुरस्कारेण शकुन्तलादीनां विभावानामुपस्थितिः सामाजिकेषु रसप्रतीत्यर्थमावश्यकी । एतदर्थमेव भट्टनायकेन काव्यशब्देषु भावकत्वं नामापूर्वो व्यापारः स्वीकृतः। संभवति चैतस्य व्यापारस्य सत्ता लौकिकेभ्यः शास्त्रीयेभ्यश्च विलक्षणेषु काव्यशब्देषु, तेषां गुणालङ्कारोपस्कृतत्वेन दोषविरहितत्वेन च सुन्दरत्वात्, अत एव च सहृदयसहृदयतासहकृतया मुहुर्मुहुः प्रतिसंधानरूपया भावनया तस्याः तादृशसाधारणीकरणसामर्थ्यवत्त्वात्। यद्यपि अभिनवभारत्यां ध्वन्यालोकलोचने च विवेचितस्य भट्टनायकमतस्यावलोकनेन नैतत् स्पष्टं प्रतिभाति यद् भट्टनायको रसप्रतीतिविरोधिनां धर्माणां प्रतिबन्धमप्यपेक्षते साधारणीकरणव्यापारे तथापि पूर्वपक्षप्रतिपादिते साधारणीकरणे देवतादेः समुद्रलंघनादेश्च साधारणीकरणायोग्यत्वेन तस्यासंभवं प्रतिपाद्य तदनु स्वपक्षे भावकत्वव्यापारेण तेषामेव साधारणीकरणत्वं प्रतिपादयता तेन सूचितमेतत् यत् पूर्वपक्षे शकुन्तलादिविभावानां कान्तात्वादिसामान्यधर्मपुरस्कारेणोपस्थितावपि विशेषस्य शकुन्तलात्वदुष्यन्तरमणीत्वादिरूपस्य धर्मस्य न ततो व्यावृत्तिर्भवति। अतः कान्तात्वरूपसामान्यधर्मपुरस्सरं शकुन्तलाया उपस्थितिरपि विशेषधर्मस्य शकुन्तलात्वादेर्जागरूकत्वेन सामाजिकेषु न रसप्रतीतिं जनयितुं प्रभवति। भावकत्वव्यापारश्च शकुन्तलादिविभावान् कान्तात्वरूपसामान्यधर्मपुरस्सरमुपस्थापयन् तेभ्यः शकुन्तलात्वादिरूपस्य विशेषधर्मस्य तज्जनितस्यागम्यात्वज्ञानस्य च रसप्रतीतिविरोधिनो व्यावृत्तिमपि विदधाति। अन्यथा पूर्वपक्षोत्तरपक्षप्रतिपादितयोः साधारणीकरणयोरविशेषात् न तयोः पूर्वपक्षोत्तरपक्षत्वं सिध्येत्। स्पष्टीकृतश्चैष भेदः पण्डितराजेन जगन्नाथेन रसगङ्गाधरे भट्टनायकाभिमतं रसस्वरूपं प्रतिपादयता निम्नाङ्कितेन सन्दर्भेण—

"तस्मादभिधया निवेदिताः पदार्था भावकत्वव्यापारेण अगम्यात्वादिरसविरोधिज्ञानप्रतिबन्धद्वारा कान्तात्वादिरसानुकूलधर्मपुरस्करेणावस्थाप्यन्ते।"[१]

भावकत्वव्यापारो हि विभावादिसाधारणीकरणात्मकः। साधारणीकरणमेव हि भावनम्। सिध्यत्येतत् 'विभावादिसाधारणीकरणात्मनाऽभिधातो

१. रसगङ्गाधरः पृ. २४,

द्वितीयेनांशेन भावकत्वव्यापारेण' इत्यभिनवभारत्यां भट्टनायकोक्त्या,[1] 'तच्चेदं भावकत्वं नाम रसान् प्रति यत् काव्यस्य तद् विभावादीनां साधारणत्वापादनं नाम' इति लोचनोक्त्या च ।[2]

'रसगङ्गाधर का शास्त्रीय अध्ययन' नामके शोधप्रबन्धे भावनस्य साधारणीकरणस्य च भेदं ब्रुवाणस्तपस्वी डॉ. प्रेमस्वरूपगुप्तो भ्रान्त एवैतस्मिन् विषये । भ्रान्तत्वादेव च स विभावादीनां साधारणीकरणं रत्यादेः स्थायिभावस्य च न साधारणीकरणमपि तु भावनं ब्रूते । अपि च साधारणीकरणं भावनस्य (भावकत्वव्यापारस्य) व्याप्यं प्रधानमङ्गं ब्रुवाणो गुप्तमहोदयो न प्रामाण्यमर्हति । तथा हि विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेणेति भट्टनायकोक्तिरुभयोर्भावनसाधारणीकरणयोरभेदं साधयति । विभावादिसाधारणीकरणात्मनेत्यत्र आत्मशब्दः स्वरूपबोधको न तु जीवनीयतत्त्वबोधकः । अत एव पण्डितराजो जगन्नाथो "भावनोपनीतः साधारणीकृतात्मा रत्यादिः स्थायी" इत्युक्त्या रत्यादेः स्थायिभावस्यापि साधारणीकरणमेव प्रतिपादयति न तु तद्भिन्नं भावनम् । तस्मादत्र डॉ. प्रेमस्वरूपगुप्तोक्तं सर्वमज्ञानमूलकमेव प्रतिभातीत्यलं परदोषोद्घाटनसंघटनया ।

हिन्दीसाहित्यजगति मूर्धन्यं पदमावहानो डॉ. नगेन्द्रमहोदयोऽपि स्वीये रससिद्धान्ताभिधे ग्रन्थे डॉ. प्रेमस्वरूपगुप्तस्योपर्युक्तं मतं समीक्षमाणः तदीयं मतं निराकर्तुमप्रभुः "हमारा विचार है कि इतना बारीक कातने से मूलसिद्धान्त के प्रतिपादन में बाधा पड़ती है" इति कथयित्वैव विश्राम्यति । अहो साधीयान् प्रकारः स्वाज्ञाननिगूहनस्य ।

साधारणीप्रकरणेऽत्रैव 'न च सा प्रतीतिर्युक्ता सीतादेरविभावत्वात् । स्वकान्तास्मृत्यसंवेदनात् । देवतादौ साधारणीकरणायोग्यत्वात् । समुद्रलंघनादेरसाधारण्यात् ।' इत्युक्तं भट्टनायकेन साधारण्ये पूर्वपक्षं निराकुर्वता । तस्यायमाशयो यत् सीतादीनां सहृदयं प्रति विभावत्वाभावात् न तैः सहृदये रसप्रतीतिः संभवति । सीतादिषु विभावेषु वर्तमानं कान्तात्वरूपं साधारणधर्ममादायापि सहृदये रसप्रतीतिरङ्गीक्रियेत चेत् सीताया मानुषीत्वेन तया कान्तात्वरूपधर्मेण सहृदये रसप्रतीतिसंभवेऽपि यत्र दिव्या नायिका, तत्र तस्यां देवतारूपनायिकायामाराध्यत्वज्ञानस्य प्रतिबन्धकस्य सत्त्वेन तस्यां कान्तात्वरूपधर्मस्य प्रतिपत्त्यसंभवात् । एवं कान्तात्वेन साधारणीकरणेऽपि परकीयैर्विभावैर्न सहृदये रसप्रतीतिरिति प्रतिपादितं भट्टनायकेन । परमुपर्युक्तं ग्रन्थं व्याचक्षाणो डॉ. नगेन्द्रः कथयति यद् रसस्य प्रत्यक्षात्मकप्रतीतिस्वीकारे सीतादिदेवीनां

---

१. अभिनवभारती पृ. २७७.

२. ध्वन्यालोकलोचनम् पृ. १८३.

समुद्रलंघनादिदेवकार्याणां च साधारणीकरणं न स्यात्, परमेषां साधारणीकरणं सिद्धम्, अतो रसस्य प्रतीतिरसिद्धेति ।[1] एतत् सर्वमनर्गलप्रलपितम् । को वा सचेताः प्रेक्षावान् वा ईदृशीं व्याख्यां कुर्याद् ऋते डॉ. नगेन्द्रमहोदयात् । को वा च तदन्यः पूर्वपक्षसम्मते साधारणीकरणे, भट्टनायकसंमते च साधारणीकरणे आपतितस्य विरोधस्येदृशं परिहारं कुर्यात् ।

साधारणीकरणं च भट्टनायकरीत्या विभावानुभावव्यभिचारिस्थायिभावानां च समेषामेव भवति । तदुक्तं गोविन्दठक्कुरेण प्रदीपे—'भावकत्वं हि साधारणीकरणम् । तेन हि विभावादयः स्थायी च साधारणीक्रियन्ते । साधारणीकरणं चैतदेव यत् सीतादिविभावानां कामिनीत्यादिसामान्यधर्मेणोपस्थितिः । स्थाय्यनुभावादीनां च सम्बन्धिविशेषानवच्छिन्नत्वेन ।'[2]

स्पष्टीकृतं चैतदभिनवभारत्यां भट्टनायकमतप्रतिपादनावसरे—'विभावादिसाधारणीकरणात्मना अभिधातो द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानः स्थायी भावः' इत्युक्त्या ।[3] अत्र विभावादीनां स्थायिनां च सर्वेषामपि साधारणीकरणमुक्तम् । भाव्यमानता—भावनं साधारणीकरणं चेत्येतेषामर्थान्तरत्वात् ।

अपि च विभावादिषु प्रतीयमानानां देशकालवयोऽवस्थादीनां परिहाररूपमपि साधारणीकरणं वर्तते भट्टनायकमते । अन्यथा तेषामपरिहारे रसप्रतीतिविरोधिनां भिन्नदेशकालादीनां परिज्ञाने न साधारण्येनोपस्थितैरपि विभावादिभिः सामाजिके रसप्रतीतिः संभवति । अत एव पण्डितराजेन जगन्नाथेन भट्टनायकमतं प्रतिपादता 'एवं साधारणीकृतेषु दुष्यन्तशकुन्तला-देशकालवयोऽवस्थादिषु' इत्युक्तम् ।[4] अन्यथा कथङ्कारमेवं पण्डितराजो ब्रूयात् । अतो डॉ. प्रेमस्वरूपगुप्तस्य इयमुक्तिः 'भट्टनायक को विभावादि का साधारणीकरण अभीष्ट है । स्थायिभावों का नहीं' इति परास्ता वेदितव्या ।

---

१. इन वाक्यों को पढ़कर ऐसा प्रतीत होता है मानो भट्टनायक को अलौकिक पात्रों और कार्यों का साधारणीकरण मान्य नहीं, किन्तु स्थिति सर्वथा विपरीत है । भट्टनायक तो उसे मानकर ही चलते हैं और चूंकि उनका साधारणीकरण सिद्ध है । इसीलिए रस की (प्रत्यक्ष) प्रतीति असिद्ध हो जाती है । उनका तर्क स्पष्ट है । यदि रस की प्रत्यक्ष प्रतीति मान ली जाय तो सीतादि विभावों और समुद्रलंघनादि देवकार्यों का साधारणीकरण नहीं हो सकेगा । परन्तु चूंकि उनका साधारणीकरण सिद्ध है इसलिए रस की प्रतीति असिद्ध है ।

२. प्रदीप टीका पृ. ९५.

३. अभिनवभारती पृ. २७७.

४. रसगंगाधरः पृ. २४.

आचार्योऽभिनवगुप्तपादोऽपि विभावानुभावव्यभिचारिणां रत्यादेः स्थायिभावस्य च साधारण्यं स्वीकरोति । परं तन्मते विभावानां कान्तात्वादि-सामान्यधर्मपुरस्सरमुपस्थापनमेव न साधारण्यमपितु विभावादीनां व्यक्ति-विशेषसम्बन्धस्वीकारनियमपरिहारनियमयोश्चानध्यवसायः विशिष्टदेशकाल-सम्बन्धपरिहारश्च । तदुक्तम् अभिनवभारत्याम्—

'हरस्तु किञ्चिदित्यादिवाक्ये वाक्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिका अपहसिततद्वाक्योपात्तकालादिविभागा तावत् प्रतीतिरुपजायते ।.........तदत्र साक्षात्कारायमाणत्वे परिपोषिका नटादिसामग्री । यस्यां वस्तुसतां काव्यार्पितानां च देशकालप्रमात्रादीनां नियमहेतूनामन्योन्य-प्रतिबन्धबलात् अत्यन्तमपसरणे स एव साधारणीभावः सुतरां परिपुष्यति ।'[1] अत्र सर्वे हिन्दीसाहित्यदिग्गजाः "अभिनवगुप्तः प्रमातुरपि साधारण्यं स्वीकरोति" इति मन्यन्ते । परं ते नितरां भ्रान्ताः, तेषां भ्रान्तेश्च कारणम् आचार्यमम्मटस्य पण्डितराजजगन्नाथस्य च निम्ननिर्दिष्टे वचने स्तः—

"सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियत-प्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमित-प्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा ।'[2] इति ।

'अत एव प्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा ।'[3] इति ।

अनयोर्वचनयोराशयं ते प्रमातुः परिमिततायाः परिहार इत्यवगच्छन्ति । परं नैष तयोर्वचनयोरयमाशयः । प्रथमे काव्यप्रकाशोद्धरणे परिमित-प्रमातृभावशब्दस्यायमर्थो यत् यद्यपि साधारणीकृतैर्विभावादिभिरुद्बुद्धा सामाजिके या रतिः सा यद्यपि नियतप्रमातृगता सामाजिकविशेषनिष्ठा वर्तते, तथापि रसास्वादनकाले तस्यां रतौ नियतप्रमातृगतता नश्यति । अर्थात् सा सामाजिकविशेषसम्बद्धा न वर्तते, अपि तु सर्वप्रमातृगतता तत्र वर्तते । अयमर्थः तदानीं नियतप्रमातृगतापि सा रतिः परिमितप्रमातुर्भावः चित्तवृत्तिविशेषः इति रूपेण न ज्ञायते, अपि तु तद्राहित्येन ज्ञायते । अतः साधारणीकरणं प्रमातृगतस्य रत्यादेः स्थायिभावस्य भवति न तु प्रमातुः । रत्यादिस्थायिभावे व्यक्तिविशेषसम्बन्धरूपपरिमितप्रमातृभावस्य विगलनमेव तत्र अपरिमितप्रमातृभावः । अर्थात् सा उद्बुद्धा रतिः न व्यक्तिविशेष-सम्बद्धा अपि तु तद्रहिता सामान्या सर्वसाधारणेति ज्ञायते । व्यक्तिविशेष-सम्बन्धानवच्छिन्नतैव अनुभावव्यभिचारिरत्यादीनां साधारण्यम् इति पूर्वं

---

१. अभिनवभारती पृ २७९.

२. काव्यप्रकाशः पृ. ९२.

३. रसगङ्गाधरः पृ. २२.

प्रतिपादितम्। अत एतदुद्धरणं रसास्वादकाले अभिव्यज्यमानस्य रत्यादेः स्थायिभावस्य साधारण्यं प्रतिपादयति न तु प्रमातुः।

रसगङ्गाधरीयस्योद्धरणस्याप्ययमेवाशयो वर्तते।

स्पष्टीकृतं चेतद् बालबोधिन्याम्। तथाहि "तत्कालं-रसास्वादकालं विगलितः-अप्रतीतो यः परिमितप्रमातृभावः-ममैवैतेऽहमेव रसास्वादयिता इत्येवं रीत्या अननुभूयमानो यो व्यक्तिविशेषसम्बन्धः तद्वशेन उन्मिषितः-प्रादुर्भूतः अपरिमितो भावः-चित्तवृत्तिविशेषो यस्य तेनेति अपारिमित्यं-साधारण्यं प्रमातृविशेषनिष्ठत्वेनाग्रहे सति गृह्यमाणत्वम्" इति ग्रन्थेन।

अपरं च भ्रान्तिकारणम्–आचार्याभिनवगुप्तपादस्य अभिनवभारत्यां 'तत एव न परिमितं साधारण्यम् अपि तु विततम्' इत्युक्तिः। अर्थात् अभिनवगुप्तो न केवलं विभावादीनां साधारण्यमङ्गीकरोति यथा भट्टनायकः। अपि तु स व्यापकं साधारण्यं स्वीकुर्वाणः प्रमातुरपि साधारण्यं स्वीकरोतीति आशयं मन्यन्ते ते विपश्चितः उपरिनिर्दिष्टाया अभिनवोक्तेः। परमत्रापि ते भ्रान्तास्तपस्विनः। अस्याः उक्तेरयमेवाशयो यत् स्थायिनो भावस्य व्यक्तिविशेषसम्बन्धादिपरिहारेण यत् साधारण्यं न तत् केवलमेकस्मिन् प्रमातरि (सामाजिके) अपि तु सर्वेष्वेव प्रमातृषु यथा धूमाग्न्योर्व्याप्तिः सा न देशविशेषनिष्ठा कालविशेषनिष्ठा अपि तु सर्वदेशकालनिष्ठेति। एवं रत्यादेर्भावस्यापि साधारण्यं सकलप्रमातृनिष्ठमिति व्यापकत्वं तत्र बोधितं न तु प्रमातुः साधारणीकरणम्। स्पष्टीकृतं चैतदभिनवभारत्यामेवाग्रे धूमाग्न्योर्व्याप्तिग्रह इव' इत्युक्त्या।[1]

साधारणीकरणं प्रत्येकस्य सामाजिकस्य भवति। अतस्तद् वैयक्तिकं न सामूहिकम्। किन्तु सर्वस्यापि सामाजिकस्य तत् साधारणीकरणं भवति। अत एव सर्वः सामाजिकः स्वगतं स्थायिभावं देशकालव्यक्तिविशेषसम्बन्धराहित्येन साधारण्येन आस्वदते। अतो रसास्वादनकाले सर्वस्यापि सामाजिकस्य स्थायिभावस्य साधारण्येन देशकालव्यक्तिविशेषनिर्मुक्तत्वेनोपस्थितया सकलसहृदयानामेकघनतयैव प्रतिपत्तिर्भवति इत्युक्तम् अभिनवभारत्यां न तु सामूहिकक्रियामादाय। अतः साधारणीकरणं सामूहिकीं क्रियां ब्रुवाणो डॉ. नगेन्द्रमहोदयो भ्रान्त एवेत्यवधेयम्।

साधारणीकरणविषये विभावादीनां सर्वेषां न साधारण्यमपि तु केवलस्य विभावस्येति साधयद्भिः आचार्यश्रीरामचन्द्रशुक्लमहोदयैर्बहु स्वच्छन्दमुदितम्—"यथा व्यक्ति तो विशेष ही रहता है पर उसमें प्रतिष्ठा ऐसे सामान्य

---

१. अभिनवभारती पृ. २७९.

धर्म की रहती है जिसके साक्षात्कार से सब श्रोताओं व पाठकों के मन में एक ही भाव का उदय थोड़ा या बहुत होता है।..........विभावादि सामान्य रूप से प्रतीत होते हैं। इसका तात्पर्य यही है कि रसमग्न पाठक के मन में यह भेदभाव नहीं रहता कि यह आलम्बन मेरा है या दूसरे का। थोड़ी देर के लिए पाठक या श्रोता का हृदय लोक का सामान्य हृदय हो जाता है।"

अत्रेदमुच्यते विभावादीनां साधारणीकरणानङ्गीकारे को नाम व्यक्ति-विशेषमवरुणद्धि। साधारणीकरणेऽपि सीता सीतैव वर्तते। परं तत्र भावकत्व-व्यापारेण रसप्रतिबन्ध्यागम्यात्वज्ञानपरिहारपूर्वं केवलं कान्तात्वस्य ज्ञानं भवति न तु रसप्रतिबन्धकस्य सीतात्वादेर्धर्मस्य। न हि भ्रमज्ञानेऽपि शुक्तिः शुक्तित्वरूपेण नावतिष्ठते अपि तु तिष्ठत्येव। केवलं तत्र दोषवशात् शुक्तित्वं न ज्ञायते अपि तु रजतत्वं ज्ञायते इत्येव भवति। न हि केवलं सीतायां सौन्दर्यादिधर्मप्रतिष्ठायामपि सीता तावत् सर्वेषां रतेरालम्बनं भवितुमर्हति यावत् तस्यां रसप्रतिबन्धकानां सीतात्वादिधर्माणां परिहारो न भवति। एतच्च सीतादेर्विभावस्य साधारणीकरणेनैव सिध्यति न तु सीतायां शीलसौन्दर्यादि-गुणानां वर्णनमात्रेण। अन्यथा शीलसौन्दर्यादिगुणान्विताः सर्वाः स्त्रियः सर्वेषां रतेर्भाजनं स्युः।

अपि च विभावादिसाधारणीकरणस्येदमेव तात्पर्यं यद् रसास्वाद-दशायां पाठकस्य चेतसि एषा ममालम्बनं परस्येति भेदो नश्येत्। विभावादि-साधारणीकरणमन्तरा सहृदयहृदये स्थायिनोऽनुद्बोधाद् रसमग्नतैव तावत् न भवति। अतो रसमग्नतायां साधारणीकरणं कारणं न तु रसमग्नतायाः कार्यम्।

किञ्च न केवलं विभावस्य साधारणीकरणेनैव रसास्वादः सिध्यति। स्थायिभावोद्बोधे विभावानुभावव्यभिचारिणां सर्वेषां कारणत्वात्। विभावस्य साधारणीकरणेऽपि अनुभावादेर्व्यक्तिविशेषसम्बन्धितापरिहाररूपसाधारणी-करणमन्तरा अभिव्यज्यमाना रतिर्व्यक्तिविशेषसम्बन्धित्वेनैवाभिव्यज्यते। तादृश्याश्च रतेरास्वादः कथमपि सामाजिकैः कर्तुं न पार्यते लौकिकरतिवत्। अपि च व्यक्तिविशेषसम्बद्धाया रतेर्लौकिकरतितुल्यत्वेन तदास्वादे रसस्या-नन्दात्मकत्वमलौकिकत्वं च न सिध्येत्। अपि च यत्र नायके नायिकायां वा एतादृशा गुणा न सन्ति ये लोकसामान्यस्य रुचिमुत्पादयितुं समर्थास्तत्र काव्ये रावणमन्दोदर्यादिविभावानां साधारणीकरणाभावेन न तानालम्ब्य सहृदयानां हृदये रतेरुद्बोधो रसास्वादश्च न संभवेत्। अतः उपर्युक्ते दोषोत्करे जाग्रति श्रीशुक्लमहोदयानां विभावस्यैव साधारणीकरणं न साधीयः प्रतिभाति।

साधारणीकरणे आलम्बनद्वारा भावानुभूतिः प्रथमं कवौ, ततः कवि-वर्णितनायके ततश्च श्रोतरि पाठके चेति शुक्लमहोदयानामुक्तिरपि न सहृदय-हृदयावर्जिका। प्रथममालम्बनोद्दीपनविभावानां लौकिकानां चर्वणया भावोदयो

नायके भवति। ततस्तदीयविभावानुभावव्यभिचारिणां दर्शनेन तेषां साधारणीकरणद्वारा कविहृदये स्वीयो भाव उद्बोधमायाति। तत आस्वदते तं कविः। ततस्तादृशस्य भावस्य गुणालङ्कारसंस्कृतैः शब्दैः प्रकाशनेन तत्काव्यमधीत्य विभावानुभावादिज्ञाने जाते सहृदयहृदयतासहकृतया भावनया तेषां विभावादीनां साधारणीकरणेन सामाजिक-हृदये वासनारूपेण विद्यमानो रत्यादिभावोऽभिव्यक्तिमायाति। तस्य च साधारणीकृतस्य भावस्यास्वादनेन सहृदयस्य रसानुभूतिर्भवति। एष खलु क्रमः। एनं क्रममनुरुध्यैव 'नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः' इति भट्टतौतेन नायकादीनां त्रयाणां क्रमेण समानानुभूतिर्बोधिता। परं श्रीशुक्लमहोदयैस्तस्य विपर्यासः कृतो यः सिद्धान्तविरुद्धोऽनुभवविरुद्धश्च। नायककविश्रोतृषु याऽनुभूतेः समानता निगदिता भट्टतौतेन तस्याप्ययमेवाभिप्रायो यत्ते साधारणीकृतं स्वीयं भावमास्वदन्ते। साधारणीकृतस्य च स्वीयस्य भावस्य व्यक्तिविशेषसम्बन्धराहित्येन प्रतीत्याभेदकारणाभावात् समानतैव। अतो न केवलमेषामेव त्रयाणामपि तु सर्वसामाजिकानामेकघनतयैव रसप्रतीतिरुपपादिताऽभिनवगुप्तेनाभिनवभारत्याम्।

साधारणीकरणस्य सम्बन्धो न सर्वैर्विभावादिभिर्भवति, अपि तु कवेर्भावुकस्य वा चित्तवृत्त्या भवति इत्युक्त्वा चित्ते एकाग्रे साधारणीकृते च सति सर्वं खलु साधारण्येन प्रतीयते इत्याचार्यकेशवप्रसादमिश्राणामुक्तिरपि न सहृदयहृदयाह्लादिका। यतो हि चित्तस्यैकाग्र्यं न चित्तवृत्तेः साधारणीकरणम्। तथा हि चित्तस्यैकतानता खलु चित्तस्यैकस्मिन् विषये विनिवेशनम्। तदानीं च ध्येयविषयाकारेण चित्तस्य स्थितिर्भवति। यथा कामिन्यां चित्तविनिवेशने चित्तस्य कामिन्याकारता। आत्मनि च चित्तविनेवशने चित्तस्यात्माकारता। नातोऽन्यथा चित्तस्यैकतानता, ऐकाग्र्यं वा।

तदुक्तं श्रीमद्भागवते—'विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते॥'[1]

तथा च विषयविशेषे चितस्य विनिवेशने तस्य विषयाकारतायां सत्यामपि न तदानीं सर्वं साधारण्येन प्रतीयते। अपि च साधारणीकरणस्य सम्बन्धो न केवलं चित्तवृत्या अपि तु विभावादिभिरपि वर्तते। काव्ये नाट्ये वा विभावादीनां साधारण्येन प्रतीतिरूपां चर्वणामन्तरा भावुकस्य कवेर्वा चित्तवृत्तेः साधारण्येन प्रतीत्यसभवात्। अत एव प्राचीनैरालङ्कारिकैः चित्तवृत्त्याः साधारण्येन प्रतीतौ विभावादीनां साधारण्यं तदौपयिकत्वेन स्वीकृतम्।

---

१. श्रीमद्भागवतम् ११ स्कन्धः १४ अध्यायः २७ श्लोकः।

वर्तमानकाले हिन्दीसाहित्यजगति अप्रतिमां प्रतिष्ठां बिभ्राणस्य डॉ. नगेन्द्रमहोदयस्यापि साधारणीकरणविषयकं मतं न प्रेक्षावतां मनस्तोषाय प्रभवति। स हि आचार्यशुक्लाचार्यमिश्रमहोदयानां साधारणीकरणसम्बन्धीनि मतानि प्रत्याख्याय केवलं कविभावनायाः साधारणीकरणं मनुते। अत्र हि तेन प्रयुक्तो भावनाशब्दः पारिभाषिकः। स हि काव्ये विभावानुभावादिरूपेण कविना वर्णितं काव्यप्रसङ्गं जडं प्रतिपादयन् अनुभूत्यपरपर्यायां कविभावनां च चेतनां प्रतिपादयन् तस्या एव साधारणीकरणमुररीकरोति। कवेरनुभूतिः न सामान्यभावानुभूतिः अपि तु कलापरपर्याया पुनः सर्जनानुभूतिः। तस्याः सर्जनात्मिकायाः भावनापरपर्यायायाः कवेरनुभूतेः साधारण्यं च स्वीकरोति। या भावना एकतः कवेरर्थं व्यनक्ति अपरतश्च प्रमातुश्चित्ते समानमर्थमुद्बोधयति। काव्यप्रसङ्गस्तु अस्या एव भावनाया मूर्तरूपं बिम्बो वा।

साधारणीकरणं हि चेतनक्रिया। अतश्चेतनरूपाया उपर्युक्तायाः कविभावनायाः साधारणीकरणं भवति न त्वचेतनस्य काव्यप्रसङ्गस्य। अपि च विभावानुभावादिभेदभिन्नस्य सर्वस्य काव्यप्रसङ्गस्य साधारण्यापेक्षया कविभावनायाः साधारण्यं मनोवैज्ञानिकं लाघवमूलकञ्च। अतस्तस्या एव साधारण्यं स्वीकार्यम्, न तु विभावानुभावादिरूपस्य सर्वस्याचेतनस्य काव्यप्रसङ्गस्य। कविभावनाया अपि साधारण्यमेतदेव यत् कविः स्वीयामनुभूतिमेवं प्रकाशयेत्। यथा सा सर्वेषां सचेतसां हृदि स्वसमानानुभूतेर्जागरणे समर्था भवेदिति।[1]

अत्रेदं विविच्यते यत् सहृदयहृदये समानभावाभिव्यक्त्यर्थं समानभावानुभूत्यभिव्यक्त्यर्थं वा तादृश्याः कलात्मिकायाः पुनः सर्जनात्मिकाया अनुभूतेरावश्यकता यया कविः सचेतसां चेतसि स्वसमानभावान् उद्बोधयेत्। परं कविस्तदर्थं द्वेषविरहितानां गुणालङ्कारसंस्कृतानां समर्थानां शब्दानामेव निबन्धनं करोति नान्यत् किञ्चिदपि। तादृशैश्च समर्थैः शब्दैरुपस्थापिता विभावादयः सौन्दर्यातिशयेन सहृदयहृदये प्रवेशं लभमानाः मानसिकाः सन्तः मनसि सहृदयेन स्वीयसहृदयतासहकृतया मुहुर्मुहुरनुसन्धानरूपया भावनया भाविताः देशकालव्यक्तिविशेषसम्बन्धराहित्येन साधारण्यं भजन्ते। परं तु समर्थैः शब्दैरुपस्थापितानामपि विभावादीनां मनसि भावनया साधारण्यापादने यदि सहृदयोऽसमर्थः स्यात्तदा न तादृशैः शब्दैरुपस्थापिता अपि विभावादयः सहृदयहृदये कविसमानां रत्यादिभावानुभूतिं व्यञ्जयितुमसमर्था इति न केवलं कविभावनायाः साधारण्येन सहृदयस्य कार्यं सिध्यति स्वीयया भावनया तेषां साधारण्यापादनं विना। अन्यथा समर्थकवेः काव्यस्याध्ययनेन सर्वेषामप्य-

---

१. रससिद्धान्तः श्रीनगेन्द्रकृतः।

ध्येतृणां हृदये रत्याद्यनुभूतिः स्यात् सर्वोऽपि च रसस्यास्वादको भवेत्। तदुक्तं लोचनकारेणाभिनवगुप्तेन–'येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता तेऽत्र सहृदयाः' इति।

वर्णनीयतन्मयीभवनयोग्यता च विभावादीनां रत्यादेः स्थायिभावस्य च साधारणीकरणमन्तरा न भवतीति सकलसहृदयहृदयानुभवसिद्धम्। इति शम्।

—कृष्णा मार्गः, सी-स्कीम, जयपुरम्

प्रयत्नं न जहाति धीरः

—वैद्यः रामस्वरूपशास्त्री

(१)

कणं समादाय जवान् मनःस्वी,
उपैति वल्मीकभुवं पिपीलः।
आरोढुमिच्छुः वर्णां प्रयत्नात्,
भारेणसार्धं समुपैति निम्नम्॥

(२)

धीरो मुखे तन्दुलमादधानः,
भूयः स उत्थाय पुनः प्रवृत्तः।
भित्तिं समारोढुमतिप्रयत्नात्,
स्खलन् पृथिव्यां पुनरेति तान्तः॥

(३)

तनोति यत्नं मरणादभीतः,
पतन् पतन्नेति शतं निपातान्।
पूर्णप्रयत्नेन करोति कार्यं,
श्रान्तोऽपि धैर्यात् च्यवते न धीरः॥

सम्पादकः, बाल-संस्कृतम्, बम्बई-८६

आपस्तम्बीयोद्वाहसमीक्षणम्

—डॉ० राजेन्द्रमिश्रः

श्रुत्यर्थ-विचारः

गर्भाष्टमं वयो हि स्त्रीणामुद्वाहकर्मणि प्रधानभूतः काल इति श्रुति-स्मृतिवादेषु प्रसिद्धम्। तथा च भगवान् हारीतः स्मरति—'छन्दःसु पादाक्षर-समुदायवदब्दसमूह उपनयने' इति (स्मृ० सन्दर्भ ९७५)। सृष्टिश्च छन्दसा सह तैत्तिरीये सप्तमकाण्डे समाम्नायते—'प्रजापतिरकामयत प्रजायेति समुख-तस्त्रिवृतं निर्मिमीत तमग्निर्देवता अन्वसृज्यत गायत्री छन्दो रथन्तरं साम ब्राह्मणो मनुष्याणाम्' इत्यादिना। अष्टाक्षरागायत्री (पि. ६ सू० १०) इति श्रुतिवचनेन हारीतवचनमनुसृत्य गर्भाष्टमं वयो ब्राह्मणानामुपनयने कालः सम्पद्यते।

विवाहश्च स्त्रीणामुपनयनस्थाने विहित इति तासामपि अष्टमं वय एवोद्वाहकालो भवितुमर्हति। स्मृतावपि—'वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः। पतिसेवा गुरोः वासः गृहार्थोऽग्निपरिक्रिया॥ (मनु० स्मृ० २.६७) इति मनुरब्रवीत्। वैदिकोऽयं संस्कारः उपनयनाख्य एव इति कुल्लूकभट्टो व्याचख्यौ (मनु० २.६६, पृ० ३८)। व्याघ्रपादश्च—स्त्रीणामु-पनयनस्थाने विवाहे मनुरब्रवीत् (म० स्मृ० २.६७ टी०) इत्याह। अतोऽव-गच्छामः गर्भाष्टमं वा जन्मतो वाष्टमं वयः स्त्रीणां विवाहकाल इति। तथा गौणोऽपि कालः स्त्रीणां रजोदर्शनात् प्रागेवेति श्रुतावेव तैत्तिरीयाणां खिलेष्वितिहासे श्रूयते –

पितृगृहेषु या कन्या रजः पश्यत्यसंस्कृता।
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः॥ इति। तै० खिल–४ १५.

वृषलीपतेस्तु निन्दापि श्रूयते तत्रैव—'वृषलीपतिभुक्तानि श्राद्धानि च हवींषि च। पितरो न प्रतिगृह्णन्ति दाता स्वर्गं न गच्छति" इति, 'पक्षैस्तु कुक्कुरो हन्ति निघर्षेण च सूकरः। आगतं गतयाश्वानश्चक्षुषा वृषलीपतिः'॥[1] इति च। स्मृति वचनान्यत्र विषये परस्तादुदाहरिष्यामः। तदेवं निन्दाश्रुतेः रजसोऽनन्तरं विवाहः प्रतिषिध्यत इति गम्यते।

---

१. तु० मनुस्मृति—३.१६, पृ० ७०

कथं पुनर्निन्दावचनैः रजसोऽनन्तरं विवाहः प्रतिषिध्येत, यत्कारणं मुख्यकालप्रशंसामेव तानि वचनानि गमयन्ति, अन्यथा नहि निन्दान्यायविरोधः प्रसज्यते। अत्र ब्रूमः-नात्र नहि निन्दान्यायः प्रसज्यते, परामर्शाधिकरणन्याय-विरोधात्। तत्र हि ब्रह्ममीमांसायां—ब्रह्मसम्बन्धोऽमृतत्वमेति इति वचनं विध्यन्तरस्यादर्शनात् विस्पष्टाच्चाश्रयान्तरप्रत्ययाद्गुणवादकत्वनयैकवाक्य-त्वयोजनानुपपत्तेः परिव्राज्यमेवापूर्णत्वाद्विधातुमर्हति इति निर्णीतम्। एव-मिहापि वृषलीत्वं वृषलीपतित्वं निन्दा चेति त्रितयमपूर्वं श्रूयमाणम्, अपूर्वमेव कमप्यर्थं विधातुमर्हतीति रजसोऽनन्तरं विवाहस्य प्रतिषेधं विधायैवोपशाम्यति।

अपि चात्र श्रूयमाणा निन्दा नेतरप्रशंसार्थं स्यात्, तस्या विवाहप्रकर-णान्तःपातित्वात्। अतः नहि निन्दान्यायस्यात्राप्रवृत्तेः अभ्युपगन्तुं प्रभवामः। सर्वमिदमभिप्रेत्यैवाह भगवान् मनुः—'पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रति-ष्ठिताः। नाकन्यासु क्वचिन्नॄणां लुप्तधर्मक्रियाहिताः' इति (मनु० ८. २२६ पृ० २६०)। अत्र कन्यास्वेव बालिकास्वेवेत्यर्थः, तत्र तत्पदरूढेः, तस्माद् बालिकास्वेव विवाहमन्त्राः संगच्छन्ते, न पुनर्युवतिषु इति वदन् मनुः ऋतु-मतीविवाहं प्रतिषेधयतीति स्पष्टमवगम्यते। अत्रापरे प्रत्यवतिष्ठन्ते। नानेन वचनेनर्तुमतीविवाहं प्रतिषेधयतीति अभ्युपगन्तुं प्रभवामः।

कन्याशब्दार्थ-विचारः

कन्या शब्दो हि विवाहरहितामेव केवलं स्त्रियमाचष्टे। तथा चाह श्रीमान् माधवाचार्यः 'लोकप्रसिद्धस्तु कन्याशब्दो विवाहरहितस्त्रीमात्रमाचष्टे' (परा० मा० पृ० १४) इति। नन्वेवम्। ननु ऋतुमत्यां कन्याशब्दः कथं प्रयुक्त इति माधवाचार्याणामेव शंकाग्रन्थो नोपपद्यते। नैष दोषः, पूर्वपक्षोक्तिः ह्येषा, न पुनः सिद्धान्तवचनम्, अत एवानन्तरं शास्त्रेषु विविधार्थेषु प्रयुज्यते कन्याशब्दः, तेषामविरोधाय कन्याशब्दः विवाहरहितस्त्रीमात्रमाचष्टे इत्यभ्युपगन्तव्यमिति माधवाचार्या अब्रुवन्।

एतेनायं शब्दः बालिकास्वेव रूढ इति परास्तम्। अत एव भगवान् पतञ्जलिः—'या चेदानीं प्रागभिसम्बन्धात् पुंसा सह सम्प्रयोगं गच्छति तस्यां कन्याशब्दो वर्तत एव'—इत्यब्रवीत्। कन्यायाः कानीन च इत्यत्र (म० भाष्य भा० ३, पृ० ७०१–७०२) तथा चाचार्यकैयटोऽपि एवमेव प्राह। तस्माद् अवि-वाहितायामेव कन्याशब्दः प्रयुज्यत इति शास्त्रविदां मर्यादा (महाभाष्ये–तत्रैव २७१)। अत एव असंस्कृतायाः कन्यायाः कुतो लोकोस्तवानघे इति, ऋतु-स्नाता तु या शुद्धा सा कन्येत्यभिधीयते (महाभारत श० प० २०, २३) इत्यादिशब्दपर्वोमामहेश्वरसंवादादिवचनजातं संगच्छते। तस्मात् विवाह-रहितस्त्रीमात्रे कन्याशब्दं प्रायुङ्क्त भगवान् मनुरित्यकामेनाप्यभ्युपगन्त-व्यमिति।

अत्राभिधीयते—नायं कन्याशब्दः सामान्येन प्रयुज्यमानः ऋतुमतीमपि गमयितुमीष्टे, बालिकास्वेव तत्पदरूढेः। अत एवाहामरसिंहः—'कन्या कुमारी गौरी तु नग्निकानागतार्तवा' (अ० को० २-६,८) इति। अत्र गौर्यादयस्त्रयः शब्दाः अनागतार्तवा ब्रुवन्तीति रामश्रमिणां व्याख्या। अतस्तत्पूर्वं श्रूयमाणौ द्वावपि कन्याकुमारीशब्दौ बालिकामेव ब्रूत इत्यङ्गीकर्तव्यम्। अत एव तु शब्देन गौर्यादिशब्दत्रयात् व्यवच्छिनत्ति, उतरत्र क्रमप्राप्तान्युवतिवाचकाञ्छब्दांश्च अनुक्रमात्यमरः स्यान्मध्यमा दृष्टरजा इति (अ० को० २-६, ८)।

असति बाधके रुढ्यर्थस्य परित्यागस्त्वन्याय्य इति बालिकामेवाभिप्रेत्य कन्याशब्दं प्रायुङ्क्त भगवान् मनुरिति श्लिष्यते। ननु विवाहरहितायामेव कन्याशब्दः रूढ इति माधवाचार्या अब्रुवन्नित्यवोचाम, वाढम्, प्रौढ्या अभ्युपगतं तैरिति ब्रूमः। कथम्? कन्या ते प्रासूत सुतम् इत्यादि लौकिकव्यवहारविरोधात्। न चात्रापि कन्याशब्दः अविवाहितां स्त्रियमाचष्ट इत्यमूढोऽध्यवस्यति कन्या ते प्रासूत सुतम् इति परेणोच्यमानं श्रुत्वा कश्चित्पिता प्रमोदमधिगच्छति। यद्यविवाहिता ह्यात्मीया दुहिता सुतमसूत इति शृणोति, विषादमेवायं गच्छतीति प्रसिद्धं लोके। तस्मादभियुक्तैरात्मीयासु दुहितृषु दुहितृकन्यासु वा कन्याशब्दः लोके प्रयुज्यत इत्येवाङ्गीकर्तव्यम्। एवं हि असंस्कृतायाः कन्यायाः इत्यादि बहुवचनानि संगच्छन्तेतराम्। अपि च ऋतुस्नाता तु या शुद्धा सा कन्येत्यभिधीयते इत्यत्र कन्याशब्दः कथमविवाहितायामाचष्ट इत्यवेदीः। विवाहितास्वपीयं परिभाषा संगच्छते। न च शुद्धेत्यनेनाविवाहितेति वक्तव्यम्, प्रमाणाभावात्।

माधवाचार्यास्तु-'ऋतुमत्यां कन्याशब्दः नसंगच्छत इति विवदमानं पूर्वपक्षिणं प्रति नायमेकान्तः यद्बालिकायामेव कन्याशब्दः प्रयुज्यत इतीत्येव प्रतिपादयितुं प्रवृत्ताः प्रौढिवादेनाऽभ्युपगच्छतीति ब्रूमः। बालिकायां तु रूढोऽयं कन्याशब्दः अन्यत्रापि गौणतया प्रयुज्यते। यदपि महाभाष्योदाहरणम्, तदपि गौणतया अविवाहितासु वर्तत इति ब्रूमः। अत एव भाष्यव्याख्यानावसरे कैयटोऽपि-अन्ये त्वाहु-मुनिदेवतामाहात्म्यात् या पुंयोगेऽप्यक्षतयोनिर्भवति इत्युक्त्वा तत्र कुन्तीचरितमुदाजहार। अत्राक्षतयोनिः अप्राप्तरजस्का एव भवितुमर्हति, न पुनरस्पृष्टमैथुना। या पुंयोगेऽप्यक्षतयोनिः इति विरोधात्। यदि पुंयोगः कथमस्पृष्टमैथुना स्यात्, तस्मादक्षतयोनिम् अप्राप्तरजस्कामेनाभिप्रैति कैयट इत्यभ्युपगच्छामः। अपि चोदाहरणे कुन्तीचरितं निर्दिशति। तच्चैवं श्रूयते महाभारते-'संत्यज्य भयमेवेह क्रियतां संगमो मया' (आदिपर्व) इत्यब्रवीत् भगवानादित्यः। प्रतिवचनमपि तस्याः वैशंपायन एवमाह-'सा तु नैच्छत् वरारोहा कन्याहमिति भारत' (आदिपर्व) इति।

कथमत्र कन्याशब्दस्याविवाहितेत्यर्थः संगच्छेत् । न हि विवाहिता अन्येन संगता न प्रत्यवैतीत्यभ्युपगन्तुं प्रभवामः, प्रमाणविरोधात् । अविवाहिता च प्रथमादित्येनोढा न कस्याप्युपहासास्पदं गच्छति । अपि च क्रियतां संगमो मम इति वदन्तमादित्यं कन्याहं इति प्रत्यब्रवीत् । तच्च नाहमुपभोगयोग्या-स्त्रीत्येवार्थेऽभ्युपगते संगच्छते । अपि चोपरिष्टात् यथा पुरस्तव कन्यात्वं प्रापया-मीति प्रलोभ्य तामुपयुक्तवानिति श्रूयते । तच्च कथं भवत्यक्षमनुकूलयेत् । अविवाहितां त्वां करोमि इत्यर्थे कथनमसमञ्जसमेव स्यात् । तस्मादत्र भारते श्रूयमाणः कन्याशब्दः ऋतोः प्राचीने वयसि वर्तमानामेव स्त्रियं सम्यगाचष्ट इत्यभ्युपगन्तव्यम् । अमुमर्थमुदाहरन् कैयटोऽपि अक्षतयोनिशब्देनर्तोः प्राचीने वयसि स्थितामेवाभिप्रैतीत्यङ्गीकर्तव्यम् । ननु साहसमेतत्, मेधातिथि-प्रभृतिभिरक्षतयोनिरस्पष्टमैथुनेति व्याख्यातत्वात् । नैष दोषः । नावश्यं मेधातिथिव्याख्यानेनास्पष्टमैथुनेत्यर्थः संपद्यते । अक्षतयोनिग्रहणं पुनर्विवाहेन पत्नीत्वमाशङ्कमानं निवर्तयति, सहोढजकानीन मातॄणां च इत्येव सोऽब्रवीत् (मनुस्मृ० मेधा० भा० पृ० ४७) ।

स्पष्टमनेनाक्षतयोनिशब्दं परिभाषां मनुते मेधातिथिराचार्य इत्युत्प-श्यामः । द्वित्राणि व्याख्यानानि मुक्त्वा अन्यत्र स्पष्टतया अस्पृष्टमैथुनेत्यर्थ-वर्णनस्यादृष्टत्वात् । अस्तु वा तथा वर्णनं सर्वत्र, तथापि तादृशोऽर्थो गौण इति ब्रूमः । अक्षतयोनिशब्दस्तु शक्त्या प्राप्तरजस्कायामेव वर्तते । क्षते हि शरीरे शोणितनिर्गमो दृष्ट इति शोणितप्रसृतिलक्षणेन क्षतयोनिशब्दस्य प्रवृत्तेः । तदभावेनाक्षतयोनिः स्त्री भवतीति क्वचिद्वयोविशेषावस्थायां निय-म्यते शास्त्रेषु । एतेन वृद्धायामपि कदाचिदक्षतयोनिशब्दः प्रसज्ज्येतेति मन्द-शंकापि परास्ता । क्षतयोनेः प्रायेण पुरुषसम्पर्को भवतीति क्षतयोनिः स्पृष्ट-मैथुना, अक्षतयोनिः पुनरस्पृष्टमैथुनेत्यर्थकल्पनं व्याख्यानेषूपलभ्यमानं गौण-मेव भवितुमर्हति । तस्मादप्राप्तरजस्का भवत्यक्षतयोनिरित्यत्र न कापि क्षतिः ।

सर्वथापि तु कन्याशब्दः अप्राप्तरजस्कायामेव मुख्यतया वर्तते, गौण-तया त्वन्यत्रेति अवश्यमङ्गीकर्तव्यम् । पराक्रान्तं चैतत्सूरिभिर्वयोनिर्णये । आस्तां तावदिदम् । अनुसरामः प्रकृतम् । किमभिप्रेत्य कन्याशब्दं प्रायुङ्क्त भगवान् मनुरिति विचारयामः । बालिकामप्राप्तरजस्कामेव मनुरभिप्रैति ब्रूमः । तथा हि यदि कन्याशब्दस्याविवाहितेत्यर्थो गृह्यते । 'नाऽकन्यासु क्व-चिन्नृणाम्' (मनुस्मृ० ८.२२६, पृ० २६०) इति वाक्ये दोषो नोपपद्येत । अकन्यासु विवाहितासु पाणिग्रहणिका मन्त्राः प्रतितिष्ठन्ति वा न वेति शंकाया एवानुदयात् अन्याय्यत्वाच्च तादृशी शंका । व्यर्थमेव स्यादिदं वचनं भवदी-यार्थस्याङ्गीकारे । गान्धर्वविवाहे मन्त्रतः पुनर्विधानं शास्त्रेषु दृष्टमिति न तन्निवारणायेदं वचनमिति प्रत्यवस्थातव्यम् । तस्मादविवाहितां स्त्रियं द्वेधा विभज्य कासांचिन्मंत्राः प्रतितिष्ठन्ति अन्यासां तु न सन्तीत्यर्थं मनसि निधाय

कन्या अकन्या इति शब्दद्वयं प्रयुङ्क्ते। अविवाहिता पुनः प्राप्तरजस्काप्राप्तरजस्का चेति द्विधैव भवितुमर्हति। नन्वप्राप्तरजस्का भवत्यकन्या प्राप्तरजस्का तु कन्येति कल्पयामः। नैतन्न्याय्यं प्रमाणाभावात् विरोधाच्च। पराक्रान्तं चैतत्प्रथममेवामरविचारे। तस्मादकन्या प्राप्तरजस्कैव भवितुमर्हति। अपि चेदं वचनमष्टमाध्याये दण्डप्रकरणे श्रूयते। तत्र पूर्वम् अकन्येति तु कन्यां ब्रूयात् द्वेषेण मानवः। स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् (मनु ८. २२५) इत्याह। अत्र कुल्लूकः नेयं कन्या क्षतयोनिरियमिति यो मनुष्यो द्वेषेण ब्रूयात् (८. २२५ पृ० २६०) इति व्याचख्यौ। अनन्तरं युक्तश्चास्याकन्येतिवादिनो दण्डः यस्मात् इति पाणिग्रहणिका इति श्लोकमवतारयति। न चात्र पूर्वश्लोके अकन्या कन्याभिन्ना विवाहितेत्यर्थः संगच्छते क्षतयोनिरियम् इति व्याख्याविरोधात्। न हि क्षतयोनिर्नाम विवाहितेति क्वापि उभाभ्यामावाभ्यामभ्युपगतम्, क्षतयोनिः स्पृष्टमैथुनेति भवताभ्युपगतत्वात्, अन्तरेणापि विवाहं स्पृष्टमैथुनायां क्वचिच्छास्त्रेषु कन्याशब्दस्य प्रयुक्तत्वाच्च।

कथमत्र सा अकन्या भवितुमर्हति। अथाकन्या कन्याभिन्ना स्पृष्टमैथुनेत्यभ्युपगच्छसि प्रतिज्ञाविरोधस्ते प्रसज्येत, अस्पृष्टमैथुनायामेव कन्याशब्दस्य नियमेन भवता अनभ्युपगतत्वात्। अथेदानीमेवमङ्गीकरोमीति ब्रूषे, स्पृष्टमैथुनायामप्ययं शब्दोऽवर्तत एवेति महाभाष्यवचनं प्रतिकूलमेव स्यात् भवताम्। तस्मादन्यथानुपपद्यमानमिदमकन्यापदं कुल्लूकभट्टरीत्या प्राप्तरजस्कामेव लक्षयति। क्षतयोनिश्च प्राप्तरजस्कैवेत्यपि कुल्लूकस्याभिप्राय इत्यप्यङ्गीकर्तव्यः। तस्मात् अकन्येति तु यः कन्याम् इत्यत्राकन्यापदमृतुमतीमेव ब्रूयात्। अपि चोत्तरश्लोके लुप्तधर्मक्रियाहिता इति वाक्यशेषः कथमभ्युपपद्येत यद्यकन्या नाम विवाहिता स्यात्। ननु सा स्पृष्टमैथुना स्यात्, एवं हि लुप्तधर्मक्रियाभवितुमर्हति। न, विवाहात् स्पृष्टमैथुनायां धर्मलोपाभावात्।

अथ मतमन्तरेण विवाहं स्पृष्टमैथुना अकन्येति, तदपि न संगच्छते। स्पृष्टमैथुनायामपि तादृश्यां कन्याशब्दः वर्तत एवेति प्रपञ्चितत्वात्। तस्मादस्मदुक्त एवार्थः परिग्राह्यः। अकन्या हि प्राप्तरजस्का लुप्तधर्मक्रिया भवति, अतः अप्राप्तरजस्का तथा भूतेयमिति दूषयन् तस्याः विवाहसंस्कारं प्रतिषिध्य श्रेयोद्वारमेव बाधत इत्यवश्यमसौ पुरुषो दण्डमर्हतीति एव सुतरां प्रतिपादयति मनुरिति अकामेनाप्यभ्युपगन्तव्यम्।

आलोचनेन प्रतिभाति यत् सिद्धमृतुमतीविवाहः शास्त्रतः प्रतिषिध्यते, कन्याया एवर्तोः प्राचीने वयसि वर्तमानायाः विवाहो विधीयत इति च। पराक्रान्तं चात्र परेषां मतं बहुधा प्राचीनैः।

तथापि केचिन्न्यायाभासयुक्त्याभासवाक्याभासवष्टम्भाः शास्त्राणामन्यथाभावं वर्णयन्तो व्यर्थकल्पनेन सर्वमपि लोकमाकुलीकुर्वन्ति। तत्र वैदिक-

मार्गे बद्धश्रद्धैस्तत् परिरक्षणं यथाशक्ति कर्तव्यमिति न्यायमेकमेवावलम्ब्य अस्यानर्थहेतोः प्राप्ताय सम्यगर्थनिर्धारणाय च प्रवृत्ताः, तेषां यद् व्याख्यानं तद्-व्याख्यानाभासं न सम्यग्व्याख्यानमित्यस्मिन् उद्वाहविमर्शे प्रदर्शयिष्यामः ।

वैवाहिक-मन्त्रार्थविचारः

तत्र तावद् वैवाहिकमन्त्रास्तात्पर्यतो विचार्यमाणाः रजस्वलोद्वाहमेवो-पस्थापयन्तीति पूर्वपक्षी प्रत्यवतिष्ठते । तथा हि—अघोरचक्षुः (आप० गृ०, पृ० ६०) इत्यादि मन्त्रे वध्वाः सौमनस्यादिकमभिधीयते । तच्च वध्वाः युव-तिभावमेव गमयति, अतथाभूतायां सौमनस्यादिकामनायाः असंभवात् । तथा जीवांरुदन्ति विमन्यते (आप० गृ०, पृ० ७३) इति मन्त्रे स्पष्टमेवालिङ्गन-मुच्यते । तदपि युवतिभावमेवोपोद्बलयति । शं ते हिरण्यम् (आप० गृ० ६८) इत्यादिमन्त्रे मया पत्या तन्वं संसृजस्व (आप० गृ० पृ० ७८) इत्यत्र पति-शरीरसंसर्ग उच्यमानः दृढमेवर्तुमत्या एव विवाहं गमयति । सखा सप्तपदा भव (आप० गृ० वि० प्रक०) इति मन्त्रे ऋक्सामद्युपृथिव्यादिदृष्टान्तपूर्वक-मत्यन्तकामिनोर्नर्मसंलापवत्परस्परसख्यं स्त्रियं प्रति बहुप्रपञ्चमभिधीयते वरेण ।

किमितोऽप्यन्यद्गवेषणीयं वध्वाः युवतिभावं व्यवस्थापयितुम् । एव-मन्यान्यपि यथासंभवं मन्त्रलिङ्गानि द्रष्टव्यानि । ननु स्मृतिषु स्पष्टमेव निषिध्यते रजस्वलाविवाहः । बाढम्, तथापि पौरुषेयस्मृत्यपेक्षया मन्त्रलिङ्गा-न्येव बलवन्ति भवन्ति अपौरुषेयत्वात् । अतः विरोधे त्वनपेक्षम् (सू० १. ३. २७) इति न्यायेन वैदिकलिङ्गप्राबल्यमङ्गीकृत्यर्तुमतीविवाह एव शास्त्रीय इत्येवं प्राप्ते ब्रूमः, न ऋतुमतीविवाहः शास्त्रीय इति । कस्मात् ? स्मृतिषु निषि-द्धत्वात्, नन्वस्ति मन्त्रलिङ्गमित्यवोचाम, बाढमवोचः, नैतन्न्यायं पश्यामः, लिङ्गाभावात् । सामर्थ्यलक्षणं हि लिङ्गम्, न पुनर्यत्किंचिच्छब्दश्रवणम् । तथा चावोचन् सर्वतन्त्रस्वतन्त्राः श्रीमन्तो वाचस्पतिमिश्राः भामत्याम्—अस्त्यै-न्द्री ऋगित्यारभ्य, अत्र हि सामर्थ्यलक्षणाल्लिङ्गादिन्द्रे विनियोगः प्रतिभाति इति वेद्याद्यर्थभेदात् (ब्र० ३. ३. २५) इत्यधिकरणे । कदाचनस्तरीरसि इत्यादिमन्त्रे मघवेन्द्रशब्दाभ्यामिन्द्र एव विनियोगो गम्यते । तथा इमं मे वरुण श्रुधीहवम् इत्यत्रापि वरुण एवोपस्थेय इति । एवमिहापि सामर्थ्यलक्षणमृतु-मतीबोधकं लिङ्गं नोपलभामहे । नहि सौमनस्यादिकं युवतिमेवाव्यभिचरित-सम्बन्धेनोपस्थापयेत् जुह्वादिवत्, बालिकास्वपि सम्भवात् ।

आलिङ्गनमपि श्रूयमाणं नर्तुमतीमुपस्थापयति । नैतदालिङ्गं संभो-गाय, अपितु वियोगमसहमानान्बन्धुजनान्प्रति सादरमिमां परिगृह्णामि परिपाल-यामि च, मा विषादं गच्छतु भवन्त इति बोधयितुमेव । अपि चायं मन्त्रस्तत्त्वतो विचार्यमाणो नालिङ्गनं विधत्ते । बन्धुजना वध्वाः परिष्वङ्गाय पर्याप्तं विवाहं

प्रवर्तितवन्तस्ते मा रुदन्तु इत्येव मन्त्रार्थो भवति। तस्मान्नैतल्लिङ्गं भवितुमर्हति। शं ते हिरण्यम् इत्यत्रापि श्रूयमाणः बध्वाः पतिशरीरसंसर्गः न तावत्कालिकं वध्वाः युवतिभावं गमयति संभोगकाले संसर्गस्य तत्र विवक्षितत्वात्। ननु संनिहित एव काले चतुर्थे दिने समावेशनस्य विधानादर्तुमतीत्वमवश्यमभ्युपगन्तव्यमिति यद्युच्येत, तर्हि तदेवात्र लिङ्गमितिपूर्वपक्षः कर्तव्यः नत्वनेन मन्त्रेणेत्यागतम्। उपरिष्टाच्चोन्मथिष्यामश्चतुर्थीसमावेशनमतम्। तस्मान्नानेन मन्त्रेण ऋतुमतीविवाहः सिध्यति।

सखा सप्तपदा भव (पा० गृ० सू० का. १) इति मन्त्रे मर्मवचनेन स्त्रीपुंसोः सख्यमेव अविच्छिन्नं कीर्त्यते न पुनर्युवतिभावोऽपि। रेतोमृत्वं सामाहमस्मि वाक्त्वम् (आप० गृ० वि०) इत्यादिषु स्त्रीलिङ्गपदैः स्त्रीत्वमेव बहवः अभिधीयते, कथमेतावता ऋतुमतीत्वमपि तस्याः अवगम्यते, शब्दानां तादृशार्थबोधने सामर्थ्याभावात्। तस्मात् नानेनापि मन्त्रेणर्तुमतीविवाहः शास्त्रीयः संपद्यते।

स्यादेतत्। अस्ति चायमपरो मन्त्रः, यः स्पष्टमेवर्तुमतीविवाहमुपक्षिपति-सोमः प्रथमो विविदे (आप० गृ०, पृ० ७५) इत्यादिकः। तत्र हि तुरीयस्ते मनुष्यजाः (आप० गृ० ७५) इति श्रूयते, तत्पूर्वमग्निः पतिरिति च। अग्नेः पतित्वं तु रजः प्रादुर्भावकाल एव, रजस्यग्निः प्रतिष्ठित इति स्मृतिवचनात्। तस्माद्रजसोऽनन्तरं स्त्रीणां विवाहः शास्त्रीयो भवतीति। एवं प्राप्ते ब्रूमः—नानेन मन्त्रेणर्तुमतीविवाहो गम्यते। अत्र हि सोमगन्धर्वादीनां पतित्वमेव केवलं श्रूयते न पुनः ऋतुमतीत्वमपि वध्वाः, ननूक्तम् प्रतिष्ठित इति स्मृतिवचनमस्तीति सत्यम्, तथापि स्मृत्यानुगृहीतोऽयमृतुमतीविवाह इति हि वक्तव्यम्, न तु श्रौतं लिङ्गमस्तीति। कथं पुनरेवमुच्यते। न वयं सर्वथा स्मृतिमनादृत्य श्रुतिमेकामेव प्रमाणीकुर्मः, यथासंभवं स्मृत्यनुसारेणापि श्रुत्यर्थः परिग्राह्य इत्येवातिष्ठामहे। तस्मात् अस्ति श्रौतं लिङ्गमिति चेत्, तर्हि श्रौतलिङ्गस्य प्राबल्यं कथमेकान्तेन भवताऽभ्युपगन्तुं शक्यते। स्मृतिमप्यनुसरति श्रुतिरिति अाः कष्टमसंमतोऽयं पंथाः शिष्टानामिति हि त्वदीया ब्रूयुः। तस्मान्नात्र श्रौतं लिङ्गं पश्यामः। अथापि भवतः श्रद्धामनुरुद्ध्य स्मृतिमभ्युपगच्छामः श्रौतलिङ्गप्रसिद्ध्यै, एवमपि न दोषाद्विनिर्मोक्षः। तथा हि समानप्रकरणे संवर्तस्मृतौ सोमगन्धर्वादीनां कालमविधायैव वाक्यशेषः श्रूयते तस्मादुद्वाहयेत् कन्यां यावन्नर्तुमती भवेत् इति (स्मृ० सन्द० पृ० १७५८)। अत्र यावदृतुमती भवेत् तावन्तोद्वाहयेत् इत्यर्थकल्पनमनवबोधविजृम्भितमेव स्यात्, यथाश्रुतिगृहीतार्थभङ्प्रसंगात्। न च पूर्ववाक्यस्यार्थवर्णनं न्याय्यमिति प्रत्यवस्थातव्यम्। कन्याप्रदानकालस्योपक्रमेऽनवगतत्वात्। न चासति बाधके यथाश्रूतिगृहीतार्थभङ्गः कर्तव्य इति निरूपितं शास्त्रदीपिकायां पर्णमय्यधिकरणे। तस्मान्न सर्वात्मनानेन मन्त्रेणर्तुमती-

विवाहः सिध्यति। पराक्रान्तं चात्र निपुणतरं सूरिभिर्वयोनिर्णये। तस्मान्नर्तुमतीविवाहः शास्त्रीय इति।

एवं परिहृतेऽस्मिन्मन्त्रे पुनरन्यस्मान्मन्त्रात् पूर्वपक्षी प्रत्यवतिष्ठते। उपमामुच्चा युवतिर्बभूयाः इति मिथः समीक्षणे विनियुज्यते। अस्याऽयमर्थः–हे युवति, सम्भोगकाले उपरिसन्तं मामनुभूया इति न चात्र वध्वाः ऋतुमतीत्वबोधकं युवति इति संबोधनश्रवणात्। युवतिशब्दस्तु प्राप्तरजस्कायामेव रूढः।

ननु उपक्रमे तावल्लाजाहोममन्त्रः एवं श्रूयते-अर्यमणं नु देवं कन्या अग्निमयक्षत इति। कन्याशब्दस्यात्र श्रवणात् तस्य चाप्राप्तरजस्कायामेव रूढत्वात् उपक्रमाधिकरणन्यायेनोपरिगतो युवतिशब्द एव तदनुरोधेन नेतव्य इति। नेति ब्रूमः। कथम् ? युवतिपक्षोपोद्बलकानि बहूनि लिङ्गानि दृश्यन्ते। पूर्वम् अपश्यं त्वा मनसा दीध्यानां (दीप्यमानां ध्यायन्तीं वा) स्वीयां तनुमृत्विये नाथमानाम् इति श्रूयते। अत्र गर्भं प्रार्थयमानामित्यर्थः। उत्तरत्रापि–प्रजापते तन्वं मे जुषस्व इत्यादिकः पाठ्यते। तत्र या न ऊरु उशती विस्रयाते यस्यामुशन्तः प्रहरेम शेफम् इति स्पष्टमेव मैथुनाय प्रार्थना दृश्यते। सर्वमिदं युवतिशब्दार्थमेवोपोद्बलयति। ननु जपे खलु प्रजापते इत्यादेर्विनियोगः। अपि च प्रार्थना खल्वेषा। सा चानृतुमत्यामपि कालान्तरे संभाव्येत। नेति ब्रूमः। यद्यपि विनियोगो भवति जपे तथापि स्वनिमित्ताश्रयाद्यर्थप्रकाशकत्वमपि संभवति मन्त्रस्येति निरूपितमस्मदीयैरभियुक्तैः विचारप्रसंगे। अत एव क्षीरिणामन्येषां वा लक्ष्यण्यानां वृक्षाणां नदीनां धन्वनां च व्यतिक्रमे उत्तरे यथालिङ्गं जपति (आप० गृ० सू० ६–५) इत्यब्रवीदापस्तम्बः। अत एव तीर्थस्थाणुचतुष्पथव्यतिक्रमे चोत्तरां जपेत् (आप० गृ० ५–२६) इत्यत्र एवमेव व्याचख्यौ सुदर्शनाचार्यः। तस्मादत्रापि जपे विनियुक्ते मन्त्रे ह्यस्त्येव लिङ्गं युवतिभावमुपोद्बलयत्। यद्यपि उपक्रमस्य प्राबल्यं, उपक्रमस्थमेकलिङ्गमुपरितनानेकगुणविरोधे दुर्बलमिति प्रपञ्चितमुत्तरमीमांसायां दहराधिकरणे (ब्र० १. ३. १४) तस्माद्दहराधिकरणन्यायेनोपसंहारमनुसृत्यैवोपक्रमगतः कन्याशब्दः कथंचिन्नेय इति। एवं प्राप्ते ब्रूमः–नैतदेवमिति। न ह्युपसंहारे सन्ति बहूनि लिङ्गानि। न हि ऊरुशेफप्रभृतीनां शब्दानामेव श्रवणमात्रेणर्तुमतीत्वं वध्वाः अध्यवस्यन् भवति श्लाघनीयप्रज्ञः, कन्यास्वपि मन्त्रार्थस्य संभवात्, प्रार्थनात्मकत्वात् च क्रियापदानाम्। यथा अनेनैव प्रार्थनेन विवाह्यामतथाविधाम्। अप्रौढां गमयन्ती सत्यनुगृह्णाति च स्मृतीः इति।

ननु मन्त्राणां स्वनिमित्ताश्चर्याद्यर्थप्रकाशकत्वमप्यस्ति भगवताऽपस्तम्बेन तथोक्तत्वादित्यवोचाम। बाढम्, तदसंगतमिति ब्रूमः। आपस्तम्बेन तथा नोक्तत्वात्। तथा हि तीर्थस्थाणुचतुष्पथव्यतिक्रमे इति सूत्रे श्रौतलिङ्गा-

पेक्षया स्मार्तश्रुतेः प्राबल्यं प्रसाध्य विनियोगविध्यनुसारेण मन्त्रलिङ्गानि इति निरूप्य न्यायतस्तु जपमन्त्रोनार्थपर इत्यन्ततोऽन्यहवयच्छ्रीमान् सुदर्शनाचार्यः। क्षीरिणाम् इत्यत्र तु लिङ्गाद्विनियोगविधिमभ्युपगच्छति, न पुनर्लिङ्गादेव सर्वत्र विनियोगविधिरभ्युपगन्तव्य इति वा मन्त्रार्थानुसारेणैव विधेरप्यर्थोऽङ्गीकर्तव्य इति वा प्रतिपादयति, येन श्रीमतामभीष्टः सिध्यति।

अपि च न्यायतस्तु जपमन्त्रो नार्थपर इति वदन् सुदर्शनाचार्यो विध्यनुसारेणार्थवत्वं मन्त्राणामभ्युपगच्छति न पुनर्विपरीतम्। तस्मात् प्रजापते तन्वं मे इति मन्त्राणां जपे विनियुक्तत्वात् न तात्कालिकीं प्रौढावस्थां ते बोधयेयुः, कन्यास्वपि कालान्तरे संभवात्। तस्मान्नैतान्युपोद्बलकानि भवन्ति लिङ्गानि। अत उपसंहारे बहुलिङ्गप्रतिज्ञा मृषैव भवतीति उत्सर्गप्राप्तमुपक्रमप्राबल्यमङ्गीकृत्यैव युवतिशब्दः स्त्रीवाचक इति नेतव्यः।

अपि चोपक्रमे कन्यापितृभ्यो पति इत्यत्रापि कन्याशब्दो दृश्यते। तस्मान्नानेन मन्त्रेणर्तुमतीविवाहः सिध्यत्ति। एतेनेतरे मन्त्राः व्याख्याता वेदितव्याः। अत एव सर्वज्ञशिखामणिर्भगवान्मनुः पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिता इत्यब्रवीत्। तस्मान्नास्ति क्वापि मन्त्रलिङ्गं यद्बलेनर्तुमतीविवाहः शास्त्रीयः स्यादिति सिद्धम्।

गृह्यसूत्र–विचारः

अवसितः श्रुत्यर्थविचारः; इदानीं गृह्यसूत्राणि विचारयामः। तत्र तावद्भगवानापस्तम्बः शेषं समावेशने जपेत् इत्याह। किमनेन सूत्रेण भगवान् चतुर्थदिने समावेशनं विदधात्याहोस्विन्नेति वादिविप्रतिपत्तिः, किं तावत्प्राप्तं, विदधातीति कस्मात्? प्रमाणोपलम्भात्। तथा हि त चतुर्थ्यापररात्र इत्यारभ्य संस्कारजातं विधायेदं पठति शेषं समावेशने जपेत् इति। तस्मात्पश्यामः चतुर्थ्यां विधीयते समावेशनमिति। ननु समावेशने जपेत् इत्येव पठ्यते। तथा च तस्मिन्काले जपेत् इति फलति। समावेशनं तु किं केन कथमित्यादिकं नात्रोपलभ्यत इति चेत्, न, उत्तरत्रं रजसः प्रादुर्भावात् स्नानामृतुसमावेशने इति श्रुतात् ऋतुलिङ्गात् समावेशनं नाम वध्वा सह मैथुनार्थं शयनमिति सुदर्शनाचार्येण व्याख्यातत्वात्।

तर्हि उपरिनिर्देश्यमानमेवर्तुसमावेशनमत्रापि प्रत्यभिज्ञायते शब्दैक्यादिति तदनुवादेन जप एव केवलमत्र विधीयते इति अभ्युपगच्छामः। नैवं शक्यतेऽभ्युपगन्तुं, तत्रर्तुसमावेशनस्य विधानाभावात्। नन्वत्रापि विधिं नोपलभामहे। बाढम्; अनुपलभमाना अपि त्वनुमास्यामहे सन्निधिसामर्थ्यात्। तं चतुर्थ्यापररात्रमुत्थाप्य इत्यादिकर्मकालं कमप्यपेक्षते, अपेक्षितं च कालं प्रकरणं समर्पयति।

तस्माद्यथा "समिधो यजति" "तनूनपातं यजति" इत्यादीनि प्रयाजादीनि कर्माणि दर्शपूर्णमासप्रकरणे पठितानि तयोरङ्भावं प्रतिपद्यन्ते। एवं समावेशनकर्माणि शेषहोमप्रकरणे पठितं सदस्याङ्गभावं प्रतिपद्य चतुर्थदिनापररात्र एवात्मानं लभते। ननु समावेशने समावेशनकाले इत्येव तस्यार्थः, तथा व्याख्याततत्वात् सुदर्शनाचार्येण, न पुनः समावेशनकर्मणीति। नैष दोषः; कालार्थपरिग्रहेऽपि सोऽयं कालः कदेति शंकायां प्रकरणबलेन चतुर्थदिनस्यैवाक्षिप्यमाणत्वात्। तर्हि ऋतुसमावेशनं नास्तीत्याग्च्छेत्। न, तत्रापि विधेः कल्पनीयत्वात्। तर्हि कर्मभेदः स्यात्, तच्चायुक्तमभ्युपगन्तुं शब्दैक्येनैककर्मत्वाध्यसायादित्यवोचाम। न, शब्दैक्याभावेन प्रत्यभिज्ञाभावात्।

अत्र हि समावेशने इति पठ्यते, तत्र तु ऋतुसमावेशने इति। कथमनयोरैक्यं स्यात्। तस्मात् कर्मभेदोऽभ्युपगन्तव्यः। अत एव सुदर्शनाचार्यः एतच्चरागप्राप्तसमावेशनाश्रितं विवाहकर्मार्थं क्रमजपयोर्विधानम्, यथा भोजनपर्याय-व्रताश्रितं पय आदि विधानम् इति ब्रुवन् सर्वनाम्नैतच्छब्देन रागप्राप्तमित्यनेन चेदं समावेशनमृतुसमावेशनादन्यद् रागतः प्राप्तत्वाच्च न विधानमर्हति चेति स्पष्टं न्यरूपयत्। ऋतुसमावेशनं तु नित्यमेव 'ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां पतते नात्र संशयः' इति पत्नीगमनस्य नियमेन विधानात्।

यथा भोजनपर्याय-व्रताश्रितं पय आदि विधानमिति दृष्टान्तोऽपि अस्मत्पक्षमनुकूलयति तथा हि–दीक्षितस्य पयोविधानं भोजनपर्यायव्रताश्रितम्, भोजनं च रागप्राप्तम्। यदि रागो न स्यात् लुप्यत एव भोजनं तत्पर्यायं व्रतञ्च। तत्र पय आदेः प्रसक्तिरेव नास्ति। ततश्चात्र समावेशननियतमिति फलति। अनियतत्वाच्चेदं भिन्नमेव भवितुमर्हति, ऋतुसमावेशनस्य नियमेन विधानात्। अत एवोपरिष्टाच्च अस्मिन्नेव क्रमे यदि दैवादृतुगमनमपि कर्तव्यं स्यात् तदा पूर्वमारोहोरुमित्यादि जपः ततो विष्णुर्योनिमित्यादि जपः इत्यब्रवीत्।

यद्यत्र समावेशमृतुसमावेशमेव स्यात् तर्हि सुदर्शनवाक्ये मुख्यस्वारस्यमनादृतमेव स्यात्। अपि चतुर्थसमावेशनमेवात्र यथाश्रयतया विवक्ष्येत तर्हि रजसः प्रादुर्भावादिति सूत्रारम्भो व्यर्थः स्यात्। तस्मादवश्यमत्र समावेशनद्वयमङ्गीकर्तव्यम्। ननु यदि चतुर्थदिने समावेशनमभ्युपगम्येत तस्य प्रयोजनं वक्तव्यम्। किमिदं दृष्टार्थं वोतादृष्टार्थमिति। यदि दृष्टार्थं तर्हि रजसः प्रादुर्भावात् इत्यत्र विधीयमानमनर्थकं स्यात्। अथादृष्टार्थं तदपि न प्रमाणाभावात् गौरवाच्च। नैष दोषः।

अगतिका हीयं गतिः यदत्रादृष्टार्थं चतुर्थदिने समावेशनमभ्युपगच्छामः इति। अन्यथा पृथक्सूत्रारम्भो व्यर्थः स्यात् इत्यवोचाम। तस्माद् रागप्राप्त-

मिदं समावेशनं अनियतमपि अभ्युपगन्तव्यमेव। तस्मात् विधीयत एव चतुर्थदिनापररात्रे समावेशनमापस्तम्बेन भगवतेति।

एवं प्राप्ते ब्रूमः—नैतदेवमिति। कस्मात्, प्रमाणाभावात्, तथा हि 'तिस्रो जपित्वाशेषं समावेशने जपेत्' इति सूत्रं भवति। तत्र समावेशने समावेशनकाले जपेत् इति हि टीकाकारैः व्याख्यायते। अयं कालः कदेति नानेन वचनेन ज्ञायत इत्यत एवोत्तरत्र वक्ष्यमाणं ऋतुपदसमभिव्याहारमादाय ऋतुसमावेशनकालमभिप्रैति सुदर्शन इति स्पष्टं प्रेक्षावताम्। तादृशं समावेशनमनु जपमात्रमेवात्र विधीयत इति च। कथमत्रानुवादो युज्येत। शब्दभेदात् कर्मभेदाध्यवसायादित्यवोचाम। बाढमवोचः। वाचारंभणमेवैतदित्युत्पश्यामः। शब्दैक्येन प्रत्यभिज्ञानसंभवात्। ननु कथं समावेशनऋतुसमावेशनशब्दितयोः कर्मणोरेकत्वं स्यात्। नैतत्सङ्गतम्। विभक्तिभेदाभेदौ हि शब्दभेदाभेदप्रतिपादकौ हेतू न पुनर्विशेषणसमभिव्याहारतदभावौ। अत एव सर्वत्र प्रसिद्धोपदेशात् (ब्र० १. २. १) इत्यधिकरणे शारीरस्यात्मनोऽयं शब्दोऽभिधायकः सप्तम्यन्तोऽन्तरात्मन्निति तस्माद्विशिष्टो यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोऽभिधायक इत्यब्रुवन् श्रीमन्तो भगवत्पूज्यपादाः शब्दविशेषात् इत्यत्र।

एवमिहापि समावेशने इति सप्तम्यन्तः पठ्यते। उत्तरत्र ऋतुसमावेशने इति स एव सप्तम्यन्तो विशेषणविशिष्टः पठ्यते। तस्मात् सर्वप्रकारेण शब्दैक्यमपह्नोतुमशक्यम्। अतः उत्तरत्र वक्ष्यमाणमेवर्तुसमावेशनमत्र प्रत्यभिज्ञायत इति अनयोरैक्यमकामेनाप्यभ्युपगन्तव्यम्। तस्मादृतुसमावेशनमेवानूद्य जपमात्रमत्र विधीयत इत्युत्पश्यामः। यदुक्तं पृथक् सूत्रारम्भो व्यर्थ इति, अत्र ब्रूमः। आम्नातस्यार्थं प्रतिपत्तुं प्रभवामो नाम्नातं पर्यनुयोक्तुम्। शेषं समावेशने जपेत् इति वाक्यस्वारस्येनर्तुसमावेशनमेकमेव विधीयत इत्यवच्छामः, न पुनरपूर्वत्रापि समावेशनं किमपीति। नन्वनुमास्यामहे संनिधिसामर्थ्यादित्यवोचाम। बाढमवोचः, न युक्तमुपेतमवोचः। वेधाद्यर्थभेदात् (ब्र० ३. ३. २५) इत्यधिकरणन्यायविरोधात्।

तत्र हि शारीरिकमीमांसायां हृदयं प्रविध्य इत्यादिमन्त्राणां प्रवर्ग्यादिकर्मणां च रहस्यपठितानामपि न सन्निधिबलेन विद्याशेषत्वं सम्भवति, श्रुतिलिङ्गादिभिः प्रबलप्रमाणैरन्यत्र विनियुक्तत्वात् इति प्रपञ्चितम्। एवमिहापि शेषं समावेशने जपेत् इति समावेशनकर्मणि विनियुक्तस्य जपस्य कालः समावशनकाल एव भवितुमर्हति। न च कथं समावेशने इति शब्दः सप्तम्यन्तः सकृदुत्पन्नः समावेशनकर्म ज्ञापयित्वा पुनः समावेशनकालमपि ज्ञापयितुमर्हतीति प्रत्यवस्थातव्यम्। दर्शपूर्णमासयोः तत्प्रख्यन्यायेन कर्मनामत्वेऽपि पुनः शब्दशक्त्या दर्शपूर्णमासयोः कालावपि लभ्येते इति शास्त्रेष्वङ्गीकृतत्वात्।

अत एव 'वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम्' इत्यत्र तत्प्रख्यन्न्यायेन कर्मनामत्वं शब्दशक्त्या कालश्च प्रतिपाद्यते इति प्रपञ्चितं स्मृतिकौस्तुभे ।

एवमिहापि भवितुमर्हति । तस्मात् शेषं समावेशने जपेत् इति वाक्येन सकृदुत्पन्नेन समावेशनसम्बन्धिनि काले विनियुक्तस्य कर्मणः (जपस्य वा) पुनः कथं दुर्बलेन सन्निधिना शेषहोमस्याङ्गभावः प्रतिपद्येत । तस्मात् प्रकरणपाठावष्टंभेन प्रयाजादिवन्नास्याङ्गभावः सम्भवतीति भिन्नमेवेदं कर्म स्वकीये कालान्तरे भवितुमर्हति । अथापि भवतः श्रद्धामनुरुध्याङ्गभावं प्रतिपद्येमहि एवमपि वाजपेयेनेष्ट्वा बृहस्पतिसवने यजेत इति वाक्येन विहितस्याङ्गस्य बृहस्पतिसवनस्येव वसन्ते कालान्तर एवानुष्ठानं समावेशनस्य न्याय्यं मन्यामहे । परमार्थतस्तु बृहस्पतिसवनस्येवाङ्गभावं विदधद्वाक्यं नोपलभामहे इति न युष्माकमभीष्टस्य स्यात् स्वप्नेप्यवकाशः ।

ननु तर्हि मिथः समीक्षणादीनां भिन्नकर्मणामपि विभिन्नाः कालाः स्युः । न तेषां कर्मणां कालः वदेति शंकायां सन्निहितेन प्रकरणेन कालस्याक्षेपेण शंकानिवारणस्य संभवात् । इह तु वाक्येनैव बलीयसा स्वकालः समर्प्यत इति न प्रकरणस्यावकाशो दुर्बलस्य । तस्मात् दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत् इत्यत्रैव तिस्रो जपित्वा शेषं समावेशने जपेत् इत्यत्रापि कालार्थोऽयं संयोग इति मन्तव्यः। तस्मान्न सर्वात्मना चतुर्थदिनापररात्रे समावेशनं विधीयत इति सिद्धम् ।

अपि चादृष्टार्थं यद्यत्र समावेशमभ्युपगम्येत अन्याय्यमेवैतत् स्यात् । दृष्टे संभवत्यदृष्टकल्पनायाः अन्याय्यत्वात् । अपि चादृष्टार्थादस्मात् समावेशनात् कथमृतुमतीत्वमपि वध्वाः प्रतिज्ञायेत । ननु समावेशनं वध्वा सह मैथुनार्थशयनम् इति सुदर्शनाचार्यव्याख्यानात् परिभाषेति जानीमः। नेति ब्रूमः केचित् असत्यपि रागे इत्यादिपक्षान्तरोपदेशानर्थक्यात् । गौणतयापि वृद्धैरभ्युपगते बालिकोद्वाहपक्षे परिभाषायाः असङ्गतत्वात् ।

अथ तदविरोधाय समावेशनमेकत्र मेलनं शयनं वेत्यर्थम् अङ्गीकरोषि नात्र चतुर्थी समावेशनमृतुमतीत्वं वध्वाः नियमेन उपस्थापयति । न च बालिकोद्वाहमपेक्ष्यैकत्र मेलनं शयनं वेत्यर्थः, ऋतुमतीविवाहमपेक्ष्य पारिभाषिकोऽर्थः संगच्छतामिति वाच्यम्, विधिवैषम्यप्रसङ्गेन-द्वयोः प्रणयन्तु (जै० ३.७.२३) न्यायविरोधात् । न चैवमस्माकं समावेशने इति सप्तम्यन्तस्य युगपत्प्रतीयमानमर्थद्वयमङ्गीकुर्वतां विधिवैषम्यः संभवति, प्रतीयमानार्थस्य परित्यागयोगादिति सुधियो विभावयन्तु ।

तस्मात् समावेशनबलादेवर्तुमतीत्वप्रतिज्ञामृषैवेति सिद्धम् । न्यायतस्तु ऋतुसमावेशनमेवोपरिवक्ष्यमाणमात्रानूदितमिति प्रपञ्चितमधस्तात् । तस्मात् सिद्धम् न चतुर्थदिने समावेशनं विदधात्यापस्तम्बो भगवानिति ।

यदुक्तं रागप्राप्तत्वाच्चतुर्थीसमावेशनमनियतम्, ऋतुसमावेशनं पुनर्नियमेन विधीयत इत्यनयोर्भेद एवाङ्गीकर्तव्य इति, अत्रैवं भवान् प्रष्टव्यः। किं पुनर्ऋतुसमावेशनं रागतः प्राप्नोति आहोस्विन्नेति। यदि न स्याद्रागस्तत्र तर्हि असत्यपि रागे कथं पुनर्व्यवायः अङ्गीक्रियते। व्यवायोऽपि क्रियते रागोऽपि न भवतीति विप्रतिषिद्धं स्यात्। नियमविधिरपि विज्ञानेश्वराचार्यैरुपपादितः रागमवलम्ब्यैवात्मानं लभते। यथा–गार्हस्थ्यधर्मा रागतः प्राप्तं विवाहमवलम्ब्यैव प्रवर्तन्ते, एवं ऋतुकालाभिगामी स्यात् इत्यादि नियमविधिः स्त्रीपुंसो रागमवलम्ब्यैव प्रवर्तते।

अत्राक्षेपः–कथं पुनर्विवाहो रागप्राप्तः स्यात्, यत्कारणं आश्रयान्तरवत् गार्हस्थ्यमपि नित्यसिद्धमेवेति वैकल्पिकनित्यो विवाहो व्रीहियववत् इति प्रपञ्चितमभियुक्तैर्विमर्शे। नेति क्रमः। यदि व्रीहियववत् इत्यत्र व्यवस्थितविकल्पोऽभ्युपगम्येत, तर्हि ब्रह्मचर्यप्राप्तेन गार्हस्थ्ये न प्रवेष्टव्यम्, गार्हस्थ्याच्च पारिव्राज्यं नाङ्गीकर्तव्यमिति स्यात्, व्यवस्थितत्वात् विकल्पस्य। अथैच्छिकोऽयं विकल्प इति ब्रूषे तर्हि आगतोऽसि मार्गेण। रागप्राप्तो विवाह इत्युक्ते का पुनस्ते क्षतिः। अत एव शक्त्या न यज्ञकृन्मोक्षे मनः कुर्यात् नान्यथा (याज्ञ० ३ ५७) इति परिव्राज्य प्रकरणे रागप्रयुक्तत्वाच्च विवाहस्य इत्युक्तमाचार्येण विज्ञानेश्वरेण।

आस्तां तावदिदम्। अनुसरामः प्रकृतम्। तस्मादृतुसमावेशनमपि रागप्राप्तमेवेति कथमस्य चतुर्थीसमावेशनात् भेदमुपपादयसि। ननु नियमानियमाभ्यां भेदं पश्यामः। ऋतुसमावेशनं हि नियम्यते न पुरन्यत इति। नेति ब्रूमः। कथं पुनश्चतुर्थीसमावेशमनियतमेवेत्यवेदीः। रागप्राप्तत्वादिति चेत् तर्हि ऋतुसमावेशनमपि रागप्राप्तमिति तत्राप्यनियमोऽभ्युपगम्यताम्। अथ तत्र विधिरस्ति, नात्रैवं वचनमिति ब्रूषे तर्हि समावेशनमेव चतुर्थदिने नास्तीति कथमत्र नियमानियमयोः अन्यतरः संभवेत्। १राक्रान्तं चैतत् प्रथममेव। तस्मादृतुसमावेशनमेवात्रानूद्यते इति न्याय्यं पश्यामः। व्याख्यानमप्यस्मत्पक्षमेवोपोद्बलयति इति प्रपञ्चितं वयोनिर्णये।

अथापि भवतः श्रद्धामनुरुध्य चतुर्थीसमावेशनमभ्युपगच्छामः, एवमपि न सर्वात्मना दोषाद्विनिर्मोक्षः। रागप्राप्तं चतुर्थीसमावेशनमित्यभ्युपगच्छद्भिः कथं चतुर्थदिनापररात्र एव रागः संभवेदिति युक्तं वक्तुम्, पञ्चम–षष्ठ-सप्तमादिषु यदा कदा वापि रागः स्यात् तर्हि तत्रैव विवाहकर्मार्थं भवेदभीष्टं समावेशनाभासं कृत्वा तत्रैव जपो विनियुज्येत। तस्मात् यत्किञ्चित् पदश्रवणमात्रेण यत्किञ्चित् कल्पनमसत्प्रलाप एवेत्युपेक्षणीयः। यदप्युक्तं अस्मिन्नेव क्रमे यदि दैवादृतुगमनमपि इत्यत्रापेः स्वारस्यमनादृतमेव स्यादिति, तत्र मौनमेव सुतरां प्रतिवचनं भवितुमर्हति तथापि ब्रूमः।

'तिस्रो जपित्वा' इत्यादिना निर्दिष्टे क्रमे यदि अतर्कितोपनतेन दैवेनर्तु-गमनमपि कर्तव्यं स्यात् इत्यर्थः। एतदुक्तं भवति। प्रजायते तन्वं मे इत्यन्तं हि चतुर्थदिनापररात्रकर्म। शेषं समावेशने भवति, यदि कदाचित् कुतोऽपि कारणाद् ऋतुगमनमपि अप्राप्त प्राप्नोति तदा पूर्वम् आरोहोरुमित्यादि जपः। ततो विष्णुर्योनिम् इत्याद्यभिमंत्रणमिति प्रतिपादयतीति नास्माभिरपेः स्वारस्य-मनाद्रियते। अपि च चतुर्थीसमावेशनमपूर्वार्थमङ्गीकृत्य तत्र समावेशनस्य परि-भाषया मैथुनार्थं शयनमित्यभ्युपगच्छतां दैवादृतुगमनमपि इत्यादिना प्राप्ते ऋतुसमावेशने पूर्वं आरोहोरुम् इत्यादिविवाहकर्मार्थं पत्नीगमम् अनन्तरमृतु-गमनमपि एकस्मिन्नेव दिने द्विपत्नीगमनं प्राप्तोति, तच्चायुक्तं 'सुस्थ इन्दौ सकृत् पुत्रं' (याज्ञ० १, ८०) इति योगीश्वरेण द्विर्गमनस्य प्रतिषिद्धत्वात्।

न च जपमात्रं आरोहोरुम् इत्यादेः भवता अभ्युयगम्यते मैथुनार्थं शय-नम् इति वदता। न च दध्नेन्द्रियकामस्य जुहुयात् इत्यत्रेव इहापि एकमेव पत्नीगमनं कर्मद्वयमनुगृह्णातीति वाच्यम्। तत्र ह्येकस्मिन्नेवाग्निहोत्रकर्मणि दहनो गुणविधिरभ्युपगम्यते। इह तु चतुर्थीसमावेशनाद् भिन्नमेवर्तुसमा-वेशनमिति कर्मभेदोऽभ्युपगम्यते भवता।

तस्मात् कुण्डदायिनामयनाग्निहोत्रन्यायेनैकस्मिन् अहनि द्विपत्नीगमनं प्राप्नोत्येव। किमतो यद्येवम्। एतदतो भवति दृष्टे संभवत्यदृष्टकल्पनमन्या-य्यमेव स्यादिति। अपि च पारिभाषिकमेव समावेशनमिति वदतां ऋतुसमा-वेशने इति ऋतुलिङ्गात् इति लिङ्गादर्थविवरणं सुदर्शनाचार्यस्य अनर्थकमेव स्यात्, तस्मात् न सर्वात्मना चतुर्थीसमावेशनं सूत्रकारेण विहितमित्यसमञ्ज-समेव परेषां प्रत्यवस्थानमिति सिद्धम्।

स्यादेतत्–आचार्येण हरदत्तेनानाकुलाख्यव्याख्यायां समावेशनन्त्व-स्मिन्नेवापररात्रे नियमेन भवति इति चतुर्थीसमावेशनस्य नियमोऽभिहितः। न च कथमनेनर्तुमतीविवाहः सिद्ध्यतीति वाच्यम्। इदमेव समावेशनं मन्त्र-वत् नान्यत् इति वाक्याशेषश्रवणात्। नूनमस्य समये युवतय एव विवाह्यमाना आसन्निति अनाकुलाख्या गृह्यव्याख्या जापयति। अन्येनापि आचार्येण यदि चतुर्थीसमावेशनमृतुसमावेशनं च युगपत्प्राप्नुत इति वदता स्पष्टमेवानयोर्भेदो-ऽभिहितः। मन्त्रोप्यारोहोरुमित्यादिकः अमुमेव पथमनुगृह्णाति। तस्माच्छा-स्त्रीय एवर्तुमती विवाह इति।

एवं प्राप्ते ब्रूमः, नैतदेवमिति, न हि समावेशनपदं भवदभीष्टे व्यवायकर्मणि प्रयुनक्ति आचार्यो हरदत्त इत्यत्र कारणमुपलभामहे। ननु वाक्य-शेषमत्र कारणमित्यवोचाम। न, अस्मिन्नेव समावेशने आरोहोरुमिति मन्त्रजपः नान्यत्र इत्येव तस्यार्थो भवितुमर्हति प्रकृतत्वात्। एतेनान्योप्याचार्यो

व्याख्यातो वेदितव्यः। यदुक्तं मन्त्रोप्यनुगृह्णातीति तत् परिहृतं पूर्वमेव 'क्षीरिणाम्' इत्यत्र। अस्माकं पुनः पक्षे तु मन्त्राणां सुतरां प्रयोगसमवेतार्थस्याकत्वं संभवति।

ऋतुसमावेशनस्यैकस्यैव रागतः प्राप्तस्य सूत्रकारेणानूदितत्वात्। तस्मात् चतुर्थीसमावेशनमभ्युपगच्छन्नपि हरदत्ताचार्यः न भवदभीष्टं व्यवायमङ्गीकरोतीत्यत्र कारणं पश्यामः। अपि च शेषं समावेशने जपेत् इत्यनन्तरं यदा मलवद् वासा स्यात् इति राजस्वलाधर्मानुपदिश्यानन्तरं ऋतुसमावेशनं ब्रवीति। यदि रजस्वलैव विवाह्या स्यात् कथं तद्धर्मोपदेशो विवाहानन्तरं स्यात्। तस्मादप्यसंगतं परेषां प्रत्यवस्थानम्।

अथापि स्यात्। कथं रजस्वलाधर्मोपदेशेनर्तुमतीविवाहः प्रतिषिध्येत। आपस्तम्बेन भगवतोपदिश्यमानो रजस्वलाधर्मः प्राथमिक एव रजोदर्शने इत्यत्र किं मानम्। प्रत्युत प्रथमर्तौ व्रताभाव एवोपदिश्यते शास्त्रेषु। तथा च निर्णयसिन्धौ स्मृतिचन्द्रिकायाम्—

'प्रथमर्तौ तु पुष्पिण्याः पतिपुत्रवतीस्त्रियः।
अक्षतैरासनं कृत्वा तस्मिंस्तामुपवेशयेत्॥'

इत्यादिभिर्व्रताभाव एवोपदिश्यते। उपरिष्टाच्च द्वितीयाद्यृतुषु तन्नियममाह मदनपारिजाते दक्षः अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम् इत्यादि निषेधं पठति। आचारेऽपि प्रथमर्तौ व्रताभावमेवोपलभामहे। सूत्रे पुनरुपदिश्यते व्रतम्। तस्मात् विवाहात् प्राचीनेष्वृतुषु व्रतानुष्ठानं नास्त्येवेति अभ्युपगच्छामः। अपि च 'तिस्रो रात्रीर्व्रतं चरेदञ्जलिनावापिवेहखर्वेण पात्रेण प्रजायै गोपीथाय' (तै० सं० २, ५, १) इत्युत्पश्यमानप्रजावैगुण्याभावात् श्रूयते व्रतम्।

तच्च कथं विवाहात् प्राक् प्रजोत्पादनानधिकृतताया संभवेत्। अथापि भवतः श्रद्धामनुरुद्ध्य अभ्युपगच्छामो व्रतं एवमपि प्राग्विवाहात् मात्रादिभिरुपदिश्यतां, ऊर्ध्वं तु विवाहात् पतिना संस्कारार्थं नियार्थं च पुनरुपदेशो भवतु व्रतस्य। तस्मात् न व्रतोपदेशावष्टम्भेनर्तुमतीविवाहप्रतिषेधः सिद्ध्यतीति। एवं प्राप्ते ब्रूमः-नैतदेवमिति। कस्मात्, प्रमाणाभावात्।

तथा हि भगवान् आपस्तम्बः विवाहानन्तरं रजस्वलाधर्मानुपदिश्यानन्तरमृतुसमावेशनं विदधाति। अतः प्रतिषिध्यत इति गम्यते। न च विवाहात् पूर्वं रजस्वलाधर्माभाव एवेत्यत्र किमपि प्रमाणं पश्यामस्त्वद्वचनादृते। ननु प्रथमर्तौ व्रतं नास्त्येवेति निर्णयसिन्धौ प्रतिपादितमित्यवोचाम। एतदपि नाभीष्टं पुष्णीयात् प्रागपि विवाहाद् द्वितीयादिष्वृतुषु व्रतस्य अनुष्ठेयत्वात्।

अथ प्राग्विवाहात् सर्वेष्वपि ऋतुषु व्रताभावमभ्युपगच्छसि तदपि न संगच्छते प्रमाणाभावात्। प्रथमतौं हि व्रताभावो भवद्रीत्या न पुनरन्येष्वृतुषु। वस्तुतस्तु न भवतामर्थः संभवति निर्णयसिन्धुपरिशीलने प्रेक्षावताम्। अतिमन्दं हीदं प्रत्यवस्थानम्। यदुक्तं सत्यपि प्राग्विवाहात् व्रतानुष्ठाने मात्रादिभिरुपदिश्यतामिति तदपि न, प्रमाणाभावात्। नन्वस्त्याचारः, न। विवाहादूर्ध्वं हि मात्रादिभिरुपदिश्यमानं सूत्रविरुद्धमाचारम् उपलभामहे। न पुनः प्रागपि विवाहात् उपदिश्यमानम्। तस्मात् स्मृत्याचारविरुद्धमिदं मनोरथमात्रमेव केवलं स्यात् भवताम्। यदप्युक्तं प्रजावैगुण्याभावफलोद्देशेन विधीयमानत्वात् व्रतस्य प्राग्विवाहात् प्रजोत्पादनानधिकृतायाः व्रताभाव एव न्याय्य इति, अत्र ब्रूमः।

नात्र फलोद्देशेन व्रतं विधीयते, कामादिशब्दाघटितत्वात्। किन्तु औदुम्बराधिकरणन्यायेनार्थवादो भवितुमर्हति। अन्यथा प्रजाकामनारहितया विधवया च व्रतं नानुष्ठेयं स्यात्। तच्च व्यासादिस्मृत्याचारविरुद्धमास्तिकैरनाद्रियते। तस्मादर्थवादो भवितुमर्हति। अर्थवादत्वाच्च रजस्वलाभिरनुष्ठेयमेव। ततः प्राग्विवाहादपि रजस्वलया तद्धर्मानुष्ठानं न्याय्यमेव भवितुमर्हति। ननु प्रजोत्पादनानधिकृतया नानुष्ठेयमित्यवोचाम। न, अनधिकृतयापि विवाहानन्तरमुत्पत्स्यमानप्रजावैगुण्याभावफलोद्देशेनानुष्ठानस्य कर्तव्यत्वात्। यथा प्रागपि विवाहात् सत्पतिलाभार्थं अश्वत्थसेचनमीश्वराराधनं च क्रियत इत्याचारः क्वचित् एवमिहापि भवतु। अपि च प्रागपि विवाहात् व्रतानुष्ठानं मास्तु इति प्रत्यवस्थानमेव तावदसंगतम्। रजोनिमित्तत्वात् व्रतानुष्ठानस्य।

न पुनर्विवाहं निमित्तीकृत्य रजस्वलाधर्माः प्रवर्तन्ते। तस्मादप्यसंगतमिदं प्रत्यवस्थानम्। तस्मात् सत्यपि चतुर्थीसमावेशने केषांचिदाचार्याणां मतेन ऋतुमतोविवाहः शास्त्रतः प्राप्नोतीति सिद्धम्। परमार्थतस्तु चतुर्थीसमावेशनमेव नास्तीति प्रपञ्चितमधस्तात्।

एवं त्रिरात्रब्रह्मचर्यविधाने न किमपि वक्तव्यमस्ति, पराक्रान्तत्वात् सूरिभिर्वयोनिर्णयप्रसंगे। अथापि किञ्चिदुच्यते, आश्वलायनगृह्यव्याख्याने गार्ग्यनारायणः 'वैदेहेषु सद्य एव व्यवायो दृष्टः, गृह्ये तु ब्रह्मचारिणो त्रिरात्रमिति ब्रह्मचर्यं विहितम्" इत्यब्रवीत्, अतोऽवगच्छाम व्याख्यातुः काले सद्यो व्यवाय आसीदिति ऋतमतीविवाहः शास्त्रीय इति पूर्वपक्षी प्रत्यवतिष्ठते।

अत्राभिधीयते, सूत्रविरुद्धमाचारं हि व्याख्याता प्रतिपादयति। सोऽयमाचारः कथं शास्त्रसम्मतः स्याद् गृह्यविरोधात्। एवं स्वरसतः प्रतीयमानमर्थं परित्यज्य किमप्यर्थान्तरं कल्पयतां महत्साहसम्। एवमेव हि समावेशनबलादेवर्तुमतीत्वमनुभिमानो अनाकुलाख्यव्याख्यां व्याकुलीकुर्वन्ति। तस्मात् सिद्धम् यद् ऋतुमतीविवाहो गृह्येषु नानुज्ञायत इति।

—वेदविभागाध्यक्षः

महाराज-आचार्यसंस्कृतमहाविद्यालयः, जयपुरम

पैजवनचरितम्

(पौराणिकीं राजवंशसूचीमृग्वेदसूक्तानि चाश्रित्य रचितं लघुकाव्यम्)

—डॉ० पुरुषोत्तमलालभार्गवः शास्त्री

दौष्यन्तिर्भरतो नाम पूरुवंशधुरन्धरः ।
आसीन्महीक्षितां श्रेष्ठो नक्षत्रेष्विव चन्द्रमाः ॥१॥

तदन्वये कीर्तिमति प्रसूतः कीर्तिमत्तरः ।
सुहोत्र इति राजर्षिर्भानुः पूर्वाम्बुधाविव ॥२॥

सुहोत्रस्य सुधीः पौत्रो ह्यजमीढः प्रतापवान् ।
मंत्रद्रष्टा समाहर्ता यज्ञानां पार्थिवाग्रणीः ॥३॥

अजमीढस्य वंशे ये जाताः क्षत्रपुरोगमाः ।
कालक्रमेण तेष्वेव तृत्सुर्जज्ञे महायशाः ॥४॥

तृत्सुवंशकरो ह्यासीत्तेन राज्यं जितं नवम् ।
तृत्सवस्तस्य दायादाः समजायन्त विश्रुताः ॥५॥

तृत्सोस्तु तनयः श्रीमान् भृम्यश्वः समजायत ।
मुद्गलो नाम रर्जार्षिर्भृम्यश्वस्य सुतोऽभवत् ॥६॥

स्वपत्न्या इन्द्रसेनायाः सारथ्ये शक्तिशालिना ।
मुद्गलेन रिपूञ्जित्वा गोसहस्त्रं समाहृतम् ॥७॥

मुद्गलस्येन्द्रसेनायां वध्य्रश्वः समजायत ।
वध्य्रश्वः प्राप्तवान् पुत्रं दिवोदासं गुणान्वितम् ॥८॥

निवसन्तं महीध्रेषु बलिष्ठं दस्युनायकम् ।
निहत्य शम्बरं लेभे दिवोदासो यशोऽमलम् ॥९॥

दिवोदासस्य पुत्रोऽभूद्राजा पिजवनो बुधः ।
सूनुः पिजवनस्यासीत् सुदाः पैजवनोमहान् ॥१०॥

विवस्वानिव तेजस्वी दृढश्च हिमवानिव ।
केसरीव च विक्रान्तः सुदा राजशिरोमणिः ॥११॥

विश्वामित्रं पुरोधाय सुदासा वीर्यशालिना ।
आहवेषु जिता नैका दर्पाध्माता महीभुजः ॥१२॥

विश्वामित्रे दिवं याते द्विषां हन्ता नृपाग्रणीः ।
वसिष्ठं वरयामास सन्मंत्राय पुरोहितम् ॥१३॥

सुदासस्तेजसो भीता दश भूपाः समत्सराः ।
परुष्ण्याः[1] सरितस्तीरे समवेता युयुत्सवः ॥१४॥

यादवस्तुर्वशो द्रुह्यू रानवः पौरवस्तथा ।
ऐक्ष्वाकुश्चेतरे भूपाः संघं कृत्वा समागताः ॥१५॥

तृत्सूनां नायको राजा सुदा नैवाकुलोऽभवत् ।
परुष्णीं प्रतिवेगेन प्रतस्थे सेनया सह ॥१६॥

पुरोडास्तुर्वशो राजा प्रभूतैः सैनिकैर्वृतः ।
नेतुकामो जगामाग्रे सुदासा विफलीकृतः ॥१७॥

ततस्तु द्रुह्यवो वीराः पुरोधाय भृगून् रणे ।
मत्स्या जाल इवाबद्धाः सुदासं प्रति प्रस्थिताः ॥१८॥

सेनापतिस्तु द्रुह्यूणां चायमानः कविस्तदा ।
परुष्ण्याः कूलसंभेदं कुर्वन् व्यापादितो रणे ॥१९॥

आनवः कवषो राजा द्रुह्यूवंश्यो नृपस्तथा ।
सुदासं प्रतिधावन्तौ परुष्ण्यां संनिमज्जितौ ॥२०॥

षष्टिःशतानि योद्धारः षट्सहस्राणि चाहवे ।
हता एकैकशो राज्ञा सुदासा वीरकर्मणा ॥२१॥

अन्ये विपक्षिणः सद्यो रणभूमेः प्रदुद्रुवुः ।
भास्करस्योदये प्राच्यां लीयते तिमिरं यथा ॥२२॥

इन्द्रस्य पश्यतैश्वर्यं सामर्थ्यं विभवं तथा ।
एकाकिना सुदासा यत्संख्ये दश नृपा जिताः ॥२३॥

सूच्या यूपस्य संभेदो मेष्या सिंहवधो यथा ।
तथैवैकाकिनो राज्ञो दाशराज्ञे महाञ्जयः ॥२४॥

ऋषिर्वसिष्ठः खलु वैदिके युगे जुगुम्फ यां सारवतीं मनोरमाम् ।
तामेव भूयः पुरुषोत्तमोऽलिखद् भृगूद्वहो विस्मयकारिणीं कथाम् ॥२५॥

—राजस्थान-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः,
मैकमास्टर-विश्वविद्यालये कनाडादेशीये धर्मविभागचार्यचरश्च,
एस. बी. ९५, बापूनगरं जयपुरम्

---

१. पाकिस्ताने प्रवहन्ती नदीयं साम्प्रतं रावीनाम्ना प्रसिद्धा ।

अकादमी-समाचाराः

पं.गिरिधरशर्मा-नवरत्न-जन्मशताब्दी-समारोहः

जयपुरनगरे सूचनाकेन्द्रस्य सभाकक्षे ५-६-१९८५ दिनाङ्के पं.गिरिधरशर्मा-नवरत्न-जन्मशताब्दी-समारोहः समायोजितः। समारोहेऽस्मिन् तत्कालिकाः केन्द्रीयरक्षामंत्रिणः (वर्तमान-मानवसंसाधनमन्त्रिणः) श्रीनरसिंहरावमहोदयाः मुख्यातिथित्वेन व्यराजन्त। सर्वप्रथमं डॉ० मण्डनमिश्रमहोदयैः समागतानां विदुषां स्वागतं विहितम्, संस्कृत-अकादमीद्वारा यानि कार्याणि अद्यावधि सम्पादितानि तेषां संक्षिप्तपरिचयोऽपि प्रदत्तः। स्वभाषणे श्रीनरसिंहरावमहोदयैः संस्कृत-भाषायाः सरलीकरणस्यावश्यकतां प्रतिपाद्यास्याः प्रचार-प्रसाराय स्वसम्मतिः प्रकटिता।

अस्मिन्नवसरे पूर्वशिलातैलराज्यमन्त्रिणः श्रीनवलकिशोरशर्माणः अध्यक्षरूपेण, राजस्थानस्य मुख्यमन्त्रिणः श्रीहरिदेवजोशिमहोदयाः विशिष्टातिथिरूपेण विराजिता आसन्। समारोहेऽस्मिन् 'स्वर-मङ्गला'-पत्रिकायाः पं.गिरिधरशर्मानवरत्न-विशेषाङ्कस्य माघपुरस्कारेण च सम्मानितानां पं.गिरिधरशस्त्रिणां 'अभिनवकाव्यप्रकाशः' इति प्रकाशितपुस्तकस्य विमोचनं श्रीजोशिमहोदयानां करकमलैः सुसम्पन्नम्।

महासमितेरधिवेशनम्

सितम्बरमासे एकोनविंशदिनाङ्के श्रीवीरेश्वरभवने नवसंघटित-अकादम्याः प्रथममधिवेशनं डॉ० मण्डनमिश्रमहोदयानामध्यक्षतायामभवत्। अधिवेशनेऽस्मिन् नवागतानां सदस्यानां स्वागतं व्याहृत्य आगामिवर्षे समायोज्यमानानां कार्यक्रमाणां विस्तरेण चर्चा विहिता, विविधसमारोहाणामायोजनस्य निर्णयो विहितः, विभिन्नानामुपसमितिनां मनोनयनमपि कृतम्।

अवसरेऽस्मिन् येषां प्रथितविदुषां संस्थासदस्यानाञ्च मनोनयनमभवत् तेषु श्रीकलानाथशास्त्रिणः श्रीप्रवीणचन्द्रजैनमहोदयाः (जयपुरस्थाः), पं.जगदीशशर्माणः (वनस्थलीतः), गोस्वामिहरिरायमहाभागाः (जोधपुरस्थाः), श्रीमती दलजीतकौरमहोदयाः (कोटातः), संस्थाप्रतिनिधित्वेन श्रीरामजीलालशास्त्रिणः, श्रीश्रीरामदवे, श्रीप्यारेमोहनशर्माणः, डॉ० प्रभाकरशास्त्रिणश्च, कोषाध्यक्षपदे च डॉ० निर्मलाभार्गवमहोदयाः कनोडियामहिलामहाविद्यालयस्य उपाचार्याः मनोनीताः।

अधिवेशने स्वरमङ्गलायाः सम्पादकानां लेखकानाञ्च मानदेयस्याभिवृद्धिरपि स्वीकृता ।

वेद-सम्मेलनम्

बांसवाड़ानगरे दि० २२-२३ दिसम्बरमासे द्विदिवसीयं वैदिकसम्मेलनमायोजितम् । अस्याध्यक्षाः पूर्वोपशिक्षापरामर्शदातारो डॉ० सी. आर. स्वामिनाथन्महोदयाः, मुख्यातिथयश्च मुख्यमन्त्रिणः श्रीहरिदेवजोशिमहोदया आसन् । तत्र सर्वप्रथमं डॉ० मण्डनमिश्रमहोदयैः राजस्थान-संस्कृत-अकादम्याः कार्यक्रमाणां परिचयः प्रस्तुतः । अकादमी भारतसर्वकारस्य वेदसंरक्षणयोजनाधीनमष्टवेदविद्यालयानां संचालनं प्रदेशेऽस्मिन् करोति । तेभ्यः समाहूतानां छात्राणां वेदाभ्यासस्य सामूहिकं व्यक्तिशश्च प्रदर्शनं तेषाञ्च परीक्षणं तत्र सम्पादितम् ।

श्रीजोशिमहोदयैः प्रतिपादितं यत् प्राचीनपाण्डुलिपीनां प्रकाशनाय अकादमी प्रयासं कुर्यात्, वेदविज्ञानधुरीणानां स्व० मनुसूदनओझा–पं.मोतीलालशास्त्रिवर्याणां चाप्रकाशितग्रन्थानां प्रकाशनमपि यथाशीघ्रमेव करणीयमस्ति । समारोहस्यास्य संयोजकाः श्रीनटवरलालभट्टमहोदयाः, सहसंयोजकाश्च डॉ० सुभाषतनेजा आसन् । अस्मिन्नवसरे सप्त वैदिकविदुषां सम्मानं मुख्यमन्त्रिमहोदयैः विहितम् । जयपुरीयवैदिकविद्वांसः पं. सूर्यनारायणशर्माणः प.मधुसूदन-ओझा-पुरस्कारेण सम्मानिता अभवन् ।

कार्यसमितेरधिवेशनम्

वैदिकसम्मेलनावसरे अकादमी-कार्यसमितेरपि प्रथमाधिवेशनं तत्रैव सम्पन्नम् ।

कवि-सम्मेलनम्

अजयमेरुनगरे २५-१२-१९८५ दिनाङ्के ब्रह्मानन्दशर्मणामध्यक्षत्वे संस्कृतकविसम्मेलनमभवत् । तस्मिन् सम्मेलने कालिदास-अकादमी-सचिवाः डॉ० श्रीनिवासमहोदयाः, डॉ० हरिराम-आचार्याः, डॉ० जगन्नारायणपाण्डेयमहोदयाः, माघपुरस्कारविजेतारः पं.जगदीशाचार्याः, श्रीश्रीरामदवेमहाभागाः, डॉ० शिवसागरत्रिपाठिनः, तथा चान्ये प्रमुखास्तत्रत्याश्च कवयः समवेता अभवन् । अस्य संयोजकाः पंचोलीश्रीबद्रीप्रसादशर्माण आसन् ।

उनिषदायोजनम्

अलवरस्थे राजकीय-महाविद्यालयस्य प्रांगणे १९८६ ई० फरवरीमासस्य १८–१९ दिनाङ्कद्वयमुपनिषद् एका मत्स्यप्रदेशस्य संस्कृते योगदान-

मिति विषयमाश्रित्य समायोजिता। अस्याः परिषदो मुख्यातिथित्वेन डॉ० दयाकृष्णमहोदयाः, अध्यक्षत्वेन डॉ० मण्डनमिश्रमहोदयाः समासीना आसन्। उपनिषदः संयोजनं कालेजस्य प्राचार्यैः डॉ० सत्येन्द्रचतुर्वेदिभिः, कार्यक्रमस्य च संचालनं श्रीश्यामलालशर्मभिर्विहितम्।

अस्यामुपनिषदि वनस्थलीविद्यापीठस्य संस्कृतविभागाध्यक्षाः श्रीचन्द्रकिशोरगोस्वामिनः प्रमुखवक्तार आसन्। अवसरेऽस्मिन् अलवर-भरतपुर-धौलपुरभागानां संस्कृतसेवायाः सविशेषोल्लेखोऽभवत्।

पौरोहित्य-प्रशिक्षण-कार्यक्रमः

अकादमी भारतसर्वकारस्य सहयोगेन प्रशिक्षणकार्यक्रमाणां संचालनमपि विदधाति। अस्मिन्नेव क्रमे जोधपुरनगरे ५ फरवरी ८६ तः २३ फरवरीपर्यन्तं पौरोहित्य-प्रशिक्षण-शिविरं संयोजितम्। अस्य संचालकाः श्रीश्रीरामदवेमहोदया आसन्। शिविरस्योद्घाटनं जोधपुरविद्यालयस्य संस्कृतविभागाध्यक्षैः डॉ० दयानन्दभार्गवमहोदयैः कृतम्। राजस्थान-संस्कृत-अकादमी-कार्यालयसचिवेन श्रीराधेश्यामव्यासेन कार्यक्रमस्यास्य परिचयः समुपस्थापितः। प्रशिक्षणशिविरेऽस्मिन् त्रिंशत् छात्राः पौरोहित्यकर्मणि प्रशिक्षिता अभवन्।

वेद-विद्यालयस्योद्घाटनम्

रेवासानगरे (सीकरजनपदे) ११–२–१९८६ दिनाङ्के वेदविद्यालयस्योद्घाटनं स्वामिबलरामदासभागैः दीपं प्रज्वाल्य विहितम्। अस्मिन् समारोहेऽध्यक्षत्वेन डॉ० मण्डनमिश्रमहोदयाः समवेता आसन्। तैश्च वेदविद्यालयानां महत्त्वं वैदिकपरम्परापालनार्थञ्च तेषां संचालनमत्यावश्यकं प्रतिपादितम्। रेवासानगरेऽस्य विद्यालयस्य संचालनं श्रीजानकीनाथपीठ–समितया क्रियते।

नवोदित-प्रतिभा-पुरस्कारः


जयपुरे महाराज-संस्कृतकालेजे फरवरीमासस्य सप्तदशदिनाङ्के राज्यस्तरीय-संस्कृत-वादविवाद-श्लोकपाठप्रतियोगिते महाविद्यालयीयछात्राणां कृते समायोजिते। अवसरेऽस्मिन् अध्यक्षा अकादमी-निदेशकाः श्रीललितकिशोरमहोदयाः, उद्घाटकाश्च विधानसभायां कांग्रेसदलसचेतकाः श्री बी. डी. कल्लामहोदया आसन्। श्लोकपाठप्रतियोगितायां श्रीराजीवचौहानः प्रथमं, श्रीविष्णुशर्मा द्वितीयं, श्रीलीलाधरशर्मा तृतीयं, श्रीसहदेवशर्मा च विशिष्टपुरस्कारमलभत।

वादविवादप्रतियोगितायां पक्षे कु० सविता आर्या प्रथमं, कु० विजयलक्ष्मी द्वितीयं, श्रीशम्भुनाथझा तृतीयं, विपक्षे च कुमारी नन्दिता प्रथमं, श्रीसहदेवशर्मा द्वितीयं, श्रीसुराजश्च तृतीयं स्थानं प्राप्तवान्।



बांसवाड़ानगरे अकादमीद्वारा समायोजितस्य अखिलभारतीयवेद-सम्मेलनस्योद्घाटनं कुर्वन्तः राजस्थानस्य मुख्यमन्त्रिणः श्रीहरिदेव-जोशिमहोदयाः; पार्श्वे अकादम्या उपाध्यक्षाः डॉ. रामचन्द्रद्विवेदिनः।

□ □




बांसवाडानगरे अखिल-भारतीयवेदसम्मेलनावसरे डॉ. सी. आर. स्वामिनाथन्महोदयानां सम्मानं विदधाना मुख्यमन्त्रिणः श्रीहरिदेव-जोशिमहोदयाः; अकादम्या अध्यक्षाः डॉ. मण्डनमिश्रमहोदयाश्च।

स्वर-मंगला



जयपुरे : पं.गिरिधरशर्मा-नवरत्न-जन्मशताब्दी-समारोहे मंचस्थाः डॉ. मण्डनमिश्रमहोदयाः, मुख्यमन्त्रिणः श्रीहरिदेवजोशिमहोदयाः, केन्द्रीय-मानवसंसाधनमन्त्रिणः श्रीनरसिंहरावमहोदयाः, पूर्वशिलातैलराज्यमन्त्रिणः श्रीनवलकिशोरशर्माणश्च ।



समारोहे भाषमाणा डॉ. मण्डनमिश्रमहोदयाः, उपविष्टा मुख्यमन्त्रिणः श्रीहरिदेवजोशिमहोदयाः, केन्द्रीयमानवसंसाधनमन्त्रिणःश्रीनरसिंहराव महोदयाः, पूर्वशिलातैलराज्यमन्त्रिणः श्रीनवलकिशोरशर्माणश्च ।

मुद्रकः–टाइम्स प्रिण्टर्स, तिलकनगर, जयपुर–४ दूरभाष : ४०३५८